ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# वेदः २

## मध्यमा १

## ( ધોરણ 11 )

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं विविधतापरिपूर्ण
तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति आदरभावं धारयिष्यामि ।
प्रत्येकेन सह शिष्टव्यवहारं च करिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां च कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 15.00**

**गुजरातराज्यशालापाठ्यपुस्तकमंडळम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम्-382010**

© गुजरात राज्यशाला पाठ्यपुस्तक मण्डलम्, गांधीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकारा:गुजरातराज्यपाठ्यपुस्तक मण्डलहस्तका: सन्ति । अस्य पाठ्यपुस्तकस्य कश्चिदपि भाग: केनापि रूपेण गुजरातराज्यपाठ्य-पुस्तकमण्डल-नियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्येत ।

**विषयमार्गदर्शनम्**
डॉ. राजेन्द्रकुमार जे. पण्डया

**लेखनम्**
श्री कुलदीप पुरोहित: (कन्वीनर:)
श्री निसर्ग उपाध्याय:
श्री कार्तिक: जानी
श्री कल्पेश: जोषी

**समीक्षणम्**
श्री नंदकिशोर: महेता
श्री प्रवीण: पंड्या
श्री प्रवीण: महेता
श्री विमल: व्यास:
श्री राज: शर्मा

**भाषाशुद्धि:**
डॉ. चिंतनकुमार: दवे

**संयोजनम्**
डॉ. क्रिष्णा दवे
(विषय-संयोजक: -अंग्रेजी)

**निर्माणायोजनम्**
श्री हरेन शाह
(उपनियामक: - शैक्षणिक:)

**मुद्रणसंयोजनम्**
श्री हरेश एस. लीम्बाचीया
(उपनियामक:- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयो: अध्ययनाध्यापनयो: पद्धत्यो: समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमिति: (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिता: मानिता: च अभ्यासक्रमा: सन्ति।

गुजरातसर्वकारद्वारा प्राप्तमान्यताया: **वेद: २ मध्यमा १ ( धो२ण 11 )** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञै: सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भि: सूचिता: सूचना: सादरं स्वीकरणीया: एव।

**पी. भारती** (IAS)
नियामक: कार्यवाहक:प्रमुख:
ता.06-07-2019 गान्धीनगरम्

**प्रथमावृत्ति : 2019**
**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामक:
**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

(क) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

(ख) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

(ग) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

(घ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

(च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

(छ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

(ज) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

(झ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

(ट) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

(ठ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51-क

# अनुक्रमणिका


| | | |
|---|---|---|
| 1. | वैदिकवाङ्मयम् | 1 |
| 2. | वेदानां वैशिष्ट्यम् | 11 |
| 3. | वैदिकानुशीलनस्येतिहासः | 16 |
| 4. | वेदाङ्गानि | 24 |
| 5. | शुक्लयजुर्वेदः चतुर्थोऽध्यायः भागः - १ | 35 |
| 6. | शुक्लयजुर्वेदः चतुर्थोऽध्यायः भागः - २ | 43 |
| 7. | शुक्लयजुर्वेदीयः पञ्चमोऽध्यायः भागः - १ | 52 |
| 8. | शुक्लयजुर्वेदीयः पञ्चमोऽध्यायः भागः - २ | 61 |
| 9. | ऋग्वेदीय-रुद्राभिषेकमन्त्राः-१ | 70 |
| 10. | ऋग्वेदीय-रुद्राभिषेकमन्त्राः-२ | 77 |
| 11. | सामवेदीय-रुद्राभिषेकमन्त्राः भागः-१ | 84 |
| 12. | सामवेदीय-रुद्राभिषेकमन्त्राः भागः-२ | 90 |
| 13. | अथर्ववेदीय-रुद्राभिषेकीयमन्त्राः भागः-१ | 99 |
| 14. | अथर्ववेदीय-रुद्राभिषेकीयमन्त्राः भागः-२ | 105 |
| 15. | चतुर्वेदीयाशीर्वादपुण्याहवाचनम् - भागः-१ | 112 |
| 16. | चतुर्वेदीयाशीर्वादपुण्याहवाचनम् - भागः-२ | 117 |
| 17. | चतुर्वेदपुण्याहवाचनमन्त्रा - भागः-१ | 121 |
| 18. | चतुर्वेदपुण्याहवाचनमन्त्रा - भागः-२ | 126 |
| 19. | शुक्लयजुर्वेदीयराष्ट्रसूक्तम् | 131 |
| 20. | अग्निसूक्तम् ( ऋग्वेदीयम् ) | 136 |
| 21. | पवमानसूक्तम् ( सामवेदीयम् ) | 141 |
| 22. | पृथ्वीसूक्तम् ( अथर्ववेदीयम् ) | 149 |

# १ वैदिकवाङ्मयम्

**प्रस्तावना**

विद्धातोः निष्पन्नोऽयं वेद-शब्दः आर्याणां परम्परायां ज्ञानवाचकोऽस्ति । यद्यपि चत्वारोऽर्थाः विद्धातोः सन्ति ते यथा विद् ज्ञाने, विद् सत्तायां, विद् विचारणे - विद्लृ लाभे । अत्र विद्धातुना सह भावे, कर्मणि करणे चार्थे घञ्-प्रयत्यः प्रयुज्यते । फलतः वेदशब्दस्यार्थः ज्ञानं, ज्ञानविषयः, ज्ञानस्य साधनमिति क्रियते । विद्यन्ते धर्मादयः पुरूषार्थाः यैस्ते वेदाः । धर्मार्थकाममोक्षाणां ज्ञापकाः वेदपदवाच्याः । ऋते वेदात् पुरुषार्थानां संगमः असम्भवः प्रतिभाति । यद्यपि वेदपदस्य निरूपणाय प्राचीनाः नवीनाः आचार्याः तत्पराः सन्ति तेषु कानिचित् मतानि प्रसिद्धाः परिभाषाः (परिष्काराः) उक्तयः चात्र उदाह्रियन्ते यथा ऐतरेय-भाष्य-भूमिकायां सायणो वदति - **इष्टप्राप्त्यनिष्टपरिहारयोर्लौकिकम् उपायं यो ग्रन्थो वेदयति स वेदः** । अयम्भावः मनुष्याणामनिष्टनिवारणायाभीष्टस्य च सिद्धये अलौकिकस्य उपायस्य बोधको ग्रन्थो वेदः । तथा च तैत्तिरीय-भाष्यभूमिकायाम् अपि आह -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**

**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥**

---

मन्त्र-ब्रह्मणयोर्वेद-नामधेयम् **आपस्तम्बः** । मन्त्रब्रह्मणं वेद इत्याचक्षते । **बौधयनगृह्यसूत्रम्** । मन्त्रब्राह्णयोर्वेदनामधेयं षडङ्गमेक इति **तन्त्रवार्तिके** । वेदशब्देन ऋग्यजुः-सामानि ब्रह्मणसहितान्युच्यन्ते । इति **मेधातिथिः** ।

वेद ऋग्यजुःसामाथर्वलक्षणः स सर्वो विध्यर्थवाद-मन्त्रात्मा धर्मे मूलं प्रमाणम् इति **कुल्लूकभट्टः** । मन्त्रब्रह्मणात्मकः शब्दराशिर्वेदः **सायणः** । मन्त्रब्रह्मणयोराहुर्वेदशब्दं महर्षयः षड्गुरुशिष्यः वेदत्वं नाम धर्मः शब्दार्थोभयनिष्ठः न तु केवलं शब्दनिष्ठः **खण्डदेवः** । (भाष्यदीपिकायाम्) अपौरूषेयं वाक्यं वेदः इति **लौगाक्षिभास्करः** । स्वामी दयानन्दः ब्रह्मणभागान् वेदमध्ये न स्वीचकार संहिता भाग एव वेदोऽस्ति इति स्वामिवर्यस्याभिप्रायः ।

वेदशब्दः ग्रन्थवाचकः तथैव विद्या-शब्दोऽपि स्मृतः यथा च -

**सैषा त्रय्येव विद्या तपति त्रयी वै विद्या ।**

**स यावतीयं त्रयी विद्या तावध्दि जयति ॥**

यथा पूर्वमेव प्रतिपादितम् अलौकिकार्थ सम्पादकः ज्ञापकः वेदः तथैवालोकिकार्थप्रतिपादितः विद्या शब्दः यथा चोक्तं याज्ञवल्क्य स्मृतौ -

**पुराणन्याय मीमांसा धर्मशास्त्राङ्गमिश्रिताः ।**

**वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥**

**उपनिषदि अपि तथैव स्मृतम्** - द्वे विद्ये वेदितव्ये परा चैवापरा च । तत्र परा ऋग्वेदो यजुर्वेदः समावेदोऽथर्ववेदः। अत्रापि वेद-शब्दः विद्या-शब्दश्च शब्दाराशीनामवबोधाय उत वा शब्दराशौ गुम्फितानां ग्रन्थानां प्रकटनाय विद्येते।

**ब्राह्मणः पर्यायो वेदः** वेदे सच्चिदानन्दस्य परमेश्वरस्य चिन्तनमस्ति । उक्तञ्च गीतायां सर्वैरहमेव वेद्यः । अर्थात् चतुर्भिः ऋग्यजुः सामथर्वभिः असौ सच्चिदानन्दः श्री कृष्ण एव ज्ञातव्यः ज्ञातश्च विद्यते । बहुत्र वेदस्य पर्यायः ज्ञानात्मकं ब्रह्म भवति तथापि तत्स्वीकारे न दोषाणामाविर्भावः ।

**स्वरभेदेनार्थ-भेदः**- श्रुतौ तावत् द्विविधः वेदशब्दः आद्युदात्तः अन्तोदात्तश्च । स्वरभेदेनार्थभेदोऽपि प्रकल्पितः । यत्राद्युदात्तो वेद-शब्दः ग्रन्थ-राशिवाचकः (ऋग्यजुसामाथर्वाणां बोधकः) तत्रैव अन्तोदात्तः वेदः कुशमुष्टिपरकः भवति। तस्मात् भगवान् पाणिनिः अष्टाध्याय्याम् उभयरूपस्य सिद्ध्यर्थं उच्छादिगणे वृषादिगणे च वेद शब्दद्वयं पपाठ उच्छादीनां च (6.1.157), वृषादीनां च (6.1.200) तयोः आद्युदात्तः वेद शब्दः ग्रन्थपरकः योगरूढः कुशमुष्टिवाचकः अन्तोदात्तः

वेदशब्दः रूढो भवति । केषाञ्चित् विदुषामत्र कथनम् अस्ति यौगिकार्थस्वीकारे ज्ञानमात्रेऽति प्रसक्तिः अत एव ग्रन्थ-राशिपरकस्य वेदशब्दस्य योगरूढे समावेशः सार्थकः प्रतिभाति ।

वैदिक-वाङ्मयस्योदय-विषये अथवा आविष्कार-विषये समेषां चिन्तकानां मनसि प्रश्नः आविर्भवति । वेदः स्वतः प्रमाणभूतोऽस्ति । स्वतः प्रमाणभूतस्य वेदस्य विषये कः तर्कं कुर्यात् को वा कथञ्चित् किमपि ब्रूयात् -

वेदस्य प्रमाणमङ्गीकुर्वन् स्मरति जैमिनिः मीमांसायां -

**''औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धः तस्य ज्ञानम् उपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यान् अपेक्षत्वात्''** (जैमिनिः सूत्रम् - 1.1.5)

तथा च तत्रैव सायणः

**''अबोधको बोधको वा न तावद्बोधको विधिः ।**

**शक्तेरलौकिके धर्मे ग्रहणं दुर्घटं यतः ॥**

**समभिव्याहृते धर्मे शक्तिसंग्रहसंभवात् ।**

**बोधकस्य विधेर्मात्वमनपेक्षतया स्थितम् ॥''**

अन्यत्रापि शास्त्रदीपिकायां पार्थसारथि मिश्रः प्राह प्रसिद्धानि हि प्रत्यक्षादीनि प्रमाणानि तदन्तर्गतं च शास्त्रं, अतस्तदपि प्रसिद्धमेव । न च प्रसिद्धस्य प्रमाणस्य प्रामाण्यमन्येन परीक्षितव्यम् । स्वत एव तस्य स्वविषयोपस्थान-सामर्थ्यात् । यदि च परीक्ष्येत,ततो येन परीक्ष्येत तस्याप्यन्येन परीक्ष्येत तस्य अपि अन्येन इति अनवस्था स्यात् । तस्मात् प्रसिद्धत्वात् प्रमाणस्य चोदनापि प्रमाणमिति ।

सर्वविधसमालोचनेन सिद्ध्यति स्वतः प्रमाणभूतस्य परमेश्वरस्य निःश्वासरूपः वेदः ॥

**बृहदारण्यकोपनिषदि तदेव त्त्वं प्रतिपादितम् -**

''स यथा ऽऽर्द्रैधाग्नेरभ्याहितस्य । पृथग्धूमाविनिश्चरन्त्येवम्वाऽअरेऽस्य महते भूतस्य निःश्वसितं एदद्यदृग्वेदो यजुर्वेदः श्लोकाः सामवेदोऽथर्वाङ्गिरसः इतिहासः पुराणम्विद्याऽउपनिषदः सूत्राण्यनुख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि'' (2. 4. 10)

इमामेवभावनामङ्गीकृत्य आचार्य-सायणो वेदभाष्यारम्भे परमात्मानं संस्मरन् प्रोवाच -

**यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।**

**निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥**

अयम्भावः यस्य सच्चिदानन्दस्य परमेश्वरस्य निःश्वासः वेदो वर्तते येन परमात्मना वेदैरेव सम्पूर्णं जगत् निर्मितम्। तं विद्यास्वरूपं परमं पवित्रं परमेश्वरं प्रणौमि ।

तत्रैव शाक्तपुराणेषु यत्र पराम्बायाः निखिलं चरितं श्रूयते तेषु पुराणेषु पराम्बायाः सकाशात् वेदः प्रादुर्भूतः इति दृश्यते यथा श्रीमद्देवीभागवते -

**वेदाधिष्ठातृदेवीं च वेदशास्त्रस्वरूपिणीम् ।**

**वेदबीजस्वरूपां च भजे तां वेदमातरम् ॥** (9.26.52)

**अन्यच्चापि**

**वेदमातरमेकां च विद्यां भवतरोः स्थिराम् ।**

**सर्वदुःख-निहन्त्रीं च स्मरणात् सर्वकामदाम् ॥** (देवी भागवतम् 3.2.35)

तथा च बहुत्र वेदगर्भा, वेदयोनिः, वेदरूपा-भागवत्याः स्तवने पठ्यते । अन्यत्र वेदमातुः गायत्र्याः सकाशात् वेदस्याविर्भावः श्रूयते तद्यथा -

**वेदमातरि गायत्र्यां तद्ध्याने तन्मनोर्जपे ।**

**भवताऽनुन्मुखा यूयं सर्वथा ब्रह्मणाधमाः ॥** देवी-भागवतम् 12.9.56

**तथा चाथर्ववेदे -**

**स्तुता मया वरदा वेदमाता प्रचोदयन्तां पावमानी द्विजानाम् ।**

**आयुः प्राणं प्रजां पशुं कीर्तिं द्रविणं ब्रह्मवर्च्चसं मह्यं दत्त्वा व्रजत ब्राह्मलोकम् ॥**

(अथर्व संहिता)

किं बहुना सर्वत्र गायत्र्याः स्तुतिः वेदमातृत्वे प्राप्यते । मनुस्मृतौ अग्नि-वायु सूर्येभ्यस्तावदृगादिवेदानां प्रादुर्भावः श्रूयते यथा -

**अग्नि-वायुरविभ्यस्तु त्रयं ब्रह्म सनातनम् ।**

**दुदोह यज्ञसिद्ध्यर्थमृग्युजुः-सामलक्षणम् ॥**

एवञ्च वक्तुं शक्ते वेदः सनातनः सर्वैरुपासनीयश्च ।

## ब्राह्मणम्

मन्त्र-ब्राह्मणयोर्वेद-नामधेयम् इति प्रतिज्ञा-परिशिष्ट-वचनात् ब्राह्मण-भागः वेदोऽस्ति । मन्त्राः संहितासु उपनिबद्धाः । इदानीं ब्राह्मणभागस्य विवेचनं करोमि । सर्वप्रथम-मादौ ब्राह्मण-शब्दः विचीर्यते । ब्राह्मण-शब्दःसंस्कृतसाहित्ये द्विविधः एकः जातिवाचकः अपरः ग्रन्थवाचकः । जातिवाचको ब्राह्मण शब्दः पुल्लिंगे प्रयुज्यते तत्रैव ग्रन्थवाचकः ब्राह्मण-शब्दः नपुंसकलिंगे प्रयुक्तो भवति । उक्तञ्च मेदिनीकोशे -

''ब्राह्मणं ब्रह्म संघाते वेदभागे नपुंसकम्'' अस्य वचनस्य अपवादः महाभारते उद्योगपर्वणि पठ्यते यत्र ब्राह्मण-शब्दःग्रन्थवाचकः अस्ति किन्तु पुल्लिंगे उक्तः-

**''य इमे ब्राह्मणाः प्रोक्ताः मन्त्रा वै प्रोक्षणे गवाम् ।**

**एते प्रमाणम् उताहो नेति वासव ॥''**

ब्रह्मण शब्दः ब्रह्मन्-शब्दात् अण्-प्रत्येय कृते नपुंसकलिंगे ग्रन्थवाचकः ब्राह्मण-शब्दःनिष्पद्यते । आचार्यः जैमिनिः मीमांसायां सूत्रयामास-शेषे ब्राह्मण-शब्दः (2. 1. 33) अर्थात् मन्त्रातिरिक्तः वेदभागः ब्राह्मणमिति । भट्टभास्करः तैत्तिरीय संहितायाः भाष्ये लिखति -

**''ब्राह्मणं नाम कर्मणस्तन्मन्त्राणां च व्याख्यानग्रन्थः''**

अर्थात् कर्मणि प्रयुज्यमानानां मन्त्राणां व्याख्यान-ग्रन्थः ब्राह्मणमिति ।

**महामहोपाध्यायः श्री-विद्याधरशर्मा लिखति -**

''वेदचतुष्टय मन्त्राणां कर्मसु विनियोजकः कर्मविधायको नाना विधानादीतिहास व्याख्यानबहुलो ज्ञानविज्ञान-पूर्णो ब्राह्मण-भागः ।''

सर्वतन्त्र-स्वतन्त्रो वाचस्पतिमिश्रः लिलेख

**नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम् ।**

**प्रतिष्ठानां विधिश्चैव ब्राह्मणं तदिहोच्यते ॥**

अयं भाव: ब्राह्मणग्रन्थे मन्त्राणां प्रयोगात्मक: पक्ष: समुद्घाटित: । आर्यसमाजस्य संस्थापक:स्वामी दयानन्द: ब्राह्मण-भागस्य प्रमाणं वेदकोटौ न स्वीकारोति तथापि वेदस्य व्याख्यान-ग्रन्थ: ब्राह्मणमिति मन्यते । यथा -

''तत्र मन्त्राणां तत्तद्यागाद्युपयोगित्वं वर्णयितुं समासतस्तात्पर्यमन्वाख्यातुं वा व्याख्यानानि च कृतानि । ततश्च विध्यर्थ-वादाख्यानपूर्वकम् आदिमं मन्त्रभाष्यं ब्राह्मणित्येव पर्यवस्यते ब्राह्मणलक्षणम् ।'' ब्राह्मणस्य प्रामुख्येन द्वौ भागौ स्त: विधि: अर्थवादश्च । आपस्तम्ब: विधिरर्थवादौ चैकीकृत्य ब्राह्मणस्य लक्षणं चकार -

**'कर्मचोदना ब्राह्मणानि । ब्राह्मण-शेषोऽर्थवाद: ।'** (आपस्तम्ब-परिभाषा)

## ब्राह्मण-भागस्य प्रमाणम्

भारतीयानां दृढो विश्वास: मन्त्रब्राह्मणयो:वेदत्वम् अस्ति । परमम्परायां ये वेदेषु श्रद्धां विदधाना: मनीषिण: सन्ति यथा - शबरस्वामी, शंकराचार्य:, पितृभूति:, भट्टकुमारिल:, भवस्वामी, देवत्रात:, वाचस्पतिमिश्र:, राजशेखर:, रामानुज:, उव्वट:, मस्करी, सायणाचार्य:, महीधर: प्रभृति अन्येऽपि आचार्या: मन्त्रेण सह ब्राह्मणभागस्यापि प्रमाणं स्वीकुर्वन्ति तस्मात् सर्वे जपन्ति

**''मन्त्र ब्राह्मणयोर्वेदनामधेयम्''**

ब्राह्मणभाग: वेदस्य व्याख्यानभागोऽस्ति तस्मात् तस्य प्रमाणं न स्यात् इति कथनमपि सत्यं नास्ति । अस्मिन् प्रसंगे प्रो. युगलकिशोर-मिश्र-महोदयस्य चिन्तनं सार्थकं प्रतिभाति -

कृष्णयजुर्वेद-तैत्तिरीयसंहितायां मन्त्रेण सह ब्राह्मण-भागोऽपि न्यस्त: तत्र कथं ज्ञानं स्यात् उभयो: भागयो: अध्ययनं गुर्वध्ययनपूर्वकम् अनध्यायादिरहिते काले भवति । स्वरनियम: अपि समान: अत: ब्राह्मणभागस्य प्रमाणमस्ति इत्येवं ज्ञेयम् । अन्यथा अध्ययन-विधौ समस्या स्यात् ।

यथा व्याकरणशास्त्रम् अस्ति तत्र सन्देह उत्पद्यते पाणिनिना प्रोक्तानि सूत्राणि एव व्याकरणम् अथवा तद्व्याख्यान-ग्रन्थ: अपि व्याकरणं स्यात् यदि व्याख्यान-ग्रन्थ: व्याकरणं न भवेत् तर्हि सिद्धान्त-कौमुदी, शेखर-महाभाष्यादीनां व्याकरणे ग्रहणं निरर्थकम् । किन्तु सिद्धान्त: अस्ति व्याख्यानसहितं सूत्रं व्याकरणम् इति

तत्रैव ब्राह्मणभागेन सह मन्त्र: वेदत्वमुपगच्छति । ब्राह्मणं केवलं वेदस्य व्याख्यानं न प्रस्तौति अपितु यज्ञादीनां समग्र: विधि: ब्राह्मणेन प्रतिपादित: । यथा व्याख्यानस्य शैली व्याख्याकारै: स्वीक्रियते तथा ब्राह्मणस्य शैली नास्ति। ब्राह्मणे मन्त्रस्य कुत्र प्रयोगो भवेत् ? अन्यस्यां शाखायामस्य कथमुच्चारणं सम्पूर्णम् इति वृत्तिं सम्पादयति । अत: ब्राह्मणभागस्य प्रमाणविषये ॠग्वेदभाष्य भूमिकायां सायणाचार्येण सम्यक् प्रतिपादितम् । अधिकस्य ज्ञानस्य कृते तत्रैव पठितव्यम् तथा शतपथ-ब्राह्मणस्य प्रथम-भागे भूमिकायां ब्राह्मणभागस्य प्रमाणं बहुविस्तरेण साधितं तत्रापि अनुसन्धेयम्।

ब्राह्मणस्य त्रयो भागा: प्राचीनकालात् समागता: वर्तन्ते । श्रौतकर्मकाण्डस्य प्रतिपादको भाग: ब्राह्मणम् ।

उपासनाया: प्रतिपादको भाग: आरण्यकम् । ज्ञानकाण्डस्य प्रतिपादको भाग: उपनिषद् इति । अर्थात् ब्राह्मण-आरण्यक-उपनिषद:एते त्रय: ब्राह्मणमेवास्ति ।

### ब्राह्मणानां वर्ण्यविषय:

ब्राह्मणग्रन्थानां मुख्य: प्रतिपाद्य: विषय: यज्ञ: वर्तते । यागस्य द्वौ भागौ विधिरर्थवादश्च ।

**विधि:** - तत्राज्ञातार्थ-ज्ञापको वेदभागो विधि: । अर्थात् अज्ञात-अर्थ-बोधको विधिभागो भवति यथा ''अग्निहोत्रं जुहुयात् स्वर्गकाम:'' अर्थात् स्वर्गादिफल-साधनाय अग्निहोत्रं कर्म कुर्यात् । अयं विधिभाग: अन्यप्रमाणैरप्राप्तस्य स्वर्ग-रूपफलेन सह अग्निहोत्र-कर्मण: विधानं करोति । अत्र सायणाचार्य: विधिभागं द्विधा विभजते -

1. अज्ञातार्थज्ञापको विधि: ।
2. अप्रवृत्तं प्रवर्त्तनो विधि: ।

'आग्नावैष्णवं पुरोडाशं निर्वपन्ति दीक्षणीयम्' इति कर्मकाण्डज्ञापकं वाक्यम् अप्रवृत्त-प्रवर्तनो विधि: भवति ।

'आत्मा वा इदमेक एवाग्र आसीत्' इति ज्ञानकाण्ड-आत्मकं वाक्यम् अज्ञातार्थज्ञापको विधिरस्ति ।

अर्थसंग्रहस्य कर्त्ता लौगोक्षि-भास्करः एकमेव विधिं स्वीकरोति अज्ञातार्थज्ञापकः केवलः विधिः किन्तु सायणस्य विभागः कर्मकाण्डज्ञानकाण्ड-भेदाभ्यां प्रवर्तते ।

**अर्थवादः**- प्राशस्त्यनिन्दात्मकं वाक्यमर्थवादः । अर्थात् अर्थवादः यज्ञे निषिद्ध-वस्तूनां निन्दां तथा यज्ञार्हवस्तूनां प्रशंसां कृत्वा मनुष्यान् यज्ञकर्मणि प्रेरयति । विधिवाक्यं कर्मणः विधिं ब्रूते तत्रैवार्थवादः उत्साहवर्द्धनाय कर्मणः प्राशस्त्यं भाषते । अर्थवादः स्वतन्त्रो न भवति । विधिवाक्यस्य कात्स्‍र्न्यरूपम् अस्ति । विधिवाक्यं प्रशंसात्मकेन वाक्येन पूरयति। प्रशंसां श्रुत्वा जनः कर्मणि उद्यतो जायते । अत एव मीमांसायां सूत्रं वर्तते -

**विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः ।**

अयं अर्थः विधिरर्थवादयोर्मध्ये परस्परं शेष-शेषिभाग-सम्बन्धः भवति । मीमांसायाः भाष्यकारः शबरस्वामी ब्राह्मणग्रन्थे व्यवस्थापितः-

**हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।**

**परक्रिया पुराकल्पो व्यवधारण-कल्पना ॥**

**उपमानं दशैवैते विधयो ब्राह्मणस्य तु ।**

**एतद्वै सर्ववेदेषु नियतं विधिलक्षणम् ॥** (शाबरभाष्यम् 2.1.11)

एतेषां दशानां विवरणमुपस्थाप्यते -

1. **हेतु** - यज्ञे किमपि कार्य कथं विधीयते इत्यस्य सम्पूर्णस्य तथ्यस्यान्वेषणम् यथा 'तेन ह्यन्नं क्रियते' अर्थात् शूर्पेण होमो विधेयः यतो हि तेन (शूर्पेण) अन्नं संस्क्रियते ।

2. **निर्वचनम्** - शब्दस्य निरुक्तिः व्युत्पत्तिर्वा । कस्यापि वस्तुनः नामकरणे को हेतुः इत्यस्य ज्ञानं यथा - 'तद्दध्नो दधित्वम्' दधि-शब्दस्य निर्वचनं कृतम् ।

3. **निन्दा** - यज्ञे निषद्धकर्मणां (वस्तूनां) निन्दा । अर्थात् अप्रशस्त पदार्थानां निन्दां कृत्वा यज्ञे तेषां प्रयोगाय बाधः उपस्थापनीयः यथा - अयज्ञियं वै माषाः । माषस्य यज्ञे ग्रहणं नोचितम् ।

4. **प्रशंसा** - यज्ञे विहितानां पदार्थानां (कर्मणां) प्राशस्त्यम् उक्त्वा तेषां सम्यक् ग्रहणं यथा - ''वायुर्वैक्षेपिष्ठा देवता'' वायवे श्वेतं पशुमालभेत् । इत्यत्र वायोः गुणानुवादं कृत्वा तस्मै श्वेतस्य पशोरालम्भनं प्रतिपादितम् ।

5. **संशय** - यज्ञे कुत्रापि सन्देहः भवेत् तस्य विधिना निवारणम् । स्रुवेण होमः उत वा जुह्वा होमः इति संशयः भवति । अस्य निराकरणं तत्रैव प्रकरण-विशेषे ब्राह्मणग्रन्थे विवेचितम् ।

6. **विधि** - अस्याभिप्रायो भवति यज्ञियक्रियायाः याथातथ्येन सम्यक् प्रतिपादनम् । यज्ञे कस्य प्राथम्यं स्यात् तथा कः अत्र क्रमः भवेत् । यथा सोमयागे उदुम्बरशाखामाश्रित्य सामगानं विहितं तत्र तच्छाखा कियती परिमाणवती स्यात् इत्यत्र आह यजमान-परिमाणो दण्डः यथा-यजमानेन सम्मिता औदुम्बरी भवति ।

**पराक्रिया** - अन्यस्मै क्रिया अर्थात् परोपकाराय क्रियमाणा क्रिया यथा - माषानेव मह्यं पचति ।

**पुराकल्प** - यज्ञस्य विधीनां समर्थनाय प्राचीनायाः आख्यायिकायाः वर्णनं यथा ''एतेन हेन्द्रोतोदेवापिः शौनको जनमेजयं परीक्षितं याजयाञ्चकार'' ब्राह्मणग्रन्थे अनेके पुराकल्पाः आख्याताः ।

**व्यवधारणकल्पना** - परिस्थितिं दृष्ट्वा कार्यस्य निश्चयीकरणं यथा-यागे यावन्तः अश्वाः स्युः तावन्ति जलापूरितानि पात्राणि स्थापयेयुः । अन्यच्च तैत्तिरीय-संहितायाम् यावतोऽश्वान् प्रतिगृह्णीया तावतो वरूणान् चतुष्कपालान् निर्वपेत् ।

**उपमानम्** - उदाहरणं दत्त्वा प्रतिपाद्य-विषयाणां संगतिकरणम् । अस्य प्रमाणं छान्दोग्योपनिषदि ।

स यथा-शकुनिः सूत्रेण प्रबद्धो दिशं दिशं पतित्वा अन्यन्नायतनमलब्ध्वा बन्धनमेवोपश्रयते ।

एवमेव खलु सौम्य ! तन्मयो दिशं दिशं पतित्वाऽन्यत्रायतनमलब्ध्वा प्राणमेवोपश्रयते प्राणबन्धनं हि सौम्य मन इति ।

ब्राह्मण-ग्रन्थेषु मन्त्राणां त्रिविधः अर्थः निरूपितः आधिभौतिकः आधिदैविकः आध्यात्मिकश्च ।

## आरण्यकम्

क्रमानुरोधेन ज्ञायते आरण्यकं ब्राह्मण-ग्रन्थस्याऽन्तिमो भागः । प्रथमं ब्राह्मणमुत्पन्नं तदनु आरण्यकम् । आरण्यक-ग्रन्थः सम्प्रति ब्राह्मण-शेषवत् ग्रन्थान्ते पठितमस्ति ।

एकत्र ब्राह्मणग्रन्थे बहुविधाः द्रव्ययज्ञाः प्रपञ्चिताः तत्रैव आरण्यके अध्यात्मयज्ञस्य महत्त्वं दृश्यते । अनेन द्रव्ययज्ञस्यानादरः न प्रकटितः अपितु द्रव्य-यज्ञादेव पाञ्चभौतिक-शरीरस्य बाह्याभ्यान्तरतः शुद्धिरिष्यते । कामानां सिद्धिः, भोगानां प्राप्तिः प्रथमं द्रव्ययज्ञेन सिद्ध्यति । द्रव्ययज्ञात् श्रान्तः जनः अध्यात्म-यज्ञं प्रविशति । वाक्यान्तरेण वक्तुं शक्यते स्थूलात् सूक्ष्मस्यावाप्तिः । अतृप्तकामस्य अध्यात्म-यज्ञे प्रवेशः निरर्थकः प्रतिभाति । अभुक्तकामः तत्रापि तं जनं भोक्तुं हठात् उद्वेलयति । प्रेरयति च ।

अतः द्रव्य-यज्ञस्य सम्यगनुष्ठानं कृत्वा अध्यात्म-यज्ञे प्रवेशः निश्चेतव्यः । अद्यतनीयः कालः विपरीतः वर्तते मनुष्यः सर्व-प्रथमम् आत्मवादस्यैव चिन्तनं करोति सर्वत्र कथाप्रसंगेऽपि आत्मचिन्तनं प्रामुख्येन प्रसारयति । जीवनस्य प्राथमिकं महत्वमपि न वेत्त्यसौ कथं ब्रह्मज्ञानी भूत्वा स्वयं भ्रष्टः सांसारिकान् वञ्चयितुम् आत्मानं प्रदर्शयति अतः आदौ ब्राह्मणग्रन्थेन प्रोक्तस्य धर्मस्य अवश्यमेव परिपालनं भवेत् अग्रे आरण्यकम् नो चेत् रामचरित-मानसे गोस्वामिना प्रोक्तं-

**ब्रह्मज्ञान बिनु नारिनर करहिं न दूसर बात ।**

**कौरी लागि लोभवस करहि विप्र गुरुघात ॥**

आरण्यकं चतुर्षु आश्रमेषु तृतीयादि-आश्रमेषु प्रवर्तते । वानप्रस्थानां संन्यासिनां च कृते आरण्यकम् उत्पन्नम् ॥

## आरण्यकमिति नामकरणम्

आरण्यकम् इत्यत्र अरण्य-शब्दात् भवार्थे वुञ्-प्रत्ययः भवति तेन आरण्यकम् इति निष्पन्नम् अर्थात् अरण्ये भवम् आरण्यकम् । सदाशिववामन आप्टे महोदयः स्वकीये 'संस्कृत-अंग्रेजीकोश'-ग्रन्थे आरण्यक शब्दस्य अर्थं प्रतिपादितवान् तस्य भावः वर्तते -

आरण्यकं धार्मिक-दार्शनिक-निबन्धाभ्यां संपृक्तः प्रौढः ग्रन्थः विद्यते अस्य ब्राह्मण-साहित्येन सह सम्बन्धः अस्ति। अस्य लेखनं मन्ये अरण्ये जातम् अथवा अध्ययनस्य स्थानम् अरण्यं भवति स्म, तस्मात् आरण्यकम् ।

अत्र विचारणीयः अरण्य-शब्दः । अभिद्यया अरण्य-शब्दः कोशग्रन्थे वनस्य पर्यायत्वे पठितः । लक्षणया अरण्यशब्दः चिन्तनम् अभ्यासश्च एकान्ते सम्भवति अतिगम्भीरः विषयः अत्र विवेचितः । एकान्तः गृहेऽपि भवितुमर्हति अस्माकं सायणाचार्य-प्रभृतयः आचार्याः गृहे स्थित्वा एव ग्रन्थग्रन्थि-भेदकाः जाताः । तेषामरण्ये वासः न श्रूयते । अतः एतादृशः ग्रन्थविशेषः आरण्यकम् । सायणाचार्यः अपि अरण्ये अध्ययनमिति प्रोक्तं -

**अरण्याध्ययनादेतत् आरण्यकमितीर्यते ।**

**अरण्ये तदधीयतेत्येवं वाक्यं प्रवक्ष्यते ॥**

महाभारते शान्तिपर्वणि व्याख्यातं यथा दध्नः नवनीतमुत्पद्यते, मलयाचलात् चन्दनम् औषधीभिश्चामृतं तथैव वेदेभ्यः आरण्यकम् इति ज्ञेयम् । श्लोकः -

**नवनीतं यथा दध्नो मलयाच्चन्दनं यथा ।**

**आरण्यकं च वेदेभ्यः औषधिभ्योऽमृतं यथा ॥**

आरण्यकेषु सकामकर्मणां प्रायेण अभावः दृश्यते अध्यात्मचिन्तने सर्वत्र अस्य गतिः भवति ।

## उपनिषद्

उपनिषद् शब्दः उप + नि + सद् + क्विप् इति भवति । अत्र उप नि द्वौ उपसर्गौ स्तः षदलृ धातुः उपवेशन अर्थे भवति । उप उपसर्गस्यार्थः समीपः नि निश्चयार्थे । समीपं गत्वा निश्चयेनोपवेशनम् अयं भावः तत्त्व-ज्ञानाय गुरोः समीपे उपवेशनम् ।

यद्यपि षदलृ विशरण-गत्यवसादनेषु धातुः वर्तते । उक्तं च ईशोपनिषद् भूमिकायां -

**''उपनिषीदति सर्वानर्थकरं संसारं विनाशयति संसारकारण - भूतामविद्यां च शिथिलयति ब्रह्म च गमयति इति उपनिषत्'' ।**

अयमर्थः-या समेषामनर्थाणाम् उत्पादकं संसारं नाशयति तथा समस्तां संसारस्याविद्यां ध्वंसयति तथा ब्रह्मसाक्षात्कार लक्षणं दर्शयति सा उपनिषत् । शंकराचार्यः उपनिषद्-शब्दं अर्थापयन्नाह - या श्रद्धा भक्तिपूर्वकम् आत्मभावेन ब्रह्मविद्यां प्रापयति, जन्ममृत्यु - जरादिरोगाणां शमयित्री वर्तते तथा संसारस्य कारण-भूताम् अविद्यां नाशयति सा उपनिषत् ।

**''य इमां ब्रह्मविद्यामुपयन्त्यात्मभावेन श्रद्धाभक्तिपुरःसरः सन्तः तेषां गर्भजन्म-जरारोगादिवर्गं विनाशयति परं वा ब्रह्म गमयति अविद्यासंसारकारणं चात्यन्तमवसादयति विनाशयति इत्युपनिषत् उपनिपूर्वस्य सदेरेवमर्थ-संस्मरणात्''**

(इति कठोपनिषद्-भूमिकायाम्)

तथा च ललितासहस्त्रनाम-सौभाग्यभास्कर-व्याख्याया मुक्तम्

**उपनीयेममात्मानं ब्रह्मापास्तद्वयं सतः ।**

**निहन्त्यविद्यां तज्जां च तस्मादुपनिषन्मता ॥**

उपनिषद् शब्दस्यार्थः रहस्यमपि भवति । अमरकोषेऽपि - धर्मे रहस्युपनिषद् स्यात् ।

अनेन प्रकारेण उपनिषद्-शब्दः ब्रह्मविद्यायाः प्रकाशकः विद्यते ।

ब्रह्मविद्यायाः प्रकाशनम् आधुनिकपद्धत्या न सम्भवति, न च पुस्तकालये । बहुकालमुपविश्य ब्रह्मविद्यायाः ज्ञानं भवेत् । अस्याः ज्ञानाय गुरोः समीपे एव गमनं भवति । तत्रैव श्रद्धा-भावेन उषित्वा ज्ञानं प्रापयेत् । प्रश्नोत्तराभ्यां ब्रह्मविद्या प्रकाशते । जिज्ञासुः तत्र गत्वा आत्मविषयकं प्रश्नःस्थापयति गुरुः तस्य समाधानं कुरुते ।

## उपनिषदां संख्याः

वेदस्य यावत्यः शाखाः महाभाष्यकारेण पतञ्जलिना प्रोक्ताः तावत्यः उपनिषदः अपि भवेयुः किन्तु सहस्त्रशः शाखाः विलुप्ताः जाताः उपनिषदाम् अपि सैव कथाऽस्ति ।

संख्या विषये विदुषां मध्ये मतभेदः वर्तते । अर्वाचीन-समयेऽपि अनेकाः उपनिषदः मान्यैराचार्यैः लिखिताः । तथापि भारतीय-परम्परा अष्टोत्तरशतम् उपनिषदां महत्त्वम् अकल्पयत । मुक्तिकोपनिषदि अष्टोत्तरशतम् उपनिषदः अङ्गीकृताः ।

तासामुपनिषदामध्ययनात् मोक्षं प्राप्नोति मानवः ।

**प्रमुखाः उपनिषदः**

मुक्तिकोपनिषदि यासामुपनिषदां नाम प्रथम पंक्तौ लिखितं ताः प्राचीनाः प्रमुखाश्च विद्वद्भिः स्वीक्रियन्ते । यथा–

**ईशकेनकठप्रश्नमुण्ड-माण्डुक्यतित्तिरिः ।**

**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश ॥**

| | | | |
|---|---|---|---|
| 1. | ईशोपनिषत् | 2. | केनोपनिषत् |
| 3. | कठोपनिषत् | 4. | प्रश्नोपनिषत् |
| 5. | मुण्डकोपनिषत् | 6. | माण्डुक्योपनिषत् |
| 7. | तैत्तिरीयोपनिषत् | 8. | ऐतरेयोपनिषत् |
| 9. | छान्दोग्योपनिषत् | 10. | बृहदारण्यकोपनिषत् । |

## शब्दार्थाः

**उभयरूपम्** - रूपद्वयम्, **प्रमाणभूत** - प्रमाणरूप, **प्रणौमि** - प्रणामं करोमि

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) वेद-शब्देऽस्मिन् को धातुः ?

(क) वेदि (ख) विद् (ग) वि (घ) वेद

(२) मन्त्रब्राह्मणात्मक शब्दराशिर्वेदः केनोक्तम् ?

(क) पिप्पलादः (ख) शौनकः (ग) सायणः (घ) सौरभः

(३) श्रुतौ वेदशब्दः कति-विधः ?

(क) 3 (ख) 4 (ग) 2 (घ) 5

(४) गणद्वये वेदशब्दः कः पपाठ ?

(क) पाणिनिः (ख) कात्यायनः (ग) पतञ्जलिः (घ) भरद्वाजः

(५) अग्नि-वायु-सूर्येभ्यः कःकः वेदः प्राप्तः इति कुत्र लिखितम् ?

(क) मनुस्मृतौ (ख) याज्ञवल्क्यसूतौ (ग) रामायणे (घ) गीतायाम्

(६) ब्राह्मणशब्दः कतिविधः ?

(क) 1 (ख) 2 (ग) 3 (घ) 4

(७) विधिरर्थवादश्च इत्येतौ कस्य विभागौ स्तः ?

(क) प्राणस्य (ख) कर्मणः (ग) यज्ञस्य (घ) क्रियायाः

(८) ग्रन्थवाचकब्राह्मणशब्दः कास्मिल्लिङ्गे प्रयुज्यते ?

(क) पुल्लिङ्गे (ख) स्त्रीलिङ्गे (ग) नपुंसकलिङ्गे (घ) उभये

(९) वेदाधिष्ठात्री देवी का ?

(क) गायत्री (ख) रमा (ग) पार्वती (घ) गौरी

(१०) ब्राह्मणभागस्य मुख्यप्रतिपादकविषयः कः ?

(क) यज्ञः (ख) उपासना (ग) कर्म (घ) संस्कारः

**२. निम्नाङ्कित-प्रश्नानामेकवाक्येनोत्तरं लिखन्तु ।**

(१) अर्थसङ्ग्रहस्य कर्ता कः ?

(२) ब्राह्मणस्य कति भागाः सन्ति ?

(३) अरण्यशब्दः कस्य पर्यायः ?

(४) मुख्योपनिषदाम् सङ्ख्या कति सन्ति ?

(५) ब्राह्मण-शब्देऽस्मिन् कः प्रत्ययः भवति ?

(६) विद्धातोः कति अर्थाः सन्ति ?

(७) मेधातिथिना वेदशब्दार्थे किं लिखितमस्ति ?

(८) ब्राह्मण-पर्यायः कः ?

(९) हेतु इत्युक्ते किम् ?

(१०) वेदाः कति सन्ति ?

**३. निम्नाङ्कित-श्लोकानां पूर्तिः विधेया ।**

(१) अग्निवायु .......................... ।

(२) प्रत्यक्षेणा .......................... ।

(३) नवनीत .......................... ।

**४. निम्नाङ्कित-शब्दानां परिचयो देयः ।**

(१) मन्त्रः

(२) सामानि

(३) ब्राह्मणयोः

(४) वेदाङ्गानि

(५) परिभाषाः

(६) एनम्

(७) असम्भवः

(८) गीतायाम्

(९) अष्टाध्याय्याम्

(१०) सिद्ध्यर्थम्

**५. निम्नधातूनां परिचयो देयः ।**

(१) भवति

(२) पपाठ

(३) ब्रूयात्

(४) प्रतिभाति

(५) प्रणौमि

(६) उवाच

(७) करोमि

(८) लिखति

(९) सन्ति

(१०) स्तः

६. **सन्धिसंयोजनं कुरुत ।**

(१) प्राचीन + आचार्य:
(२) तत् + यथा
(३) कानिचित् + मतानि
(४) महा + ऋषि:
(५) यत्र + आदि + उदात्त:
(६) सिद्धि + अर्थम्
(७) गणे + अस्मिन्
(८) तस्य + अपि + अन्येन
(९) प्रमाणम् + अङ्गीकुर्वन्
(१०) वाङ्मयस्य + उदय:

७. **सन्धिविच्छेदनं कुरुत ।**

(१) मन्त्रब्राह्मणयोराहु:
(२) शब्दार्थोभय
(३) इत्याचक्षते
(४) अलौकिकवकोपाय:
(५) प्राप्त्यनिष्ट:
(६) सैषा
(७) सामवेदोऽथर्ववेद:
(८) पूर्वमेव
(९) वेदोदय:
(१०) प्राह

**छात्र-प्रवृत्तिः**

- छात्राः श्रुतिपरम्परा विषयकं स्वस्य ज्ञानवर्धनं कुर्वन्तु इति ।

**विशिष्टज्ञानम्**

- यज्ञो वै श्रेष्ठतमं कर्म ।

●

# २ वेदानां वैशिष्ट्यम्

**प्रस्तावना**

एतद्देश-प्रसूतानामार्याणां वेदः तर्कविरहितः साक्षात् प्रमाणभूतः समादरणीयो ग्रन्थ-राशिः विद्यते । उक्तञ्च मनुना वेदोऽखिलोधर्ममूलम् । वेदश्चक्षुः सनातनः इदं प्रसिद्धं वाक्यम् अस्मात् कारणात् भारतीयानां श्रद्धा सर्वदा वेदे भवति तथा च प्रमाणानां प्रमाणभूतः वेदः । भारतीयानां समस्तो व्यवहारः धर्मः संस्कारः विधिः विस्तृते वेद-भागे उपनिबद्धोऽस्ति। अस्माकं जन्मतः अन्त्येष्टि पर्यन्तं यावन्तः संस्काराः प्रवर्तन्ते तेषु वेदानां मन्त्राः गुरुमुखोच्चारणानुच्चारणपूर्वमधीयन्तो वेदः भारतीयानां पथप्रदर्शकः इव भवति येन पथ-गमनं कृत्वा सर्वे आत्मानं धन्यधन्यं विधाय मुक्ति-मार्गे प्रयतन्ते । उक्तञ्च-

**वेदो नित्यमधीयतां तदुदितं कर्मस्वनुष्ठीयताम् ॥**




अयमर्थः वेदराशेः अङ्गीकरणं नित्यं भवेद् तथा वेदमार्गस्य सेवनं सर्वैः करणीयम् । वेदस्य परम्परा ऋषीनामनूचानां विद्यते । अत एव भारतीयाः प्राचीनकालात् भोगवादं परित्यज्य परमात्मनि विश्वसन्ति । अत्रत्याः पण्डिताः वेद-रूपेण सनातनेन चक्षुषा लौकिकं तत्त्वं विदन्ति । वैदिककर्मानुष्ठानेन स्वर्ग-लाभो भवति तस्मात् अनुष्ठेयं यथा – ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' अनया श्रुत्या दर्शपौर्णमासयागौ वैदिक-कर्मानुष्ठानं ताभ्यां स्वर्ग उत्पद्यते अर्थात् याज्ञिकः स्वर्गं प्राप्नोति अत्र शंकयितुं शक्यते स्वर्गः कीदृशः केन दृष्टः ? कथं तत्र गम्यते एतेषाम् उच्छेदनाय साक्षात् श्रुतिरेव प्रमाणं नान्यत् यद्यपि मीमांसानां सर्वासां शंकानां निराकरणं सप्रमाणं कृतं तथापि श्रुति-प्रमाणे प्राप्ते शंकायाः किञ्चिद् अपि स्थानं न भवति ।

अस्माकं यावन्ति शास्त्राणि सर्वाणि वेदानां महत्वं गायन्ति । वेदस्य षडङ्गानि सर्वत्र प्रसिद्धानि । अत एव अध्येतारो विद्वासः वेदान् लक्षीकृत्य भाषन्ते । कदाचित् तर्क-वितर्क-प्रसङ्गे श्रुतीनां विरोधे समुत्पन्ने अधः शिरो भूत्वा सर्व एव नैजं पक्षं प्रत्यावर्तयति श्रुतीनां विरोधे लोके उपहासः भवेदेव अन्ते च धर्मच्युतिः तथा स्वर्गापवर्गहानिश्च । वेदः समेषां शिरोरूपः तस्य प्रतिष्ठायां वक्तृणां (मानवानां) प्रतिष्ठा । साहंकाराः मूढा एव तत्र वेदे तर्कयितुमुत्सहन्ते । ये सनातनाः कर्मकराः पण्डिताः सन्ति । अचलो विश्वासः वेदमार्गेनैव अस्माकं कल्याणं योगक्षेमश्च सम्भवति । यस्य वेदमार्गे विश्वासो नास्ति स खलु नास्तिक इति पदेन व्यवहृतः स्मरति भगवान् मनुः –

**''स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः''**

यः नास्तिकः सः समाजे स्थातुं समर्थो नास्ति, अतः बहिष्कारयोग्यः-

यद्यपि आस्तिक-शब्दस्य व्युत्पत्तिः पृथक् प्राप्यते तद्यथा **''अस्ति परलोके मतिर्यस्य स आस्तिकः''** तथा च यस्येश्वरे विश्वासः स आस्तिकः, अन्ते च यस्य आत्मनि विश्वासः सोऽपि आस्तिकः परन्तु एतेषु आस्तिकेषु यस्य वेदे विश्वासः श्रद्धा च स परमः आस्तिकः ।

मानवधर्मशास्त्रस्य प्रवक्तुः मनोः कथनमस्ति ।

**योऽवमन्येत तं मूलं हेतु शास्त्रश्रयाद्विजाः ।**

**स साधुभिर्बहिष्कार्यो नास्तिको वेद-निन्दकः ॥**

वेदस्यास्य प्रमाणस्य प्रयोजनं न भवति न च तर्कस्य अत्र प्रवेशः । परमेश्वरस्यापि ज्ञापकः बोधकः वेद एव । तादृशे वेदे अविश्वासश्चेत् स दण्डनीयो भवेत् । हिन्दुधर्मः यो हि सनातनः उच्यते तस्मिन् वेदस्य सर्वोच्चं स्थानं दृश्यते । शतपथ-ब्राह्मणस्य कथनमस्ति रत्न-परिपूर्णानां भूमीनां दानात् यत्पुण्यं यच्च लोकः प्राप्यते तत्सर्वं तत् अधिकतरमेव विशिष्टं पुण्यं वेदस्य स्वाध्यायात् भवति उक्तञ्च -

**यावन्तं ह वै इमां पृथिवीं वित्तेन पूर्णां लोकं जयति त्रिभिस्तावन्तं**

**जयति भूयासं च अक्षय्यं च य एवं विद्वान् अहरहः स्वाध्यायमधीते**

**तस्मात् स्वाध्यायोऽध्येतव्यः ॥ (शतपथब्राह्मणम् 11-5-6.1)**

पुनरपि भगवान् मनुराह वेदशास्त्र-विशारदो जनः यस्मिन् कस्मिन् अपि आश्रमे निवसति वेदोक्तं प्रयोग-विज्ञानम् आचरतिच स जनः अस्मिन् जगति स्थितः सन् ब्रह्म-साक्षात्कारं लक्षणमाप्नोति । यथा-

**वेद-शास्त्रार्थ-तत्वज्ञो यत्र कुत्राश्रमे वसन् ।**

**इहैव लोके तिष्ठन् स ब्रह्मभूयाय कल्पते ॥ (मनुस्मृतिः)**

भारतीय-संस्कृतेः सभ्यतायाः रहस्योद्घाटकाः वेदाः वर्तन्ते । अन्यत्रापि खण्डशः तज्ज्ञानं प्रसृतं किन्तु वेदः समग्रमुपदिशति तस्मात् महतो वेदस्य अध्ययनं निदिध्यासनं चिन्तनं सर्वैरपि भारतीयैरवश्यं विधेयम् । अध्ययनादौ अधिकारस्य (उपनयनादेः) परिपालनं याथातथ्येन कर्तव्यमन्यथा तदधीतमपि तथा फलवत् न भवति । महाभाष्यस्य तात्पर्यज्ञानं च द्विजातिभिः तत्रापि ब्राह्मणेन अवश्यमेव साधनीयम् ।

**ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च (महाभाष्य) ।**

अस्मिन् वाक्ये निष्कारणः शब्दः ध्यातव्यो विद्यते । अध्ययने इदं न चिन्त्यं यत् कथं मया अधीयते अस्मिन् भौतिक-जगति अस्याध्ययनस्य किं फलं कः हेतुः ?। अपितु परमेश्वरस्य प्रीत्यर्थं वेदानां स्वाध्यायः ब्राह्मण-बटूनां कुमाराणाम् उपवीतानाम् अयं प्रथमोधर्मः वेदानां स्वाध्यायः स च स्वाध्यायः तेषां सर्वमनोभिलषितम् ऐहिकमामुष्मिकं च पूरयिष्यति । यो हि द्विजः वेदादिशास्त्रं नाधीते अन्येषु ग्रन्थेषु श्रमं कुरुते (अर्थात् पाखण्डशास्त्रेषु) स स्वकीयजीवनकाले एव सपरिकरः शूद्रत्वमेति द्विजाधमो भूत्वा शूद्रतां प्राप्नोति यथा चाह मनुः-

**योऽनधीत्य द्विजो वेदमन्यत्र कुरुतेश्रमम् ।**

**स जीवन्नेव शूद्रत्वमाशुगच्छति सान्वयः ।. (मनु- 2/68)**

**अत्रायमभिप्रायः** ''अर्थवादः एव ज्ञेयः । अस्य श्लोकस्यान्यस्य शास्त्रस्य निन्दायां तात्पर्यं नास्ति अपितु वेदस्य प्रंशसायामेव अतः परमं कर्वव्यं मत्वा वेदाध्ययनं ब्राह्मणेनावश्यमेव कर्तव्यम् अन्यथा च्युतो भवति स ब्राह्मणः । येन अध्ययनेन भारतीय-संस्कृतेः सभ्यतायाः अविकल-स्वरूपस्य ज्ञानं सुनिश्चितं भवेत्। अध्ययनं न केवलमामुष्मिक सुखाय भवति । अस्य महद्देशस्य भारतस्य संरक्षणोपायः भारतीयैः विधेयः । यदि प्रमादात् भोगवशाद् वा देशस्य महती परम्परा

लुप्येत तर्हि अनध्यायस्य फलमेतत् ज्ञातव्यम् । देशोऽयं वेदसंरक्षणात् विश्वगुरुरासीत् । इत्यपि न विस्मर्तव्यम् ऋषीणां, चिन्तकानां, मुनीनां, पण्डितानां, धैर्यवतां पण्डितानां भारतदेशः । वेद प्रतिष्ठायां सर्वं प्रतिष्ठितं भवति । सृष्ट्यारम्भात् ऋषिभिः बहुभिरुपायैः वेदा सुरक्षिताः तदनु अत्रत्या विप्राः सर्वाणि भौतिक-सौख्यानि परित्यज्य अभावे जीवनं यापयन्तः महतो वेदस्य संरक्षणे तत्पराः सन्ति । विश्वस्यैश्वर्यं सौख्यं चाकचक्यं च तान् स्वाध्यायरतान् जनान् न सम्मोहयति न च दृढ-भावं विकलयति । धन्यास्ते विप्राः पण्डिताश्च समग्रं राष्ट्रं येषां आदरं वहति श्रद्धया च तान् पश्यति । मन्त्राणां कण्ठी-करणेन सह अर्थज्ञानमपि परमावश्यकम्, अन्यथा भारहार इव स भवति अयमाशयः यास्कस्य निरुक्ते अपि दृश्यते यत्र वेदार्थज्ञः अभिनन्दनीयः प्रशंसनीयश्च तत्रैव अर्थज्ञानरहिताः निन्दिताः यथा -

**स्थाणुरयं भारहारः किलाभूत् अधीत्य वेदं न विजानाति योऽर्थम् ।**

**योऽर्थज्ञ इत सकलं स भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्म ॥**

अयमर्थः यः पण्डितः (विप्र-द्विजः) वेदराशिं कण्ठाग्रं कृत्वा तदर्थं न जानाति सः शुष्कवृक्षवत् (पत्र-पुष्प-फलादि-रहितः) स्थाणुस्तम्भ इति-वद् भवति किं बहुना भारहारः यथा वैशाखनन्दनः (गर्दभः) तद्भवति अर्थज्ञानाभावे न प्रयोक्तुं शक्नुते । तत्रैव मन्त्रैः सह यः अर्थं वेत्ति स सर्वं सुखं तथा च वेदार्थ-ज्ञान-द्वारा सर्व पापं विनिष्कृत्यान्ते स्वर्ग फलं प्राप्नोति । वेदार्थ-ज्ञानेन एव धर्मार्थाचार-व्यवहाराध्यात्मिकादीनां यथार्थ-ज्ञानं जायते अद्य युगे यानि विविधानि मतानि प्रचलितानि तेषां मूलभूतं तत्त्वं वेदः यस्मात् सर्वं प्रवहति । आधुनिकानां विषयाणामपि बीजं वेदे सन्निहितमस्ति केवलं प्रस्तुतीकरणं परिवर्तितम् ।

वैदिकीपद्धतिः आधुनिकेभ्यः सरला मनोहारिणी स्वल्पायासेन प्रबोधिनी मितव्ययिनी च प्रतिभाति । तथा अपि अस्मिन् स्वतन्त्रे भारते अद्यापि लार्ड मेंकाले निमित्तया शिक्षा-पद्धत्या बालकानां शिक्षणं भवति अहो विचित्रेयं व्यवस्था ।

सर्वाणि दर्शनानि, सर्वाः पूजापद्धत्याः, सर्वे सदाचाराः, भौगोलिकं चित्रणं, खगोल-विज्ञान, विमानादिज्ञानं, भैषज्यविज्ञानं, सकलवास्तु-विज्ञानं, कृषि-विज्ञानम्, एतदतिरिक्तमपि वेदे एव भवति 'वेदे सर्वं प्रतिष्ठितं' यदुक्तं तत् सर्वथा समीचीनं प्रतिभाति किमधिकं रामायण-महाभारतादीनामपि मूलस्रोताणिः वेदः । अस्य अध्ययनं, प्रवचनं, श्रवणं च सर्वैः मानवैः सर्वदा करणीयम् नान्यथा शरणं विद्यते ।

## स्वाध्यायः

**१. निम्नलिखित-प्रश्नानां योग्य-विकल्पं चित्वा उत्तरं ददतु ।**

(१) वैदिककर्मानुष्ठानेन कस्य लाभो भवति ?

(क) पृथ्वीमातुः (ख) स्वर्गस्य (ग) आकाशस्य (घ) प्राणस्य

(२) यस्य विश्वासः वेदमार्गे अस्ति सः कीदृशः ?

(क) आस्तिकः (ख) मान्त्रिकः (ग) तान्त्रिकः (घ) नास्तिकः

(३) परमेश्वरस्य ज्ञापको बोधकश्च कः ?

(क) अर्थः (ख) वेदः (ग) साधु (घ) जपः

(४) देशोऽयं वेदसंरक्षणात् किमासीत् ?

(क) गुरुः (ख) सद्गुरुः (ग) जगद्गुरूः (घ) परमगुरूः

(५) वेदकण्ठाग्रं कृत्वा यो तदर्थं न जानाति सः कीदृशः ?

(क) चंचलः (ख) स्थाणुः (ग) पण्डित्ः (घ) सर्वज्ञः

(६) आधुनिकी शिक्षापद्धतिः केन निर्मिता ?

(क) लोर्ड मेकोल (ख) मेकडोनल (ग) ज्योर्ज (घ) स्कटर

(७) वेदोऽखिलो ........................

(क) मूलम् (ख) कर्ममूलम् (ग) धर्ममूलम् (घ) जन्ममूलम्

(८) केन संस्कारेण वेदाध्ययनाधिकारः प्राप्यते ?

(क) उपनयन (ख) विवाहः (ग) चोलः (घ) कर्णवेधः

(९) वेदस्य परम्परा कस्य विद्यते ?

(क) मुनीनाम् (ख) मानवानां (ग) गन्धर्वानां (घ) देवानाम्

(१०) कस्य बहिष्कारः कर्तव्यः ?

(क) अर्चकस्य (ख) वेदनिन्दकस्य (ग) वेदपूजकस्य (घ) शास्त्रस्य

**२. निम्नाङ्कितानां प्रश्नानामेकवाक्येन उत्तराणि ददन्तु ।**

(१) वेदे कस्य प्रवेशः नास्ति ?

(२) वेदाङ्गानि कस्यां शैल्यां निरूपितानि सन्ति ?

(३) ''नास्तिको वेदनिन्दकः'' केनोक्तम् ?

(४) भारतीय-सभ्यतायाः रहस्योद्घाटकाः के ?

(५) यः द्विजः वेदान् पठति सः किं प्राप्नोति ?

(६) भारतीयाः भोगवादं परित्यज्य कस्मिन् विश्वसति ?

(७) भूमिदानादि पुण्यं केनाध्ययनेन प्राप्यते कुत्र लिखितञ्च तत् ?

(८) वेदाङ्गानि कति ? कानि च तानि?

(९) केन निष्कारणो वेदोऽध्येयो ज्ञेयश्च ?

(१०) सनातन-धर्मेण को धर्म उच्यते ?

**३. निम्नाङ्कित-श्लोकानां पूर्तिः विधेया ।**

(१) वेदशास्त्रार्थ ........................ ।

(२) योऽनधीत्य ........................ ।

(३) मानवधर्म ........................ ।

**४. निम्नाङ्कित-शब्दरूपाणां परिचयो देयः ।**

(१) चक्षुषा

(२) सर्वाणि

(३) सनातनेन

(४) प्रमाणे

(५) वेदानाम्

(६) श्रुत्वा

(७) अध्येतारः

(८) धर्मच्युतिः

(९) अनया

(१०) संस्काराः

**५. निम्नधातूनां परिचयो देयः ।**

(१) प्रयतन्ते
(२) अस्ति
(३) उत्पद्यन्ते
(४) वर्तयति
(५) भवेत्
(६) कल्पते
(७) आह
(८) आप्नोति
(९) आचरति
(१०) उच्यते

**६. सन्धिविच्छेदनं कुरुत ।**

(१) योऽवमन्येत
(२) यद्यपि
(३) वेदमार्गेणैव
(४) सोऽपि
(५) बहुभिरुपायैः
(६) पण्डिताश्च
(७) इत्यपि
(८) मतिर्यस्य
(९) यस्येश्वरः
(१०) तदधीतमपि

**७. सन्धिसंयोजनं कुरुत ।**

(१) इह + एव
(२) कुत्र + आश्रमे
(३) वाक्ये + अस्मिन्
(४) पुनः + अपि
(५) वेदः + अध्येयः
(६) स्व + अध्ययनम्
(७) अत्र + अयम् + अभिप्रायः
(८) रहस्य + उद्घाटकाः
(९) त्रिभिः + तावन्तम्
(१०) कल्पः + अथ

**छात्र-प्रवृत्तिः**

- इतिहासपुराणादि-ग्रन्थेषु पठितवैदिक-वार्तानां संकलनं कुर्वन्तु ।

**विशिष्टज्ञानम्**

- इदम् अहम् अनृतात् सत्यम् उपैमि ।

# ३ वैदिकानुशीलनस्येतिहासः

**प्रस्तावना**

वेदः भवति अपौरूषेयः, नित्यः शाश्वतः । परमात्मनः निश्वासभूतो अयं वेदः आद्यन्तरहितः वर्तते । अस्य महत्त्वं प्रतिपादयता आचार्य सायणेनोक्तम् –

**प्रत्येक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।**

**एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता ॥**

जीवनगतः सृष्टेः प्राक् अयं वेदः शब्दब्रह्मरूपेण भासमान–अवस्थायाम् आसीत् । मानवसृष्टेः अनन्तरम् ईश्वर–प्रेरणया मुनयः एतेषां शब्दानां दर्शनं कृतवन्तः । अतः कथ्यते मुनयः मन्त्रद्रष्टारः न तु कर्तारः । दैवी वाक् इत्यस्योत्त्पतिं आदौ देवाः कृतवन्तः इति श्रूयते ऋग्वेदे यथा –

**दैवीं वाचमजनयन्त देवाः ( ऋ. १००-११ )**



अन्तरिक्षलोके उभयोः देवी वाक्, आसुरीवाक् इत्यनयोः उत्त्पतिः अभवत् । परन्तु ऋषयः दैवीवाक् इत्यस्य पृथक्करणं कृतवन्तः । श्रूयते यथा –

**सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ॥ ( ऋ. १० - ७१२ )**

महाभारतस्य शान्ति पर्वणि सप्तानां प्रमुखवेदाचार्याणां नामानि श्रूयन्ते यथा –

**मरीचिरङ्गिरा चात्रिः पुलस्त्यः पुलह क्रतुः ।**

**वशिष्ठ इति सप्तैते मानसा निर्मिता हि वै ॥**

**एते वेदविदो मुख्या वेदाचार्याश्च कल्पिताः ।**

**प्रवृत्तिधर्मिणश्चैव प्राजापत्येन कल्पिताः ॥**

महर्षिव्यासः परवर्तिनां मनुष्याणां नश्यमानां धारणशक्तिम् अवगत्य वेदस्य सुरक्षानिमित्तं शाखाप्रशाखारूपेण विभागीकरणं कृतवान् । वेदार्थबोधाय ब्राह्मणग्रन्थानामपि भाष्यं जातम् । महर्षि-यास्केनामपि निर्वचनज्ञानार्थं निरुक्तस्य रचना कृता। पुनश्च वेदार्थज्ञानाय वेदाङ्गानां प्रातिशाख्यानामपि रचना जाता ।

तथापि वेदमन्त्राणाम् अर्थावबोधाय यदा काठिन्यम् आगतम् तदा वेदानां भाष्यं कर्तुं भाष्यकाराः प्रयत्नशीलाः अभवन् ।

प्रमुखभाष्यकारेषु स्कन्दस्वामी, आनन्दतीर्थः, वेङ्कटमाधवः, सायणः, दयानन्दः, महीधरः, उव्वटः, हलायुधः इत्यादयः भाष्यकाराः सुविदिताः ।

## स्कन्दस्वामी -

वेदभाष्यकारेषु सर्वप्राचीनतमभाष्यकारः स्कन्दस्वामी वर्तते । अस्य महात्मनः जन्म गुर्जरप्रदेशस्य पुराकाले राजधानीरूपेण प्रथिते 'वलभी' इति नगरे अभवत् । अस्य पितुर्नाम भर्तृध्रुवः आसीदिति तस्य भाष्ये एव चर्चा वर्तते। अस्य भाष्यकारस्य कः समयः ? एतस्मिन् प्रश्ने तस्य ऋग्वेदभाष्यग्रन्थे कुत्रापि उल्लेखः न दृश्यते । परन्तु अयं भाष्यकारः शतपथब्राह्मणस्य भाष्यकारस्य हरिस्वामिनः गुरुः आसीत् इति तु स्पष्टमेव दृश्यते तस्य भाष्यग्रन्थे -

**''श्रीस्कन्दस्वाम्यस्ति मे गुरूः'' (शतपथभाष्यम् ५-६-७)**

६३८ ख्रैष्टाब्दे हरिस्वामिना शतपथब्राह्मणस्य भाष्यं कृतम् । अतः अनुमीयते स्कन्दस्वामिनः समयः सप्तमशतकस्य प्रथमार्द्धः आसीत् । पुनश्च स्कन्दस्वामी यास्कस्य निरुक्ते अपि टीकां कृतवान् । निरुक्तस्य टीकाकर्ता ऋग्भाष्यस्य भाष्यकर्ता एक एव स्कन्दस्वामी इति देवराजयज्वा कथयति । स्कन्दस्वामिनः भाष्यं विशदं सुबोधगम्यं च वर्तते । तस्य भाष्ये प्रत्येक सूक्तस्यारम्भे तस्य सूक्तस्य ऋषि-देवता-छन्दसां विषये उल्लेखो वर्तते । तस्य भाष्यम् अतीव सरलं क्लिष्टतारहितं च वर्तते । सायणाचार्यस्य ऋग्वेदभाष्योपरि स्कन्दस्वामिनः भाष्यस्य प्रभावः परिलक्ष्यते । अस्य भाष्यकारस्य भाष्यं चतुर्थाष्टकपर्यन्तमेव समुपलब्धं भवति । शेषार्द्धस्य पूर्तिः आचार्य नारायणेन उद्गीथेन च कृतास्ति इति ज्ञायते वेङ्कटमाधवस्य ऋग्वेदभाष्यानुशीलने यथा -

**स्कन्दस्वामी नारायण उद्गीथ इति ते क्रमात् ।**
**चक्रुः सहैकमृग्भाष्यं पदवाक्यार्थगोचरम् ॥**

## नारायणः-

उपस्थितश्लोकेन स्पष्टं भवति यत् ऋग्भाष्यरचनायां स्कन्दस्वामिना सह नारायणस्य योगदानं वर्तते । 'क्रमात्' इति शब्देन अनुमीयीते यत् ऋग्वेदस्य मध्यभागस्य भाष्यम् आचार्यनारायणेन लिखितम् । अस्य भाष्यकारस्य समयः स्कन्दस्वामिनः समये एव आसीत् ।

## उद्गीथः-

उद्गीथः ऋग्वेदस्यान्तिमभागस्य भाष्यम् कृतवान् । तस्य भाष्ये प्रत्येकाध्यायस्य परिसमाप्तौ स्वपरिचयविषये उल्लेखः कृतः दृश्यते । यथा -

**वनवासिविनिर्गतार्चस्य उद्गीथस्य कृतौ ऋग्वेदभाष्ये ............... अध्याय समाप्तः ।**

प्राचीनकाले कर्णाटकप्रदेशस्य पश्चिमभागः वनवासिप्रान्तनाम्ना ख्यातः आसीत् । आचार्यस्य उद्गीथस्य सम्बद्धः 'वनवासिना' इत्यनेन तेन प्रान्तेन सह आसीत् इति प्रतीयते । उद्गीथस्य नामोल्लेखः आचार्यसायणेन स्वभाष्येकृतः । तस्य भाष्यशैल्यपि स्कन्दस्वामिनः भाष्यशैलीवत् वर्तते ।

## वेंकटमाधवः-

ऋग्वेदस्य प्रथमभाष्यस्यान्तिमे भागे आचार्य वेङ्कटमाधवः स्वकीयं परिचयं प्रदत्तवान् अस्ति । तस्य जन्म कौशिकगोत्रे अभवत् । तस्य पूर्वजाः आंध्रप्रदेशस्थितस्य दक्षिणापथीयचोलदेशे न्यवसन् । अस्य पितुः नाम वेङ्कटाचार्यः इति मातुः

नाम च सुन्दरीदेवी इति । अस्य सङ्कर्षणाख्य: एकोऽनुज: अप्यासीत् 1370-विक्रमाब्दस्य पार्श्ववर्ती देवराजयज्वा स्वकीयभाष्यस्योपोद्‌घाते वेङ्कटमाधवस्य नामोल्लेखं कृतवान् । यथा -

श्रीवेङ्कटाचार्यतनयस्य माधवस्य भाष्यकृतौ नामानुक्रमण्या: पर्यालोचनात् क्रियते इति । अनेन सिद्धं भवति यत् वेङ्कटमाधवस्य समय: देवराजयज्वन: पूर्वमासीत् । आचार्यसायण: ऋग्वेदस्य एकस्य मन्त्रस्य भाष्ये माधवभट्टस्य नामोल्लेखं कृतवान् । अनेन सायणात् पूर्ववर्त्तित्वमपि अस्य सिद्धं भवति । पण्डित: साम्बशिवशास्त्रिमहोदयेन अस्य भाष्यकारस्य समय: 1050 ख्रैष्टाब्दत: 1150 ख्रैष्टाब्दं यावत् इति मन्यते ।

अस्य भाष्यकारस्य भाष्यम् अत्यन्तं संक्षिप्तम् । केवलं मन्त्राणां व्याख्या एव कृतास्ति । 'वर्जयन् शब्दविस्तारं शब्दै:कतिपयै रिति' इत्यनेन कथनेन स्पष्टं भवति । केवलं पर्यायवाचिशब्दानां सन्निवेशेन एव मन्त्राणाम् अर्थान् स्पष्टयितुं माधव: प्रयत्नं कृतवान् । व्याकरणजन्यतथ्यानां स्थानं नास्ति । सर्वत्र ब्राह्मणग्रन्थानां प्रामाण्यं समाविष्टमस्ति । तस्य कथनमस्ति यत् य: ब्राह्मणग्रन्थानामर्थं सम्यग्रूपेण विवेचनं कृतवान् स एव यथार्थवेत्ता भवति । यथा -

**संहितायास्तुरीयांशं विजानन्त्यधुनातना: ।**

**निरुक्तव्याकरणयोरासीत् येषां परिश्रम: ॥**

**अथ ये ब्रह्मणार्थानां विवेक्तार: कृतश्रमा: ।**

**शब्दरीतिं विजानन्ति ते सर्वं कथयन्त्यपि ॥**

### आनन्दतीर्थ:-

द्वैतवादस्य प्रवर्तक: मध्व एव आनन्दतीर्थनाम्ना ज्ञायते । ऋग्वेदस्य प्रथमण्डलस्य चत्वारिंशत् मन्त्राणामुपरि तस्य भाष्यं वर्तते । अस्मिन् प्रसङ्गे राधवेन्द्रस्य: कथनं यथा - ''ऋक्शाखागतैकोत्तरसहस्त्रसूक्तमध्ये'' कानिचित् चत्वारिंशत् सूक्तानि भगवत्पादै: .... व्याख्यातानि । तस्य व्याख्या छन्दोबद्धास्ति । तस्य भाष्ये सर्वत्र नारायणस्य प्रतिपादनं युक्तितरमेव प्रतिभाति ।

द्वैतवादस्योपरि तस्य भाष्यं पर्यवेशितम् । अस्य माध्वभाष्यस्य रचनाकालात् त्रिशद्वर्षाभ्यन्तरे एव तस्य सम्प्रदायस्य प्रमुखाचार्येण जयतीर्थेन तस्य भाष्योपरि टीका कृता ।

अस्य आनन्दतीर्थस्य समय: विक्रमस्य 1355 पर्यन्तं स्वीक्रियते ।

### आत्मानन्द: -

आत्मानन्द: ऋग्वेदस्य अस्यवामीयसूक्तस्य व्याख्यां कृतवान् । तस्य भाष्ये स्कन्दस्वामिन: भास्करस्य च नामोल्लेख: वर्तते परन्तु आचार्यसायणस्य नाम कुत्रापि न दृश्यते । अत: ज्ञायते आत्मानन्द: स्कन्दस्वामिन: भास्काराच्च परवर्ती तथा सायणाचार्यस्य पूर्ववर्ती आसीत् । तस्य भाष्ये मिताक्षराया: कर्तु: विज्ञानेश्वरस्य तथा स्मृतिचन्द्रिकाया: रचयितु: त्रयोदशशतकवर्तिन: देवणभट्टस्य नामोल्लेखेन प्रतीयते यत् चतुर्दशशतकमस्य समय: स्यात् । तस्य भाष्यमध्यात्म-परकमिति स्वयमेव लिखितम् -

''अधियज्ञविषयं स्कन्दादिभाष्यम् । निरुक्तमधिदैवतविषयम् इदन्तु भाष्यमध्यात्मविषयमिति । न च भिन्नविषयाणां विरोध: अस्य भाष्यमूलं विष्णुधर्मोत्तरम्'' इति । अयम् अद्वैतवादी आचार्य: स्वशास्त्रे निष्णात आसीत् ।

### सायणाचार्य:-

वेदभाष्यकारेषु सायणस्य स्थानं सर्वोपरि विद्यते । स: विजयनगर संस्थापकमहाराजबुक्कस्य प्रधानामात्यपदे 1364 तमख्रीष्टाब्दत: 1378 तमख्रीष्टाब्दपर्यन्तमासीत् । तदनन्तरं 1378 तमख्रीष्टाब्दत: 1387 तमख्रीष्टाब्दपर्यन्तं महाराजहरिहरस्य अमात्यपदं मृत्युपर्यन्तं समलङ्कृतम् । वेदानुरुक्तविजयनगरस्य बुक्कमहीपति: सर्वेषां वेदानां सम्यक् अर्थज्ञानस्य भाष्यं प्रकाशयितुं स्वमन्त्रिणं सायणाचार्यम् आदिशत् । पुनश्च श्रूयते निजज्येष्ठभ्रातामाधवाचार्येण प्रेरितो भूत्वा व्याख्याकार्ये अस्मिन् असौ प्रवृत्त: अभूत् । तेन भाष्यमिदं माधवीयनाम्ना ज्ञायते । यथा -

**यत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः ।**

**आदिशन् माधवाचार्यं वेदार्थस्य प्रकाशने ॥**

विजयनगरस्य अधिपतिः बुक्कमहीपतिः भाष्यं प्रकाशयितुं माधवाचार्यम् आदिशत् । परन्तु सः कार्यान्तरव्यस्तताहेतोः स्वकनिष्ठभ्रातरं भाष्यं कर्तुं नियोजितवान् । अतः आचार्यसायणः बहुश्रमे भाष्यम् अरचयत् । परन्तु तस्य शैली प्राक्तनी एव आसीत् । यद् यद् ब्राह्मणग्रन्थेषु विधिमुखेन यत् च श्रौतसूत्रैः उपविग्रणं कृतमस्ति तत्साहाय्येन निरुक्तस्य साहाय्येन व्याकरणस्य च साहाय्येन च वेदस्य भाष्यमरचयत् तस्य भाष्यं यज्ञपरकं वर्तते तत् प्रणीता भाष्यग्रन्था: यथा – तैतिरीयसंहिताभाष्यम् (कृष्णयजुर्वेदः) ऋग्वेदसंहिताभाष्यम्, सामवेदसंहिताभाष्यम्, काव्यसंहिताभाष्यम् , (शुक्लयजुर्वेदस्य), अथर्ववेदसंहिताभाष्यम्, तैतिरीयब्राह्मणभाष्यम्, ऐतरेयब्राह्मणभाष्यम्, ऐतरेयाख्यकभाष्यम्, ताण्ड्यब्राह्मणम्, षड्विंशब्राह्मणम्, सामविधानब्राह्मणम्, आर्षेयब्राह्मणम्, देवताध्यायब्राह्मणम्, उपनिषद्ब्राह्मणम्, संहितोपनिषब्राह्मणम्, वंशब्राह्मणम् शतपथब्राह्मणम् अनेन प्रकारेण आचार्यसायणः पञ्चसंहितानामुपरि भाष्याणि तथा त्रयोदशब्राह्मणाख्यकानामुपरि व्याख्यां कृतवान् । विपुलकायस्य शतपथब्राह्मणस्य व्याख्या आचार्यसायणेन सम्यक्तया कृता । अद्यत्वे वेदभाष्यस्य ये विद्वांसः सन्ति, तेषां कृते सायणभाष्यं दीपवत् वर्तते । केचिद् यद्यपि आक्षेपं कुर्वान्ति तथापि भाष्यावसरे सायणमेव शरणम् इति अनुभवन्ति। सायाणाचार्यस्य वेदभाष्यनिर्माणप्रंशंसां विद्वांसः एवं रूपेण कथयन्ति ।

**''वेदानां पुण्यप्रकर्ष एव मूर्त्तो भूत्वा सायणात्मना प्रकटीभूतः'' इति ।**

सायणस्य जन्म भारद्वाजगोत्रे ब्राह्मणकुले अभूत् । अस्य मातुर्नाम सतीदेवी पितुश्च मायण इत्यासीत् । विख्यातो दार्शनिकः श्रीमान् माधवाचार्यः ज्येष्ठभ्राता । प्रसिद्धकवि भोगनाथः कनिष्ठभ्राता चेति ज्ञायते । अयं सायणाचार्यः तैतिरीयशाखाध्यायी आन्ध्रब्राह्मणः आसीत् । पुनश्च यजुर्वेदस्य यज्ञप्राधान्यत्वात् ऋग्वेदस्य अभ्यर्हितत्वेऽपि यजुर्वेदस्य भाष्यम् आदौ अलिखत् । यथा –

**''आध्यर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुराः ।**

**यजुर्वेदोऽथ होत्रार्थमृग्वेदो व्याकरिष्यते ॥'' इति ॥**

सायणाचार्यस्य अपरं नाम 'विद्यारण्यस्वामी' इत्यासीत् । यद्यपि सायणविरचितम् ऋक्संहिताभाष्यं तथा अन्यानि कानिचित् भाष्यानि 'माधवीयम्' इति नाम्ना एव ख्यातानि सन्ति । अतः केचन भाष्यम् इदं माधवाचार्येण विरचितम् इति स्वमतस्य पुष्टिं कुर्वन्ति । परन्तु सायाणाचार्यस्य ग्रन्थानां पर्यालोचनेन ज्ञातं भवति यत् आलोचकानां कथनमिदं भ्रमात्मकम् इति।

आचार्यसायणः एव रचयिता एषां भाष्याणाम् । अतः ''माधवीयम्'' इति नाम्ना माधवस्य ग्रन्थकर्तृत्वेन न कश्चिदपि सम्बन्धः विद्यते । सायणेन भाष्यकृता स्वग्रन्थे 'वेदार्थप्रकाशनाम्ना' अभिहितः । तस्य सर्वे ग्रन्था: श्रद्धया स्वगुरवे विद्यातीर्थाय समर्पिताः । तस्य परिचयविषये एकत्र श्रूयते । यथा –

**सैनापत्यं च राज्यं च दण्डनेतृत्वमेव च ।**

**सूर्यलोकाधिपत्यं च वेदभाष्यविदर्हति ॥ इति ॥**

**माधवः-**

सामवेदस्य प्रथमभाष्यकाररूपेण माधवोऽयं प्रतीतो भवति । सामवेदस्य उभयोः खण्डयोरुपरि भाष्यं कृतवान् । तस्य भाष्यग्रन्थस्य नाम 'विवरणम्' इत्यस्ति । तत्र छन्द आर्चिकभाष्यस्य नाम 'छन्दसिकविवरणम्' तथा उत्तरार्चिकभाष्यस्य नाम 'उत्तराविवरणम्' इति । अद्यावधि भाष्यमिदम् अमुद्रितावस्थायाम् एवास्ति ।

अस्य पितुर्नाम 'नारायणः' । माधवस्य समयः सप्तमशताब्द्याम् आसीत् । एषः बाणभट्टस्य पूर्ववर्ती आसीत् । अस्य भाष्यम् अतीव महत्वपूर्णं विद्यते ।

**भरतस्वामी:-**

भरतस्वामी सामवेदस्योपरि भाष्यं कृतवान् । इदमपि अद्यावधि अप्रकाशित वर्तते । अस्य जन्म काश्यपगोत्रे अभवत्। अस्य पितु: नाम नारायण: तथा मातु: नाम यज्ञदादेवी इति ।

स: स्वकीयभाष्यग्रन्थस्यारम्भे स्ववंशपरिचयविषये लिखितवान् । यथा -

**नत्वा नारायणं तातं तत्प्रसादादवाप्तधी: ।**

**साम्नां श्रीभरस्वामी काश्यपो व्याकरोदृचम् ॥**

**होसलाधीश्वरे पृथ्वीं रामनाथे प्रशासति ।**

**व्याख्या कृतेयं क्षेमेण श्रीरंगे वसता मया ॥**

उपरोक्तकथनेन ज्ञातं भवति, होसलीश्वरस्य रामनाथ-नृपस्य शासनावसानकाल: 1285 ईस्वीये वर्तते । अत: अस्यैव पार्श्ववर्ती भरतस्वामिनोऽपि भाष्यस्य रचनाकाल: स्यात् ।

अस्य भाष्यमतीव सङ्क्षिप्तमस्ति । सामब्राह्मणस्योपरि अपि अस्य भाष्यमस्ति । सामवेदस्य सर्वासाम् ऋचामुपरि तस्य व्याख्या लिखिता इति स्वयं प्रकाशयति, यथा -

**इत्थं श्रीभरतस्वामी काश्यपो यज्ञदासुत:**

**नारायणार्यतनयोऽव्याख्यात् साम्नामृचोऽखिला: ॥**

**गुणविष्णु:-**

अयं महापुरुष: बङ्गप्रदेशस्य वा कस्मिंश्चिद् अपि भागे न्यवसत्। तस्य 'छान्दोग्यमन्त्रभाष्यम्' कौथुमिशाखाया: उपरि वर्तते । ग्रन्थ: अयं सुविख्यात: वर्तते । अस्य ग्रन्थस्य संस्करणं 'कलकत्तासंस्कृतपरिषद्' इत्याख्यसंस्थात: प्रकाशितं वर्तते । अस्य भाष्यस्योपरि सायणस्य प्रभाव: दृश्यते । वल्लालसेनस्य अथवा तस्य पुत्रस्य लक्षणसेनस्य शासनसमये तस्य समय: इति ज्ञायते । अत: विक्रमस्य द्वादशशतकस्य अन्तिमभाग: अथवा त्रयोदशशतकस्य आद्यभाग: तस्य समय: इति निश्चेतुं शक्यते । मन्त्रब्राह्मणभाष्यम् पारस्करगृह्यसूत्रभाष्यञ्चेति अन्यौ द्वौ भाष्यग्रन्थौ स्त: ।

**उव्वट:-**

वज्रटस्य पुत्र उव्वट: काश्मीरीय: विद्वान् आसीत् । परन्तु अवन्त्यां भोजराजशासनकाले स्थित्वा भाष्याणां प्रणयनं कृतवान् । पुनश्च गुर्जरदेशप्रसिद्धे 'आनन्दपुरे' वसता तेन भाष्यं कृतम् इति अपर उल्लेख: दृश्यते । परन्तु भोजराजसमकालिक: उव्वट: इति तस्यभाष्यस्य अन्तभागे लिखितमस्ति । यथा -

**आनन्दपुरवास्तव्यवज्रटाव्यस्य सूनुना**

**मन्त्रभाष्यमिदं क्लृप्तं भोजे पृथ्वीं प्रशासति ॥ इति ॥**

भोजराजस्य समय: 1018 तमख्रीष्टाब्दत: 1063 तमख्रीष्टाब्दं यावद् वर्तते । अत: ख्रीष्टीयैकादशशतकस्य पूर्वार्द्धभागे अस्य समय: स्यादिति निश्चीयते ।

अस्य भाष्यस्य नाम 'उव्वटभाष्यम्' । यजुर्वेदस्य माध्यन्दिनशाखा उपरिभाष्यमिदं वर्तते । अस्य भाष्यं सरलं सङ्क्षिप्तं प्रमाणितञ्च वर्तते । अस्य भाष्ये अनेकेषु स्थलेषु अध्यात्मपरक: अर्थ: दर्शित: अस्ति । शुक्लयजुर्वेदभाष्य- व्यतिरेके अन्ये चत्वारो ग्रन्था: ऋक्प्रातिशाख्यस्य टीका, यजु: प्रातिशाख्यस्य टीका, ऋक्सर्वानुक्रमणीभाष्यम्, ईशावास्पोपनिषद्-भाष्यञ्चेति प्रसिद्धा: सन्ति । सुधासागरकारस्य भीमसेनस्य उव्वट: मम्मटस्य कनिष्ठ: भ्राता आसीत् ।

**महीधर:-**

शुक्लयजुर्वेदस्य माध्यन्दिनसंहिताया: भाष्यं सरलभाषया आचार्यमहिधरेण कृतम् । अयमाचार्य: वाराणसी निवासी

नागरब्राह्मणः प्रसिद्धकर्मकाण्डी श्रौतयज्ञमर्मज्ञश्च आसीत् । अस्य मातुर्नाम लक्ष्मी, पितुर्नाम नृसिंहगणेश इति ज्ञायते । अस्मिन् विषये तस्य भाष्ये उल्लेखः वर्तते 'प्रणम्य लक्ष्मीं नृहरिं गणेशम्' इति एषः तन्त्रशास्त्रस्यापि विद्वान् आसीत् ।

अस्याविर्भावकालः षोडशशतकस्योत्तरार्द्धे इति ज्ञायते । अतः महानुभावोऽयम् उव्वटाचार्यात् पञ्चाशद्वर्षानन्तरम् अभवत्। महीधरेण अन्येऽपि ग्रन्थाः रचिताः, यथा कात्यायनशुल्बसूत्रभाष्यम्, मन्त्रमहार्णवः, तन्त्रसुधानिधिः इत्यादयः । अयञ्च प्रतिभावान् विद्वान् आसीत् ।

## हलायुधः-

शुक्लयजुर्वेदस्य काण्वसंहिताया उपरि अस्य भाष्यं वर्तते । अस्य भाष्यस्य नाम 'ब्राह्मणसर्वस्वम्' इति । भाष्यारम्भे हलायुधेन स्वविषये लिखितम् । येन स्पष्टं भवति, बङ्गप्रदेशस्य अन्तिमहिन्द्रनृपतेः लक्ष्मणसेनस्य व्यवहारमण्डपे धर्माधिकारिणः पदे नियुक्त आसीत् । यथा -

**''बाल्ये ख्यापितराजपण्डितपदं श्वेतार्चिबिम्बोज्ज्वल**

**च्छत्रोत्सिकंतमहास्तमुपदं दत्त्वा नवे यौवने ।**

**यस्मै यौवनशेषयोग्यमखिलक्ष्मापालनारायणः**

**श्रीमान् लक्षणसेनदेवनृपतिधर्माधिकारं ददौ ॥''**

लक्षणसेनस्य समयः 1170 त 1200 ईस्वीयपर्यन्तं विद्यते । अतः हलायुधः अपि अस्मिन् समये एव आसीत्। ब्राह्मणसर्वस्वव्यतिरेकेऽपि अस्य मीमांसासर्वस्व - वैष्णवसर्वस्य शैवसर्वस्वरहितं पण्डितसर्वस्वादयः पञ्च ग्रन्थाः प्रसिद्धाः आसन् ।

## महर्षिदयानन्दः-

अस्य महात्मनः जन्म गुजरातप्रान्तान्तर्गत टङ्कारानगरे 1824 तमे ईस्वीयाब्दे अभवत् । अस्य पितुर्नाम् कर्षणजीतिवारी तथा मातुर्नाम रुक्मिणी आसीत् ।

तस्य भाष्यं ब्रह्मपरकम् अस्ति । निरुक्तमाश्रित्य वेदभाष्यं कृतवान् ।

ऋग्वेदस्य भाष्यं तथा यजुर्वेदस्य भाष्यं तस्य महत्वपूर्णे भाष्ये स्तः । ऋग्वेदादिभाष्यभूमिका, सत्यार्थप्रकाशः संस्कारविधिः, गोकरुणानिधिः, व्यवहारभानुः, आर्याभिनयप्रभृतयः कृतयः विश्ववाङ्मये सुप्रतिष्ठिताः सन्ति । सः क्रान्तदर्शी निर्भीकः, धर्मपरायणः, गवां रक्षकः, मूर्तिपूजाऽवतारवादादिविरोधकर्ता, आर्यसमाजस्य प्रतिष्ठापकः सिद्धपुरुषः च आसीत्।

अन्ये केचन आचार्याः येषां योगदानं भाष्यकारणे विद्यते; तेषु भवस्वामी, गुरुदेवः, कुण्डिनः, आचार्यक्षुरः भट्टभास्करः, अनन्ताचार्य धनुष्कयज्वा इत्यादयः अन्यतमाः सन्ति ।

### शब्दार्थाः

**वाक्** - वाणी, **प्रतीयते** - ज्ञातं भवति, **प्राक्तनः** - प्राचीनः, **उपविघ्रणम्** - प्रतिपादनम्, **प्रकटीकृतः** - आविर्भूतः, **समलङ्कृतम्** - विराजमानम्, **मर्मज्ञः** - विज्ञाता, **आक्षेपः** - समालोचनम् ॥

### स्वाध्यायः

**१. निम्नाङ्कित प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) मुनयः मन्त्र ...................... ।

(क) कर्तारः (ख) वक्तारः (ग) द्रष्टारः (घ) धर्तारः

(२) महाभारतस्य कस्मिन् पर्वणि प्रमुखवेदाचार्याणां नामानि श्रूयन्ते ?

(क) सभा (ख) वन (ग) शान्ति (घ) युद्ध

(३) केन वेदस्य रक्षणार्थं विभागम् अक्रियत ?

(क) व्यासेन (ख) गौतमेन (ग) भारद्वाजेन (घ) इन्द्रेण

(४) कस्मिन् लोके उभयोः वाचोः उत्पत्तिः अभवत् ?

(क) द्यवि (ख) अन्तरिक्षे (ग) पृथिव्यां (घ) स्वर्गे

(५) महर्षि-यास्केन कस्य रचना कृता ?

(क) निरुक्तस्य (ख) कल्पस्य (ग) वेदस्य (घ) स्मृतेः

(६) वेदभाष्यकारेषु सर्वप्राचीनतमभाष्यकारः कः वर्तते ?

(क) स्कन्दस्वामी (ख) आनन्दतीर्थः (ग) उव्वटः (घ) महीधरः

(७) कस्मिन् खैष्टाब्दे हरिस्वामिना शतपथब्राह्मणस्य भाष्यं कृतम् ?

(क) ६३८ (ख) ६३३ (ग) ६२९ (घ) २९०

(८) आचार्य-वैङ्कटमाधवस्य जन्म कस्मिन् गोत्रे अभवत् ?

(क) गौतमगोत्रे (ख) अङ्गिरागोत्रे (ग) कौशिकगोत्रे (घ) भृगुगोत्रे

(९) भरतस्वामिना कस्य वेदस्योपरि भाष्यं कृतम् ?

(क) ऋग्वेदः (ख) साम (ग) यजुः (घ) धनुर्वेदः

(१०) वज्रटस्य पुत्रः कः ?

(क) उव्वटः (ख) महिधरः (ग) रुद्र (घ) मम्मटः

**२. निम्नाङ्कितानां प्रश्नानामेकवाक्येनोत्तरं लिखन्तु ।**

(१) हलायुधस्य भाष्यस्य नाम किमस्ति ?

(२) महर्षिदयानन्दस्य जन्म कस्मिन् नगरे अभवत् ?

(३) महीधरस्य मातुर्नाम किमस्ति ?

(४) गुणविष्णोः कौ द्वौ भाष्यग्रन्थौ स्तः ?

(५) सामवेदस्य प्रथमभाष्यकारः कः ?

(६) विजयनगरस्य अधिपतिः कः आसीत् ?

(७) आत्मानन्देन कस्य सूक्तस्य व्याख्या कृता ?

(८) ऋग्वेदस्यान्तिमभागस्य भाष्यं केन कृतम् ?

(९) प्रमुखभाष्यकाराणां नामानि लिखन्तु ?

(१०) वेदः कीदृशः ?

**३. निम्नाङ्कित-श्लोकानां पूर्तिः विधेया ।**

(१) प्रत्यक्षेणा ......................... ।

(२) यत्कटाक्षेण ......................... ।

(३) आनन्दपुर ......................... ।

**४. निम्नाङ्कित शब्दरूपाणां परिचयो देयः ।**

(१) तस्य
(२) विष्णोः
(३) भाष्ये
(४) उव्वटेन
(५) कर्तारः
(६) मन्त्रेषु
(७) ग्रन्थौ
(८) तेन
(९) सर्वाः
(१०) वेदः

**५. निम्नधातूनां परिचयो देयः ।**

(१) वर्तेते
(२) अभवत्
(३) आसीत्
(४) ज्ञायते
(५) सन्ति
(६) स्तः
(७) आसन्
(८) भवन्ति
(९) कुर्वन्ति
(१०) वद

**६. सन्धिविच्छेदनं कुरुत ।**

(१) वेदाचार्यः
(२) महीधरोव्वटः
(३) भागेऽस्मिन्
(४) पृथक्करणम्
(५) आद्यन्तौ
(६) सक्तुमिव
(७) इत्यनयोः
(८) महर्षिः
(९) सप्तैते
(१०) धर्मिणश्चैव

**७. सन्धिसंयोजनं कुरुत ।**

(१) स्पष्टम् + एव
(२) सह + एक
(३) प्रत्येक + अध्यायस्य
(४) एकः + अनुजः
(५) अनेन + अयम्
(६) ब्रह्म + ऋषिः
(७) एक + एव
(८) उत् + लिखितम्
(९) शैली + अपि
(१०) खैष्ट + अब्दे

**छात्र-प्रवृत्तिः**

- छात्राः वैदिकभाष्यानामध्ययनं कृत्वा पृथक् पृथक् भाष्यानां वैशिष्ट्यं ज्ञातुं प्रयतेरन् ।

**विशिष्टज्ञानम्**

- सविता श्रपयतुवर्षिष्ठेधिनाके ।

# ४ वेदाङ्गानि

**प्रस्तावना**

वेदस्य अङ्गानि वेदाङ्गानि । अङ्गशब्दः उपकारार्थे प्रयुक्तः । अङ्गायन्ते ज्ञायन्ते एभिरिति अङ्गानि । मनुष्यस्य शरीरे यथा बहूनि अङ्गानि तदुपकाराय भवन्ति तथैव भगवतो वेदस्य षड् अङ्गानि भवन्ति । अङ्गमुपकाराय प्रवर्तते। परन्तु एभिः अङ्गैः वेदस्य कः उपकारो जायते इति चेत् ? वेदः अस्य ब्रह्माण्डस्य प्रथमो ग्रन्थः तस्मादेव ज्ञानस्याविर्भावम् इति अस्माभिः ज्ञायते वेद एकः ग्रन्थ-विशेषो नास्ति अपितु ज्ञानराशिः अस्ति । अतः निगूढ-तत्त्वस्य सम्यक् प्रतिपादनाय उच्चारणादिज्ञानाय षडङ्गानि कल्पितानि ।

मुण्डोकोपनिषदि द्वे विद्ये प्रोक्ते परा अपरा च । परा-विद्यायाम् उपनिषदां ग्रहणम्। अपराविद्यायाः अनेके विभागाः निर्दिष्टाः -

**तत्रापरा ऋग्वेदोयजुर्वेदः सामवेदः अथर्ववेदः शिक्षाकल्पे ।**

**व्याकरणं निरुक्तं छन्दो ज्योतिषम् ( 11.5 मुण्डकोपनिषद् )**

---

उपरि चतुर्ण्णां वेदानां नामानि परिगीतानि तथा तैः सह षड् अङ्गानां नामान्यपि पठ्यन्ते । यथा अङ्गैः रहितः पुरुषः सर्वथा कार्यव्यवहारे अनुपयुक्तः तथैव अङ्गानामभावे वेदः प्रयोजनशून्यो जायते । अङ्गं पदार्थं वस्तुजातं ज्ञापयति बोधयति तस्य वास्तविकीं सत्तां लोके दृढयति । अङ्गं विना परिचयः अपि पदार्थस्य दुर्लभः असम्भवश्चेति । अत एव वेदस्येमानि अङ्गानि वेदं पुष्णन्ति साहाय्यं कुर्वन्ति तस्य उपयोगं वेदयन्ति महत्वं जनयन्ति किं बहुना ? वेदस्य सर्वतोभावेन वेदत्वं निरुपयन्ति । अत एव षडङ्गानि महत्वाभिधायकानि सन्ति ।

वेदस्य अध्ययनपरम्परापि प्राचीनतमा विद्यते । एकैकस्य मन्त्रस्य, पदस्य स्वरस्य च प्रथमं गुरुः उच्चारयति तदनु शिष्याः गुरुणा सह उच्चारयन्ति । यथा गुरुणा उच्चारितः तथैव शिष्यैः उच्चार्यते अहो धन्येयं परम्परा ।

तस्मात् अनादिकालात् वेदस्य प्राकृतिक-स्वरूपम् अबाधितं वर्तते न पाठभेदः न च स्वरभेदः ।

वेदाङ्गानां सम्बन्धे इतिहासकाराणां पृथक् चिन्तनं दृश्यते । तेषां मते अङ्गानां द्वितीय कालः अस्ति । उत्तरवैदिककालनाम्ना अस्य कालस्य गणना भवति अस्मिन् उत्तरवैदिक-काले षडङ्गानां निरूपणम् अभवत् ।

**तानि अङ्गानि सन्ति -**

शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्यौतिषं, षण्णां वेदाङ्गत्वेन शास्त्रे प्रसिद्धिः श्रूयते । पाणिनीय-शिक्षायां रूपकमाध्यमेन अङ्गानां स्वातन्त्रमभिधानं दृश्यते ।

**छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथपठ्यते ।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।**

**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ।।**

अस्यायमर्थः भगवतो वेदस्य छन्दःशास्त्रं पादस्थानीयं वर्तते, कल्पः हस्तस्थानीयः, ज्योतिषं नेत्रस्थानीयं, निरुक्तं श्रोत्र- स्थानीयं, शिक्षा नासिका-स्थानीया तथा व्याकरणं मुख-स्थानीयं विद्यते ।

अतः अङ्गैःसह वेदमधीत्य स्वर्गलोके महीयते । वेदाङ्गानि समस्तानि सूत्रशैल्यां निरूपितानि । अस्य अपवादरूपं शिक्षाशास्त्रमस्ति । शिक्षाग्रन्थे कारिकाः विद्यन्ते, यदि प्रातिशाख्यस्य शिक्षाङ्गे गृहणं भवेत् तर्हि सम्पूर्ण-प्रातिशाख्यं सूत्रशैल्यामुपन्यस्तम् । इदानीं समेषाम् अङ्गानां पृथक् चित्रणं क्रियते ।

**शिक्षाः-**

''स्वरवर्णाद्युच्चारण-प्रकारो यत्र शिक्ष्यते सा शिक्षा'' इति शिक्षा शब्दस्य व्युत्पत्तिलभ्योऽर्थः किमनया व्युत्पत्या शिक्षायाः सम्पूर्णरूपमायाति ? नैव इति वक्तुं शक्यते । यतो हि शिक्षाग्रन्थेन न केवलम् उच्चारण-प्रकारःज्ञायते प्रत्युत हस्त-सञ्चालन-आदि-नियमः अपि पठ्यते । अत्र वेदाङ्गशिक्षायाः विचारः प्रस्फुटितः । वेदस्य यावत्यः शिक्षाः विद्यन्ते तासु सर्वासु हस्त-सञ्चालनविधिः प्रामुख्येन निरूपितः, तस्मात् शिक्षा इत्युच्यते -

शिक्षा नाम यथा मन्त्राणां पदवर्णमात्रास्वरादि-ज्ञानेन सह सञ्चालन विधिः वर्णोच्चारणः-विधिः परिज्ञानपूर्वकं स्थानादि-परिचयश्च जायते । शिक्षा वेदस्य प्रथमाङ्गं विद्यते । अस्य प्राथम्यं केन सिध्यति ? श्रुतेः प्रमाणात् । मुण्डकोपनिषदि अपराविद्यायाः प्रतिपादनकाले शिक्षाङ्गं प्रथममुपन्यस्तम् । तस्मात् अस्य महत्त्वम् अधिकं वर्तते ।

तैत्तिरीयोपनिषदि शिक्षायां स्वरूपं परिगीतम् ।

''**अथ शिक्षां व्याख्यास्यामः । वर्णः स्वरः मात्रा बलं सामसन्तान इत्युक्तः शिक्षाध्यायः**'' (तै 003)

अयमर्थः वर्णादिषड्विषयाणां शिक्षाशास्त्रेऽध्ययनं भवति । इदानीं षण्णां वर्णादीनां पृथक् परिचयः दीयते ।

**वर्णः-**

अकारादिः वर्णः विद्यते । वेदार्थज्ञानाय वर्णज्ञानम् आवश्यकम् । पाणिनीय शिक्षायां त्रिषष्टिः चतुःषष्टिः वा वर्णाः कथिताः यथा त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः ।

येषु एकविंशतिः स्वराः, पञ्चविशंतिः स्पर्शवर्णाः, अष्टौ यादयः, (यकारादयः) चत्वारो यमाः, अनुस्वारः, विसर्गः, जिह्वामूलीयः, उपध्मानीयः, द्वयोः स्वरयोः मध्ये लृकारः सहितः त्रिषष्टिः वर्णाः यदि प्लुत-लृकारस्य गृहणं भवेत् तर्हि चतुःपष्टि वर्णाः भवन्ति । पाणिनीय-शिक्षायाम् -

**''स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ।**
**यादयश्च स्मृताह्यष्टौ चत्वारश्च यमाःस्मृताः ॥**
**अनुस्वारो विसर्गश्च ॅकॅपौ चापि पराश्रितौ ।**
**दुःस्पृष्टश्चेति विज्ञेयो लृकारः प्लुत एव च ॥''**

(पाणिनीयाशिक्षा 4, 5)

**स्वरः-** उदात्तादयः त्रयः स्वराः । उदात्तः,अनुदात्तः स्वरितश्चेति उक्तञ्च याज्ञवल्क्येन -

''**अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः ।**''

**उदात्तश्चानुदात्तश्च स्वरितश्च तथैव तत् । [ स्वरास्त्रयः ]**

त्रैस्वर्याणां पाणिनिना सूत्राणि उपदिष्टानि -

(1) उच्चैरुदात्तः

(2) नीचैरनुदात्तः

(3) समाहारः स्वरितः

वेदे स्वराणां वैशिष्ट्यं भवति । स्वराधीनः वेदार्थो भवति ।

स्वराधीनः वेदार्थो भवति इति पूर्वाचार्यैः व्यवस्थितः स्वरभेदात् अर्थः भिद्यते तथा पाठकस्य यजमानस्य कामं हन्ति। यस्मै प्रयोजनाय यः शब्दः उच्चारितः तदर्थ-सम्पादने निष्फलः स भवति ।

स्वरादि-हीनो मन्त्रः विवक्षितमर्थं न ब्रूते । परन्तु विवक्षितमर्थमसम्पाद्य स शब्दः विनष्टोऽपि भवति प्रत्युत स

शब्दः वज्ररूपो भूत्वा यजमानं नाशयति । अत्र कर्मकाण्डादौ द्विधा हानिः स्वरादि-हीनं मन्त्रं नाभिलषितं कार्यं सम्पादयति न च कार्यं विनैव व्यर्थो जायते अपितु नवीनमनिष्टं कल्पयति स मन्त्रः वज्ररूपो भूत्वा यजमानस्य सर्वस्वं विनाशयति उक्तञ्च -

**''मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह ।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्र-शत्रुः स्वरतोऽपराधात् ॥'' [ पाणिनीयशिक्षा ]**

मात्रा- एकस्य स्वरस्योच्चारणे यावान् कालःउपयुज्यते सा मात्रा भवति । ह्स्व-दीर्घ-प्लुत-आदिभेदेन मात्राः तिस्त्रः भवन्ति । हुस्वस्य एका मात्रा, दीर्घस्य द्वे मात्रे, प्लुतस्य तिस्त्रः मात्राः भवन्ति ।

उक्तञ्च -

**एकमात्रो भवेत् ह्रस्वो द्विमात्रो दीर्घ उच्यते ।**

**त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्ध मात्रिकम् । [ याज्ञवल्क्यशिक्षा 1-16 ]**

इमाः मात्राः स्वराणां कालनियामिकाः भवन्ति उक्तञ्च -

**''ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि'' [ पा.शि.11 ]**

बलम् - स्थानप्रयत्नौ । वर्णानामुच्चारणकाले ध्वनियंत्रे (आभ्यन्तरे बाह्ये च) वायुः यानि स्थानानि स्पृशन् बहिरागच्छति तानि स्थानानि भवन्ति इमानि अष्टौ स्थानानि सन्ति -

हृदयम्, कण्ठः, शिरः, जिह्वामूलम्, दंतः, नासिका, ओष्ठम्, तालु । यथा चाह -

**अष्टौ स्थानानि वर्णानामुरः कण्ठःशिरस्तथा ।**

**जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च ॥**

प्रयत्नः द्विधा बाह्याभ्यन्तरश्च ।

बाह्यःएकादशः-विवार - संवार - श्वास - नाद - घोष - अघोष- अल्पप्राण - महाप्राण - उदात्त - अनुदात्त - स्वरिताश्च ।

आभ्यन्तरः पञ्चधा - स्पृष्ट - ईषत्स्पृष्ट, ईषद्विवृत विवृत - संवृताश्च । साम - साम साम्यमुक्तम् । अतिद्रुतातिविलम्बितमित्यादिदोषराहितत्येन माधुर्यादिगुण-युक्तत्त्वेनोच्चारणं साम्यम् उच्चारण-काले पाठकस्य अनेके दोषाः सम्भवन्ति येषां ज्ञानमावश्यकम् । शिक्षाग्रन्थेषु पाठकस्य गुणदोषाणां विशेषणं विवरणं उपलभ्यते ॥ गुणाः दाषाश्चक कथिताः याज्ञवल्क्य शिक्षायाम्

**माधुर्यमक्षरव्यक्तिः पदच्छेदस्तु सुस्वरः ।**

**धैर्यं लय समर्थं च षडेते पाठके गुणाः ।**

**गीती शीघ्री शिरःकम्पी तथा लिखितपाठकः ।**

**अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः ॥ [ याज्ञ. शि. 82, 83 ]**

## संहिताः-

संहिता व्याकरणशास्त्रे सूत्रितम् **परः सन्निकर्षः संहिता** । अन्यत्र **वर्णानामेकप्राण योगः संहिता** । पदप्रकृतिः संहिता यथा वायो + आयाहि इति ।

द्वे पदे भवतः संहितापाठे ''वायवाहि'' इति पाठः क्रियते अत्र एव 'अव' आदेशः तत्रैव इन्द्राग्नी आगतमित्यत्र प्रकृतिभावः । परन्तु प्रामुख्येन संधिः व्याकरणस्य विषयः विद्यते । वेदाभ्यासे उपर्युक्तानां विषयाणां याथातथ्येन ज्ञानमावश्यकम् । अन्यथा पदे पदे पाठभ्रष्टो भवेत् तथा अनिष्टं च कल्पयेत् ।

**कल्पः-**

वेदस्य षडङ्गानि सर्वत्र प्रसिद्धानि । षट्सु कल्पः वेदस्य हस्तौ विद्यते । कल्प-शब्दस्य शाब्दिकः अर्थः ''विधिः'' भवति । कल्पः सूत्रशैल्यां प्रवर्तितः चतुर्षु भागेषु विभक्तः श्रौतादि-यागानां व्यवस्थापक भागः ।

**चत्वारो विभागाः**- श्रौतसूत्रम्, गृह्यसूत्रम्, धर्मसूत्रम् शुल्बसूत्रञ्च, कल्पस्य परचियं प्रतिपादयन् शास्त्र-दीपिकायाः टीकाकारः सोमनाथ मयूखमालिका व्याख्यानं लिखति -

**अन्यत्रापि उक्तम्** - कल्पो वेदविहितानां कर्मणाम् आनुपूर्व्येण कल्पना शास्त्रम् ।

## तन्त्रवार्तिके भट्टकुमारिलपादाः-

येन सिद्धप्रयोगस्य ज्ञानं क्रियते सः कल्पः । सिद्धप्रयोगस्य अवगमना कल्पः अनुष्ठानसाधको भवति । सूत्रेषु प्रयोगानां सूचना (चर्चा) भवति तथा कल्पेषु प्रयोगाः कल्प्यन्ते । कल्पः पाठसिद्धः स्मर्यते यथा अध्ययन-वेलायाम् अधीयते तथैवानुष्ठीयते यथा चाहः-

**सिद्धरूपः प्रयोगो यैः कर्मणामनुगम्यते ।**

**तत्कल्पलक्षणार्थानि सूत्राणीति प्रचक्षते ॥**

**कल्पनाद्धि प्रयोगाणां कल्पोऽनुष्ठान-साधनम् ।**

**सूत्रं तु सूचना तेषां स्वयं कल्प्य-प्रयोगकम् ।**

**कल्पाः पठितसिद्धाः हि प्रयोगाणां प्रतिक्रतुः ॥**

जैमिनिरपि कल्पान् प्रयोगशास्त्रमुक्त्वा स्मरति । कल्पसूत्राणां प्रमाणप्रसङ्गो चत्वारि सूत्राणि सूत्रयामास -

**नासं नियमात्**

**अवाक्यशेषाच्च ।**

सर्वत्र च प्रयोगात् संनिधानशास्त्राच्च । कल्पः प्रयोगशास्त्रमिति अस्ति । इत्यस्य समर्थनं ''अध्वरमीमांसाकुतूहलवृत्तौ'' वासुदेवः अध्वरी-आचार्यः उपदिष्टवान् यथा -

''**प्रयोगस्य क्रत्वनुष्ठानस्य बोधकं शास्त्रं प्रयोगशास्त्रं बौधायन-आपस्तम्ब-आदि-कल्पसूत्रजालम्**'' -

तथा च आश्वलायन-श्रौतसूत्रस्य प्रथम-सूत्रस्य व्याख्याने नारायणगार्ग्यः लिखति - ''लोके यानि प्रत्याम्नायं प्रयोगशास्त्राणि स्मर्यन्ते तानि अनुष्ठानो उपयुक्ततयाध्ययनविधियाक्षिप्तत्वात् प्रत्याम्नाय-मङ्गत्वं प्रतिपन्नानि'' । एवं बह्वीभिरुक्तिभिरवगतं यत् कल्पः प्रयोग-शास्त्रमेवेति । यद्यपि चतुर्धा विभक्तःकल्पः मया स्मारितः, तथापि अस्यां भूमिकायां श्रौतसूत्रविषयेऽहं यथाज्ञानं विचारयिष्ये ।

प्रतिवेदं श्रौतसूत्रं पृथक् कल्पितम् । वैदिक-यज्ञस्य सम्यक् प्रतिपादनं श्रौतगन्धेन कर्तुं शक्यते ।

**व्याकरणम्** -

'मुखं व्याकरणम् स्मृतम्' अनेन वाक्येन व्याकरणस्य वेदाङ्गेषु स्थानं कल्पितम् 'भगवतो वेदपुरुषस्य' मुख्यस्थानीयं निगदितम् । व्याकरण शब्दं व्युत्पादयन्नाह 'व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्याकरणम्' । वि आङ्पूर्वकात् कृ-धातोः ल्युट्-प्रत्यययोगेन व्याकरणम् इति सिद्धम् । भाषायाः सर्वेषामवयमानां विश्लेषणं यत्र क्रियते तद् व्याकरणम् । अर्थात् यस्मिन् शास्त्रे शब्दानां प्रकृतिः कास्ति ? प्रत्ययः कः प्रयुक्तः ? । येन अर्थनिर्धारणे सौलभ्यं जायते । तद् व्याकरणं प्राचीनं शास्त्रम् अस्ति अर्वाचीनं वा इति प्रश्नः सामान्येन सर्वत्र उदेति । वैदिक साहित्यानां पर्यालोचनेन ज्ञायते यत् व्याकरणं पुरातनं शास्त्रं विद्यते । संहिता ग्रन्थेषु अपि व्याकरणस्य चर्चा प्राप्यते । तैत्तिरीय-संहितायाम् एकम् उद्धरणं पठ्यते देवानां प्रार्थनां स्वीकृत्य इन्द्रः वाणीं व्याकरोत् यथा -

**''ते देवा इन्द्रमब्रुवन्निमां नो वाचं व्याकुर्विति**

**तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् । '' ( तै.सं. 6.4.7 )**

सायण: अस्य भाष्यं कृतवान् इन्द्र: प्रकृतिप्रत्यययानां विभागेन अखण्डां वाणीं विभागं चकार ।

ऋग्वेदसंहितायां चत्वारि वाक् परिमिता पदानि (1.164.45) पुन: चत्वारि श्रृङगा, त्रयो अस्य पादा: द्वे शीर्षे, सप्तहस्तासोऽअस्य ।

त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश इति मन्त्र: यजुर्वेदे पठित: अयं मन्त्र: ऋग्वेदेऽपि समाम्नात:।

महाभाष्ये मन्त्रमिमं भगवान् पतञ्जलि:व्याख्यातवान् नामाख्यातोपसर्गनिपाता: शब्दस्य शृङ्गरूपा विद्यन्ते । त्रय पादा: अर्थात् भूतभविष्यवर्तमानकाला: । सप्तहस्ता: सप्त विभक्त्य: । द्वे शीर्षे प्रकृति: प्रत्ययश्च । गोपथ ब्राह्मणेऽपि व्याकरणस्य पारिभाषिकशब्दा: पठिता: । अत एव व्याकरणं उत्तराविद्या नाम्ना प्रसिद्धा ।

'व्याकरणं नाम इयम् उत्तरा विद्या । प्रधानं च षट्सु अङ्गेषु व्याकरणम्' । **( महाभाष्यम् ).**

संस्कृत-व्याकरणे अयं सिद्धान्त: स्पष्ट: यत् शब्दे एक: धातु: प्रत्ययश्च भवति । धातु-प्रत्यययो: सम्यक् ज्ञानं कृत्वा अर्थ-निर्धारणे क्लेश: सन्देहश्च न भवति । धातो: अपि कश्चन अर्थ: कल्पित: विद्यते तथैव प्रत्ययस्यापि दृश्यते अयं प्रत्यय: कस्मिन्नर्थे प्रयुक्त: इति ।

व्याकरणस्यापरं नाम शब्दानुशासनशास्त्रं वर्तते । भाषाया: नियमनं व्याकरणेनैव सम्भवति । आलोचकानां मते भाषा व्याकरणात् प्राचीनाऽस्ति । भाषाया: परिवर्तनं काले-काले सम्भवति किन्तु व्याकरण-शास्त्रं तत् परिवर्तनं सम्यक् यथा भाषा मध्ये नोत्पद्यते तदर्थं मर्यादां स्थापयति । भाषा यद्यपि परिवर्तनशीला विद्यते तथापि शब्द: नित्य: मन्यते। शब्दस्य मूलस्वरूपं तथैव भवति । तस्माद् प्राचीनानां संस्कृत-साहित्यानाम् इदानीम् अपि अर्थग्रहणे संदेहो न जायते। अर्थात् संस्कृतभाषाया: व्याकरणम् एकस्यां सीम्नि पाठकान्, लेखकान्, आलोचकान्, अध्यापकान् स्थापयति तस्माद् आदिकालात् इदानीं यावत् संस्कृते काचिद् विकृति: न सञ्जाता । संस्कृतस्य अति व्यापकं क्षेत्रमस्ति । अस्य शब्दा: परिगणिता: न विद्यन्ते । अनेके शब्दकोषा: सन्ति, तथापि ततोऽधिका: शब्दा: विद्यन्ते ।

तत्रापि अनुशासनम् व्याकरणस्य दृश्यते । प्रयोगात् पूर्वमेव विचारणीयं भवति य: शब्द: मया प्रयुज्यते स साधु: शब्द: असाधु वा । सम्यक् परीक्ष्य प्रयोगोऽत्र भवति । अत्रेदं ज्ञेयं यत् वैयाकरण: नवीनं शब्दं न सर्जति शब्दा: सिद्धा: नित्याश्च सन्ति शुद्धाशुद्धयो: विवेक एव वैयाकरणस्य कार्यम् । व्याकरणस्य गाम्भीर्यं प्रतिपादयन् भगवान् पतञ्जलि: प्रावोचत् **''बृहस्पति: दिव्य-वर्षसहस्रं यावत् इन्द्रं व्याकरणशास्त्रं पाठयामास परन्तु शास्त्रान्तं न जगाम''** तर्हि अल्पायुषां मनुष्याणां व्याकरणे कथं सम्यक् ज्ञानं भवेत् । महाभारते व्याकरणस्य स्वरूपं निर्दिशन्नाह -

**सर्वार्थानां व्याकरणो वैयाकरण उच्यते ।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ॥**

**( महाभारत. उद्योग. 42, 60 )**

व्याकरणशास्त्रस्य प्रयोजनं सामान्येन शब्दानुशासनं विद्यते । महाभाष्ये पतञ्जलि: पञ्चमुख्यप्रयोजनानि उपदिदेश 'रक्षोहागम लघ्वसन्देहा: प्रयोजनम्' ।

**रक्षा, ऊह:, आगम:, लघु:, असन्देहश्च इमे पञ्च प्रोक्ता: ।**

**रक्षार्थं वेदानाञ्चाध्येयं व्याकरणम् ।**

**तत्र सतोऽप्यर्थस्यापायपरिहारां रक्षा ॥**

लोपागमवर्ण विकारज्ञो हि सम्यग्वेदाननुपालयति । आश्रयलिंगवचन-भेदेन भवत्यूह: । न सर्वाभिर्विभक्तिभि: वेदे मन्त्रा निगदिता: ते चावश्यं यज्ञ-गतेन पुरुषेण यथायथं विपरिणमयितव्या । ना अवैयाकरण: यथायथं विपरिणमयितुं न शक्नोति **तस्मादध्येयं व्याकरणम् ।**

लघ्वर्थं चाध्येयं व्याकरणं-संक्षेपार्थं व्याकरणं पठ्यते । व्याकरणस्य कतिपये नियमाः यथा सन्धि-समासादयः संक्षेपकरणाय सर्वथा उपयुक्ताः विद्यन्ते नो चेत् वाक्यस्य निरर्थकः विस्तारः सम्भवति । अर्थबोधकाले विस्तार-भयात् सम्यक् अर्थावबोधोऽपि न जायते । सन्देह-निवारणायापि व्याकरणस्य अध्ययनं क्रियते । यज्ञकर्मणि ''**स्थूलपृषतीमाग्निवारुणीमनड्वाहीमालभेत**'' इति श्रुतिः पठ्यते ।

अत्र व्याकरण-शास्त्रात् स्वरविज्ञानेन अर्थः निश्चीयते स्थूलानि पृषन्ति यस्य पूर्वप्रकृतिस्वरेण बहुव्रीहि-समासः बुध्यते। यदि समासान्ते उदात्तस्वरः स्यात् तथा तदा तत्पुरुषः समासः । समास भेदात् अर्थो भिद्यते प्रयोगे च तस्योपयोगो भवति। अन्यथा व्याकरणशास्त्र-ज्ञानहीनः, यज्ञे सन्देहयुक्तः सन्, प्रयोगेऽपि असफलो जायते । अत एव भणितम् असन्देहार्थं चाध्येयं व्याकरणम् ।

## निरुक्तम् -

वेदस्य श्रोत्रस्थानीयं निरूक्तम् । अस्यापरं नाम निर्वचन-शास्त्रमस्ति । इदं निर्वचनशास्त्रं स्वातन्त्र्येण अर्थावबोधनं कारयति अर्थः प्रधानरूपेणास्मात् निरुक्तशास्त्रात् जायते । तस्मात् निरुक्तस्य लक्षणं कुर्वन् सायणाचार्यः आह -

''**अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्**''

अर्थस्य शब्दस्यान्तरङ्गेण सह सम्बन्धो भवति तस्मात् निरुक्तमिदं वेदाङ्गं वेदस्यान्तरङ्गं विद्यते तथा अन्यानि वेदाङ्गानि बहिरङ्गानि इव भवन्ति ।

सम्प्रति यन्निरुक्तं प्राप्यते तत् निघण्टोः भाष्यरूपं विद्यते । निघण्टुः वैदिक-शब्दकोशः अस्ति । निघण्टोः कर्ता कश्चित् प्रजापतिः कश्यपो मन्यते तत्रैव निरुक्तस्य रचनाकारः यास्काचार्यो वर्तते । निघण्टौ शब्दाः परिगणिताः संकलिताश्च। त एव शब्दाः यास्कस्य प्रामुख्येन भाष्यस्य विषयाः भवन्ति ।

निघण्टौ पञ्चाध्यायाः सन्ति येषु 1341 एकचत्वारिंशदुत्तर-त्रिशताधिक-सहस्रशब्दाः निगदिताः । निरुक्ते त्रीणि काण्डानि निघण्टु - नैगम - दैवतसंज्ञकानि सन्ति । निघण्टौ प्रथमः शब्दः गोः अन्तिमश्च देवपत्नी विद्यते अत एव गवादिदेवपत्न्यः शब्दः समाम्नाय-नाम्नाऽपि ग्रन्थस्य ख्यातिरस्ति । निरुक्तस्य पद्धतौ अर्थज्ञानाय शब्दस्य धातुना साकं सम्बन्धः गवेषणीयः । शब्दः धातुसकाशादेवोत्पद्यते यदि एतत् ज्ञानं स्यात् तर्हि अवश्यमेव अर्थज्ञाने सौलभ्यं भवेत् । धातुसिद्धान्तः निरुक्तस्य प्रमुखः । अत्रेदमवधेयं निर्वचनस्य प्रक्रिया स्वतन्त्रा विद्यते तत्रैव व्युत्पत्तेः विग्रहस्य च ज्ञानं व्याकरणस्यानुशासनेन कर्तुं शक्यते । सम्प्रति व्याकरणस्य ज्ञानं लब्ध्वा जनः निर्वचने उद्यतो भवति तेन वैयाकरणेन निरुक्तं नाधीतं तथापि स्वरसंस्कारबलात् हठात् च निर्वचनं प्रदर्शयति तत् निर्वचनम् असम्भवम् । प्रायेण अस्मिन् काले निरुक्तं परित्यज्य अन्येषां वेदाङ्गानाम् अध्ययनाध्यापनं दृश्यते । तस्मात् निरुक्तशास्त्रमर्मज्ञेन प्रो. उमाशंकर शर्मा ऋषिणा एकदा उक्तं व्याकरणेन कवलितं निरुक्तम् । अत्र व्याकरणशास्त्रस्य निन्दा न विधीयते व्याकरणं वेदाङ्गेषु प्रमुखं विद्यते इत्यत्र नास्ति कश्चन संन्देहः किन्तु निर्वचनस्य कार्यं निरुक्त-शास्त्रेण एव स्यात् । व्युत्पत्तिज्ञानाय व्याकरणाध्ययनं कर्त्तव्यम् ।

यास्कः पाणिनेः प्राचीनतरः आचार्योऽस्ति । वर्तमान-काले यन्निरूक्तं प्राप्यते तस्मिन् चतुर्दश-अध्यायाः सन्ति । अन्तिमौ द्वौ अध्यायौ परिशिष्टरूपौ कथ्येते । अध्यायानां विभागः पादेषु विद्यते ।

चतुर्दश निरुक्तकाराः अभवन् तेषां नामानि - औपमन्यवः, औदुम्बरायणः, वार्ष्यायणिः, गार्ग्यः, आग्रायणः, शाकपूणिः, और्णनाभः, तैटिकिः, गालवः, स्थौलाष्ठीविः, काष्टुकिः, काकस्थ्यः, यास्कः, कौत्सव्यः ।

निघण्टोः कर्ता कश्यपप्रजापतिरस्ति अथवा स्वयमेव यास्कः ? इत्यत्र विदुषां मध्ये वर्तते मतभेदः । महाभारतस्य प्रमाणमादाय केचन यास्कनिरुक्तस्य नाम गृहणन्ति तत्रैव अन्य-आचार्याः यास्कस्य निघण्टु-ग्रन्थं कथयन्ति । मधुसूदनसरस्वतिना महिम्नस्तोत्रस्य व्याख्याने - '**त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति**' अस्य श्लोकस्य व्याख्यानावसरे लिखितम् -

''**एवं निघण्ट्वादयोऽपि वैदिकद्रव्यदेवतात्मक-पदार्थपर्यायशब्दात्मका निरुक्तान्तर्भूता एव । तत्रापि निघण्टुसंज्ञकः पञ्चध्यायात्मको ग्रन्थो भगवता यास्केनैव कृतः ॥**''

अन्यत्र च सायणाचार्यः ऋग्वेद-भाष्यमूमिकायां पञ्चमाध्यायरूपे काण्डत्रयात्मके एतस्मिन् ग्रन्थे परनिरपेक्षतया, पदार्थस्योक्तत्वात् तस्य ग्रन्थस्य निरुक्तत्वम् । तद्-व्याख्यानञ्च ''समाम्नायः समाम्नातः'' इत्यारभ्य तस्यास्तस्यास्ताद्भाव्यम् अनुभवति इत्येतैः द्वादशभिरध्यायैः यास्को निर्ममे ।

महर्षियास्कस्य कालः पाणिनेः प्राचीनः ज्ञायते यतो हि यास्कस्य नाम-ग्रहणं शतपथब्राह्मणे मधुविद्यायाः उपदेश-क्रमे गृहीतम् । तद्यथा -

**''भारद्वाजाद्धारद्वाजो भारद्वाजाच्चासुरायणाच्च यास्काच्चासुराणयः'' । ( शतपथ. ब्रा. 14.4.3.37 ).**

यास्कस्य निरुक्त ग्रन्थे पूर्वाचार्याणां सुश्रद्धं स्मरणं वर्तते । कदाचित् पूर्वपक्षतया तेषां पूर्वाचार्याणां ग्रहणं कृतं तत्रैव सिद्धान्तदाढ्र्याय अपि सम्यक् प्रश्नोत्तराभ्यां यास्काचार्येण उदाहरणं प्रदत्तम् । अस्मिन्निरुक्ते चतुर्दश अध्यायाः प्रकल्पिताः। ग्रन्थस्यान्ते द्वावध्यायौ परिशिष्टरूपौ प्रसिद्धौ स्तः । अध्यायानां अन्तर्विभागः पादेषु अस्ति ।

**छन्दः-**

छन्दः-शास्त्रं भगवतो वेदस्य पादौ भवति । उच्चारण-ज्ञानाय छन्दसां ज्ञानमावश्यकम् । वेदे प्रायेण छन्दोबद्धाः मन्त्राः समाम्नाताः । संहिता-ग्रन्थेषु प्रतीकतया छन्दसां विवेचनं प्राप्यते यथा रुद्राष्टाध्यायां प्रथमेऽध्याये -

**गायत्रीत्रिष्टुब्जगत्यनुष्टुप्पङ्क्त्या सह ।**

**बृहत्युष्णिहा ककुप्सूचीभिःशम्यन्तुत्वा ॥**

लौकिकसंस्कृतेऽपि छन्दसां महत्वं ज्ञायते किन्तु लौकिकात् भिन्नं वैदिकं छन्दः यतो हि लोके मात्रादीनां गुरुलघूनाञ्चातिशयेन परिपालनं भवति तत्रैव वेदाक्षराणां गणना एव छन्दसां निर्धारणे स्वीकृता ।

छन्दस्-शब्दः सकारान्तः नपुंसकलिङ्गे च प्रयुक्तो भवति । छदि छादने धातोः निष्पन्नोऽयं शब्दः । पिङ्गलाचार्यः छन्दः-शास्त्रस्य प्रणेता मन्यते । पिङ्गलः छन्दः-सूत्रम् वेदाङ्गत्वेन प्रसिद्धम् । ग्रन्थस्य भूमिकायां छन्दो-विषये सूचना प्रदत्ता -

किमिदं छन्दः ? इति सोऽयं त्रिविधः पर्यनुयोगो भवति - लक्ष्यापेक्षः लक्षण्यापेक्षः, लक्षणापेक्षश्च तदतस्त्रिविधः समाधिर्भवति ।

**अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् ॥**

इतीदं छन्दः इति लक्ष्यपेक्षः गायत्र्युष्णिगनुष्टुप्-बृहती-पङ्क्तिस्त्रिष्पुब्जगत्याख्याः सप्तैव छन्दोजातयः भवन्तीति लक्षण्यापेक्षः । 'यदक्षणपरिमाणं तत्छन्दः' 'मात्राक्षरसंख्या-नियतावाक् छन्दः' इति लक्षणापेक्षश्च ।

छन्दः-शब्दः वेदस्य पर्यायत्वेनापि उक्तः । 'बहुलं छन्दसि' पाणिनीयं सूत्रं वेदविषये वदति न तु छन्दः-शास्त्रविषये । मनुष्याणां पाप-सम्बन्धं वारयितुमाच्छादकत्वात् छन्दः इति उच्यते; उक्तञ्च ऐतेरयारण्यके ''छान्दयन्ति ह वा एनं छन्दांसि पापात् कर्मणो यस्यां कस्यांचिद्दिशि कामयते'' । तैत्तिरीय-संहितायामपि छादनपरकमेव छन्दः निगदितम् -

**प्रजापतिरग्निमचिनुत स क्षुरपविर्भूत्वा तिष्ठन् तं देवा बिभ्यतोनोपायान् ते छन्दोभिरात्मानं छादयित्वोपायन् तच्छन्दसां छन्दस्त्वम् ( 5.6.6 ).**

**पुनश्च छान्दोग्योपनिषदि** - देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्राविशन् ते छन्दोभिराच्छादय यदेभिराच्छादयन् तच्छन्दसां छन्दस्त्वम् । अयमर्थः अपमृत्युं वारयति इति छन्दः ।

## ज्योतिषम् -

भगवतो वेदस्य ज्योतिषं शास्त्रं चक्षुरुपं विद्यते । चक्षुषा भौतिकं जगत् दृश्यते तत्रैव ज्योतिर्मयेन चक्षुषा ब्रह्माण्डस्य रहस्यमयं भौतिकं दिव्यञ्च जगत् द्रष्टुं शक्यते । अङ्गेषु ज्योतिष-शास्त्रं प्रमुखं स्थानं भजते । उक्तञ्च चाणक्येन - 'सर्वेषु गात्रेषु नयनं प्रधानम्' अयं भावः सर्वाङ्गसम्पन्नोऽपि मनुष्यः चक्षुभ्यां विहीनः सन् दुःखं भुङ्क्ते । ज्योतिषशास्त्रं खगोलादि -विषयक-ज्ञान-प्रदानेन सर्वानुपकरोति । शास्त्रमिदं स्कन्धत्रयवेष्टितं वर्तते ।

सिद्धान्त-संहिताहोरारूपम् स्कन्धत्रयात्मकम् उक्तञ्च वराहमिहिरेण - गणितशास्त्रस्यापरं नाम सिद्धान्तज्योतिषमपि विद्यते । ज्योतिष-शास्त्रस्य महत्वं प्रतिपादयन्नाह-

**यथा शिखा मयूराणां नागानां मणयो यथा ।**

**तद्वद्वेदाङ्गशास्त्राणां ज्योतिषं मूर्धनि स्थितम् ॥**

वेदादिशास्त्रै: साकं ज्योतिषस्य साक्षात् सम्बन्ध: ज्ञायते । ज्योतिषं विना वेदस्य यज्ञ-विज्ञानस्य ज्ञानं सम्पादनञ्च असंभवम् इति । वेदस्य मुख्य: प्रतिपाद्यविषय: यज्ञो वर्तते । यज्ञमाध्यमेन एव वेदे अन्ये अपि विषया: निर्दिष्टा: । कामं विज्ञानस्यान्वेषणं यदि वेदे कश्चित् कर्तुमिच्छति तेन जिज्ञासुना प्रथमं यज्ञ: ज्ञातव्यो भवति यज्ञेन एव जिज्ञासमानस्य विज्ञानस्य, शास्त्रस्य, कर्मण: विषयस्य च ज्ञानं सम्भवति । स्वतन्त्रेण वेदे तथा कथितं भौतिकं विज्ञानं नाम्नातम् । अत: वेदस्य ज्ञातव्य-विषयेषु यज्ञस्य प्रमुखं स्थानं कल्प्यते । अत्रेदमवधेयं कश्चिदपि यज्ञ: काल विशेषे उपदिष्ट: वर्तते श्रौतयज्ञस्य सम्पादनं स्वेच्छया यस्मिन् कस्मिन्नपि दिने भक्त्या न विधीयते । काल: प्रमुख: वर्तते अत एव वेदोपदिष्टे काले यज्ञ: सम्पादनीयो भवति । नियते काले यज्ञस्यानुष्ठान यज्ञ-फलं यजमान: न लभते श्रमश्च व्यर्थ: द्रव्यञ्च निरर्थकं गतम् । कालज्ञानाय ज्योतिषं शास्त्रं ऋषिभि: प्रणीतम् । उक्तञ्च -

**वेदा हि यज्ञार्थमभिप्रवृत्ता:कालानुपूर्व्या विहिताश्च यज्ञा: ।**

**तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेदयज्ञान् ।.**

**( वेदाङ्गज्योतिषम् )**

वेदाङ्गज्योतिषस्य प्रणेता 'लगध:' नामक: कश्चित् ऋषि: बभूव । आचार्य-लगधस्य विषये ग्रन्थेषु अधिक-ज्ञानं न प्राप्यते । ऋग्वेदज्योतिषस्य द्वितीये श्लोके मङ्गलाचरणे लगधाचार्यस्य नाम विद्यते तद्यथा -

**प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।**

**कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मन: ॥**

उपर्युक्तश्लोकस्य भावालोचनेन वक्तुं शक्यते वेदाङ्गज्योतिषे प्रयुक्तो विषय: वर्णितश्च सिद्धान्त: आचार्यलगधस्यास्ति। किन्तु एका शंका पुन: दृढा यत् ग्रन्थस्य रचनाकार: को वर्तते । प्रश्नस्योत्तरं कदाचित् ग्रन्थस्य प्रथमे श्लोकेऽन्वेष्यते।

**पञ्चसंवत्सरमयं युगाध्यक्षं प्रजापतिम् ।**

**दिनर्त्वयनमासांगं प्रणम्य शिरसा शुचि: ॥**

**( वेदाङ्गज्योतिषम् ).**

श्लोकेऽस्मिन् अन्तिमे पदे 'शुचि:' पदं पठितम् । शुचिरिति पदस्य अर्थ: समालोचकानां मते शुचिनामक: कश्चित् दैवज्ञ: ज्योतिषविद् बभूव । अथवा शुचि: शब्द: पवित्रस्य वाचको ज्ञायते । यत् किमपि भवेत् परम्परायां लगधस्य नाम जनै: गीयते । संभाव्यते शुचिनामक: ज्योतिषशास्त्रमर्मज्ञ: आचार्य लगधस्य शिष्य: । यज्ञस्य ज्ञानं ज्योतिषं आसीत् विना न संभवति पूर्वमेवोक्तं पुन: प्रमाणान्तरेण ज्योतिर्विदां महत्वं निरूपयति -

**मन्त्रपादपदसन्धिविधिज्ञो धातुनामवचनप्रतिज्ञ: ।**

**ईदृशो भवति यज्ञविधिज्ञ: पक्षमासतिथिचन्द्रगतिज्ञ: ॥**

**इमं भावं भास्कराचार्य: स्वकीये ग्रन्थे वर्णयामास ।**

वेदस्य वर्ण्यविषय: यज्ञ: प्रामुख्येन वर्तते यज्ञश्च सर्वतो भावेन काल - समय - मुहूर्त- वेलाभिरेव ज्ञातुं शक्यते कालादीनां ज्ञानं ज्योतिष-विज्ञानं विना न प्राप्यते अनेन कारणेन ज्योतिषं वेदाङ्गेषु प्रामुख्यं लभते ।

## शब्दार्थः

**वेत्ति** – जानाति । **समाम्नातः** – आयाति । **कोशः** – संग्रहः । **प्रवक्ष्यामि** – कथयिष्यामि । **पुरुषः** – परिपूर्णः । **सम्भृतम्** – सम्यक् सिद्धम् । **जज्ञिरे** – उत्पादयामास । **गिरः** – स्तुतयः ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) वेदस्य कति अङ्गानि सन्ति ?

(क) ५ (ख) ६ (ग) २ (घ) ७

(२) स्पर्शवर्णाः कति सन्ति ?

(क) २५ (ख) २७ (ग) ३३ (घ) ८

(३) अधस्तनेषु एकः स्वरः नास्ति ।

(क) उदात्तः (ख) अनुदात्तः (ग) सूत्रम् (घ) स्वरितः

(४) अधस्तनेषु एकः आभ्यन्तर प्रयत्नः नास्ति ।

(क) स्पृष्टः (ख) इषद्विवृतम् (ग) विवृतम् (घ) अन्तस्थः

(५) बाह्यः प्रयत्नाः कति सन्ति ?

(क) ११ (ख) १३ (ग) १० (घ) १२

(६) कल्पः वेदस्य केनाङ्गेन स्वीक्रियते ?

(क) हस्तम् (ख) नेत्रम् (ग) मुखम् (घ) नासिका

(७) कल्प-शब्दस्य शाब्दिकोऽर्थः किमस्ति ?

(क) विधिः (ख) युगः (ग) वर्षम् (घ) क्रिया

(८) व्याकरण-शब्दे को धातुः विद्यते ?

(क) कृ (ख) वि (ग) आङ् (घ) ऋ

(९) व्याकरण-प्रयोजनानि केन प्रतिपादितानि सन्ति ?

(क) पतञ्जलिना (ख) पाणिनिना (ग) यास्केन (घ) वसिष्ठेन

(१०) षडङ्गेषु प्रधानाङ्गत्वेन किं परिगण्यते ?

(क) शिक्षा (ख) कल्पः (ग) छन्दः (घ) व्याकरणम्

**२. निम्नाङ्कित-प्रश्नानामेकवाक्येनोत्तरं लिखन्तु ।**

(१) अङ्गशब्दः कस्मिन्नर्थे प्रयुक्तः ?

(२) शिक्षायाः लक्षणं किमस्ति ?

(३) मात्रायाः लक्षणं किमस्ति ?

(४) स्थानानि कति सन्ति ? कानि च तानि ?

(५) आभ्यन्तर-प्रयत्नानां नामानि लिखत ।

(६) व्याकरण-शास्त्रे संहितायाः सूत्रं किमस्ति ?

(७) कल्पशास्त्रान्तर्गतं कति विभागाः ? नाम पुरस्सरं लिखन्तु ।

(८) शब्दस्य श्रृंगरूपाः के सन्ति ?

(९) व्याकरणस्यापरं नाम किमस्ति ?

(१०) 'सर्वेषु गात्रेषु नयनं प्रधानम्' केनोक्तम् ?

**३. निम्नाङ्कित-श्लोकानां पूर्तिः विधेया ।**

(१) यथा शिखा .............................. ॥

(२) प्रणम्य शिरसा .............................. ॥

(३) छन्दः पादौ तु .............................. ॥

**४. निम्नाङ्कित-शब्दानां परिचयो देयः ।**

(१) वेदाङ्गानि

(२) चतुर्ण्णाम्

(३) अङ्गम्

(४) ज्ञानस्य

(५) तैः ।

(६) प्रयोजनानि

(७) अङ्गैः

(८) गणना

(९) प्राकृतिकम्

(१०) षण्णाम् ।

**५. निम्नधातूनां परिचयो देयः ।**

(१) ज्ञायन्ते

(२) जानीमः

(३) श्रूयते

(४) महीयते

(५) क्रियते

(६) अभवत्

(७) वर्धते

(८) शिक्षयामः

(९) नाशयति

(१०) विद्यते

**६. सन्धिविच्छेदनं कुरुत ।**

(१) सामान्यमपि

(२) परिचयोऽपि

(३) चतुर्ण्णामुपरि

(४) तस्मादेव

(५) पराविद्या

(६) अङ्गैस्सह

(७) धन्येयम्

(८) एकैकस्य

(९) षष्टिर्वा

(१०) चतुष्षष्टिः

७. **सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) प्रथमम् + अङ्गम् | (६) स्वर + उच्चारणम् |
| (२) विना + एव | (७) तत् + दर्शनम् |
| (३) उच्चैः + उदात्तः | (८) वज्ररूपः + भूत्वा |
| (४) स्वर + आधीनः | (९) षड् + एते |
| (५) मन्त्रः + हीनः | (१०) वायो + वाहि |

**छात्र-प्रवृत्तिः**

- सम्प्रति उपलब्ध-वैदिक-शाखानामध्येतृणां छात्राणाम् उत्साह-वर्धनार्थं तैः सह वेदानां वैशिष्ट्य-विषये वार्ता कर्त्तव्या।

**विशिष्टज्ञानम्**

- मित्रस्य चक्षुषा समीक्षामहे ।

# ५ | शुक्लयजुर्वेदः चतुर्थोऽध्यायः भागः-१

**प्रस्तावना**

प्रस्तुतेऽस्मिन् प्रकरणे शुक्लयजुर्वेदमाध्यन्दिनीशाखायाः चतुर्थाध्यायस्य प्रथमतः षोडशकण्डिकापर्यन्तम् आचार्यमहीधरानुसारं भाष्यं कृतमस्ति । अध्यायेऽस्मिन् ''सोमयागस्य'' निरूपणं कृतमस्ति । अस्मिन् चतुर्थेऽध्याये सप्तत्रिंशत्कण्डिकाः सन्ति। चतुर्थाध्यायमारभ्य अष्टमाध्यायस्य द्वात्रिंशत्कण्डिकापर्यन्तम् अग्निष्टोममन्त्राः उक्ताः ।



---

**सोमयागस्य संक्षिप्तपरिचयः**

सोमयागः चतुष्प्रकारः (1) एकाहः, (2) अहीनः, (3) साद्यस्कः, (4) सत्रं चेति । एका, तिस्रः, चतस्रः, द्वादश अपरिमिता वा दीक्षाः सोमयागे भवन्ति । एकस्मिन् एव दिने सोमयागानुष्ठानं यत्र स ''एकाहः'' । सोमयागस्य द्वित्रादिषु दिनेषु पुनः पुनः आवृत्त्यानुष्ठानं यत्र स ''अहीनः'' । तत्र द्विरात्रप्रभृतिदशरात्रपर्यन्ता ''अहीनः'' । एकादश द्वादश रात्रौ उभौ अहीनसद्योभयात्मकौ । त्रयोदशरात्रप्रभृतयः सहस्रसंवत्सरपर्यन्ताः सोमयागाः ''सत्राणि'' उच्यन्ते । एकस्मिन् एव दिने सङ्कल्पप्रभृत्यवभृथान्तम् अनुष्ठानं यस्य स ''साध्यस्क्रः'' इत्युच्यते । सत्राण्यपि द्विविधानि - (1) रात्रि सत्राणि। (2) अयन सत्राणि । तत्र द्वादशरात्रप्रभृतिशतरात्रपर्यन्तानि रात्रिसत्राणि । ततः अयनप्रभृतिसत्राणि इति सामान्य स्वरूपम्। अयं सोमयागः विकृतियागः कथ्यते । एतेषां सर्वेषां यागानां प्रकृतियागरूपेण ''ज्योतिष्टोमः'' एव वर्तते । यदि ज्योतिष्टोमयागस्य ज्ञानं समीचीनं वर्तते, तर्हि सोमयागादि- विकृतियागानां ज्ञानं सरलतया भवति ।

सोमयागानुष्ठाने कल्पद्वयम् - यदा सोमेन यियक्षति तदा वसन्तेऽग्नीनाधाय समनन्तरमेव सोमेन ईष्ट्वा दर्शपूर्णमासादिकमनुतिष्ठेत् इत्येकः पक्षः । आधानानन्तरं दर्शपूर्णमासादिकम् ईष्ट्वा सोमेन यजेत् इति अपरः पक्षः । साम्प्रतं सोमलतानुपलम्भात् पूतिकालतायामेव सर्वे सोमसंस्काराः क्रियन्ते । यद्यपि एकदिनसाध्यः अयं यज्ञः तथापि स्वाङ्गैः सहितः पञ्चभिर्दिनैः अनुष्ठीयते । तत्र षोडशसंख्याका ऋत्विजो भवन्ति ।

| अद्ध्वर्युगणः | ब्रह्मगणः | होतृगणः | उद्गातृगणः |
|---|---|---|---|
| (1) अद्ध्वर्युः । | (1) ब्रह्म । | (1) होता । | (1 उद्गाता । |
| (2) प्रतिप्रस्थाता । | (2) ब्राह्मणाच्छंसी | (2) मैत्रावरुणः । | (2) प्रस्तोता । |
| (3) नेष्टा । | (3) आग्नीध्रः । | (3) अच्छावाकः । | (3) प्रतिहर्ता । |
| (4) उन्नेता । | (4) होता | (4) ग्रावस्तुद् । | (4) सुब्रह्मण्यः । |

यावत्यो गोरूपा दक्षिणा देयत्वेन उक्ताः ताः समशः चतुर्धा विभज्य एकैकस्मै गणाय एकैकं भागं दद्यात् । तत्रापि एकैकभागस्य विषमशः विभज्य दानम्, यथा - अध्वर्योः अर्धं प्रतिप्रस्थातुः तृतीयः नेष्टुः चतुर्थः भागः, उन्नेतुः चतुर्थो भागः । अतः एव एषामर्धिनः तृतीयिनः पादिनः इत्यपि संज्ञा ॥

स च वसन्ते प्रायशः शुक्लैकादश्यां प्रारभ्य पूर्णिमायां समाप्यते । आभ्युदयिकानन्तरमृत्विग्वरणम् । तत्र प्रवाकनामान् ऋत्विजं प्रथमं वृणुयात् । स वृतः अध्वर्यादीनां गृहं गत्वा तान् यथाविधि निमन्त्र्य यजमानगृहमानयेत् । तान् वृणीते । वृतेभ्यस्तेभ्यः मधुपर्कदानम् । ततः अग्नीन् समारोप्य देवयजनं गत्वा निर्माय अरणीं मथित्वा खरेषु स्थापयेत् । अपराह्ने दम्पत्योः अभीष्टभोजनम् । ततः चतुर्षु दिवसेषु उपवासः एव प्रायः । अवभृथानन्तरं पुनः अभीष्टभोजनम् । मध्ये तु व्रतप्राशनम् । यजमानस्य वपनं स्नानं ततः दीक्षणीयेष्टिः । नवनीतेन दम्पत्योः शिरसः आरभ्य पादपर्यन्तम् अभ्यञ्जनम् । ततः तयोः मुष्टिबन्धनं हस्तद्वयेऽपि । वस्त्रादिना सर्वाः अङ्गुलीः बध्वा अङ्गुष्ठप्रदेशिन्यौ विसृतेत् । माध्यन्दिनसवनं यावत् बद्धमुष्टिभ्यामेव दम्पतीभ्यां कार्याणि सम्पादनीयानि । ततः औद्ग्रभणहोमाः । ततः कृष्णाजिनदीक्षा । तत्र कृष्णाजिनमारुह्य मेखलां बद्ध्वा उष्णीषेण शिरसः प्रावरणं पत्न्याः कृष्णाजिनाभावः । कण्डूयनार्थं कृष्णमृगशृङ्गं रक्षेत् । ततः यजमानस्य दण्डग्रहणम् । ततः सायं दीक्षितः अयं ब्राह्मणः इति प्रतिप्रस्थाता उच्चैः निवेदयेत् । ततः प्रभृति यावत् अवभृथं दन्तधावनस्नानग्निहोत्र-होमदर्शपूर्णमासादिवैश्वदेवार्थपाकस्मार्तोपासनानुष्ठानदान-शूद्रसम्भाषण प्रत्युत्थानाभिवादनजलावगाहनानि न कर्तव्यानि ॥

[यजमानः यज्ञस्थानं समागत्य कुशतरुणं क्षुरं च अहिंसार्थं प्रार्थयति]

**मन्त्रः-** **एदमगन्म देवयजनम्पृथिव्या यत्र देवासोऽअजुषन्त विश्वे । ऋक्सामाभ्याᳬं सन्तरन्तो यजुर्भी रायस्पोषेण समिषा मदेम । इमाऽआपᳫ शमु मे सन्तु देवीरोषधे त्रायस्व स्वधिते मैनᳫ हिᳫसीᳫ ॥१॥**

**पादपाठः** आ । इदम् । अगन्म । देवयजनमितिदेव यजनम् । पृथिव्यायाः । यत्र । देवासः । अजुषन्त । विश्वे ॥ ऋक्सामाभ्यामित्त्यृक् सामाभ्याम् । सन्तरन्तऽइतिसम् तरन्तᳫ । यजुर्भिरितियजुः भिᳫ । रायᳫ । पोषेण । सम् । इषा । मदेम ।। इमाᳫ । आपः । शम् । ऊँऽइत्यूं। मे । सन्तु देवीᳫ । ओषधे । त्रायस्व । स्वधितऽइतिस्व धिते । मा । एनम् । हिᳫसीᳫ ॥१॥

**सरलार्थः-** वयं पृथिव्याः संबन्धि इदं देवयजनं स्थानम् आगता स्म । यत्र देवयजने सर्वे देवाः अप्रीयन्त । वेदत्रयगतैर्मन्त्रैः समुद्रवत् गम्भीरं सोमयागं समापयन्तः । वयं धनैः अन्नैश्च हृष्टा भवेम । इदं जलं शिरः बलदाय मम यजमानस्य कृते सुखार्थं भवतु । हे कुशतरुण ! त्वं यजमानं क्षुराद् रक्ष । हे स्वधिते क्षुर ! एनं यजमानं मा हिंसीः ॥

[केशवपनानन्तरं यजमानः स्नानं नूतनवस्त्रधारणं च करोति ।]

**मन्त्रः-** **आपोऽअस्मान्मातरः शुन्धयन्तु घृतेनन्नो घृतप्व्वः पुनन्तु । विश्वᳫ हि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यᳫ शुचिरा पूतऽएमि । दीक्षातपसोस्तनूरसि तान्त्वा शिवाᳬं शग्ग्माम्परिदधे भद्रँव्वर्णम्पुष्यन् ॥२॥**

**पदपाठः** आपः। अस्मान् । मातरः । शुन्धयन्तु । घृतेन । नः । घृतप्व्वऽइतिघृत प्वः । पुनन्तु ॥ विश्वम्। हि । रिप्रम् । प्रवहन्तीतिप्र व्वहन्ति । देवीᳫ । उत् । इत् । आभ्यᳫ । शुचिः । आ। पूतᳫ ।

एमि ॥ दीक्क्षातपसोः । तनूः । असि । ताम् । त्वा । शिवाम् । शग्ग्माम् । परि । दधे । भद्रम्। व्वर्ण्णम् । पुष्य्यन् ॥२॥

**सरलार्थः-** जगन्निर्मात्र्यः मातृत्वपालयित्र्यः आपः अस्मान् कृतक्षीरान् यजमानान् शोधयन्तु । क्षरितजलेन अस्मान् शुद्धान् कुर्वन्तु । द्योतमाना आपः सर्वपापं प्रकर्षेण अपनयन्तु । अस्मान् स्नानेन आचमनेन च पुनन्तु । तथा-विधिशुद्धिद्वयोपेतोऽहम् अद्भ्यः उद्गम्य भूमिमागच्छामि । हे क्षौमवस्त्रम् । त्वं दीक्षातपसः तनुरसि । तां दीक्षा तपसोस्तनूं तत् देवताद्वयशरीरभूतां त्वामहं धारयामि । त्वत्परिधानेन अत्यन्तसुखरूपां कल्याणीं बिभ्रत् (धारयामि) ॥

[यजमानः शिरोपरि नववनीतलेपनं नयनयोः अञ्जनं च करोति ।]

**मन्त्रः** **महीनाम्पयोसि व्वर्च्चोदाऽअसि वर्च्चो मे देहि । व्वृत्रस्यासि कनीनकश्च्चक्क्षुर्द्दाऽअसि चक्क्षुर्म्मे देहि ॥३॥**

**पदपाठः-** व्वृत्रस्य । असि । कनीनकः । चक्क्षुर्द्दाऽइतिचक्क्षुः दाः । असि । चक्क्षुः । मे । देहि ॥३॥

**सरलार्थः-** हे नवनीत ! त्वं गवां पयः असि । वर्चोदा असि । अतिस्निग्धत्वेन कान्तिप्रदमसि । अतः मह्यं यजमानाय कान्तिं प्रयच्छ । हे अञ्जन । त्वं वृत्रासुरस्य कनीनकः असि । नेत्रमध्यगतकृष्णमण्डलरूपः असि । त्वं कनीनिकारूपत्वात् दृष्टिप्रदः असि । अतः मह्यं चक्षुर्देहि ॥

[सप्तदर्भैः अद्ध्वर्युः यजमानम् अभिषिञ्चति]

**मन्त्रः-** **चित्त्पतिर्म्मा पुनातु व्वाक्क्पतिर्म्मा पुनातु देवो मा सविता पुनात्त्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभिः। तस्य ते पवित्रपते पवित्रपूतस्य यत्क्कामः पुने तच्छकेयम् ॥४॥**

**पदपाठः-** चित्त्पतिरितिचित् पतिः । मा । पुनातु । व्वाक्क्पतिरितिवाक् पतिः । देवः । सविता ॥ तस्य । ते। पवित्रपतेऽइतिपवित्र पते । पवित्रपूतस्येतिपवित्र पूतस्य । यत्क्कामऽइतियत् कामः । पुने । तत् । शकेयम् ॥४॥

सरलार्थः- कुशपवित्रैः प्रजापतिः मां यजमानं शोधयतु । बृहस्पतिःमां यजमानं शोधयतु । सविता देवः माम् अच्छिद्रेण वायुना तथा सूर्यकिरणैः शोधयतु । हे पवित्रपते ! तव पवित्रेण यजमानस्य अभीष्टं भूयात् । सोमयागानुष्ठाने अहम् आत्मानं शोधयामि । तत् सोमयागानुष्ठाने शक्तः भूयासम् ॥

[यजमानः मन्त्रोच्चारणं करोति ।]

**मन्त्रः-** **आ वो देवासऽईमहे व्वामम्प्रयत्त्यद्ध्वरे । आ वो देवसऽआशिषो यज्ञियासो हवामहे ॥५॥**

**पदपाठः-** आ । व्वः । देवासः । ईमहे । व्वामम् । प्रयतीतिप्र यति । अद्ध्वरे ॥ आ व्वः । देवासः । आशिषऽइत्त्याशिषः । यज्ञियासः । हवामहे ॥५॥

**सरलार्थः-** हे देवाः ! वयं प्रवर्तमाने अस्मदीये यज्ञे वननीयं यज्ञफलं साकल्येन युष्मान् याचामहे । हे देवाः । वयं यज्ञसंबन्धिफलानि आनेतुं युष्मान् आवाहयामः ॥

[यजमानः मन्त्रोच्चारणेन सह मुष्टीकृत्वा जुहोति तथा मौनीभूत्वा मुष्टीं विसृजति ।]

**मन्त्रः-** **स्वाहा यज्ञम्मनसः स्वाहोरोरन्तरिक्क्षात्त्स्वाहा द्यावापृथिवीब्भ्याथं स्वाहा व्वातादारभे स्वाहा ॥६॥**

**पदपाठः-** स्वाहा । यज्ञम् । मनसः । उरोः । अन्तरिक्क्षात् । द्यावापृथिवीब्भ्याम् । व्वातात् । आ । रभे । स्वाहा ॥६॥

**सरलार्थः-** अहं चित्तेन यज्ञम् अभिगच्छामि । वायुप्रसादात् विस्तीर्णे अन्तरिक्षे द्यावापृथिव्योः च यज्ञं प्रवर्त्तयामि । अत्र स्वाहा शब्दस्य निपातत्त्वेन अनेकार्थत्त्वात् उचिता अर्थाः शतपथ ब्राह्मणानुसारेण ग्राह्याः ॥

[अद्ध्वर्युः स्रुवेण आज्यं जुहोति ।]

**मन्त्रः-** **आकूत्यै प्रयुजेग्नये स्वाहा मेधायै मनसेग्नये स्वाहा दीक्षायै तपसेग्नये स्वाहा सरस्वत्यै पूष्णेग्नये स्वाहा । आपो देवीर्बृहतीर्विश्वशम्भुवो द्यावापृथिवीऽउरोऽअन्तरिक्ष । बृहस्पतये हविषा विधेम स्वाहा ॥७॥**

**पदपाठः-** आकूत्याऽइत्या कूत्यै । प्रयुजऽइतिप्र षजे । अग्नये । स्वाहा । मेधायै । मनसे । दीक्षायै । तपसे। सरस्वत्यै । पूष्णे । अग्नये । स्वाहा ॥ आपः । देवीः । बृहतीः । विश्वशम्भुवऽइतिविश्व शम्भुवः। द्यावापृथिवीऽइतिद्यावापृथिवी । उरोऽइत्युरो । अन्तरिक्ष ॥ बृहस्पतये । हविषा । विधेम । स्वाहा ॥७॥

**सरलार्थः-** यज्ञसम्पूर्त्यै सङ्कल्पसिद्धये मेधालक्षणाय मनोभिमानेन तपोभिमानेन वाग्लक्षणाय पशुलक्षणाय अग्नये आज्येन वयं परिचर्यां करवाम । हे आपो देव्यः ! महत्यः ! सर्वस्य जगतः सुखेन भावयित्र्यः ! हे द्यावापृथिव्यौ! हे विस्तीर्ण अन्तरिक्ष ! युष्मभ्यं बृहस्पतये च आज्येन परिचर्यां करवाम ॥

[ध्रुवापात्रे स्थितमाज्यं जुहूपात्रे संगृह्य औद्ग्रभणहोमं करोति अद्ध्वर्युः ।]

**मन्त्रः-** **विश्वो देवस्य नेतुर्मर्त्तो वुरीत सक्ख्यम् । विश्वो रायऽइषुध्यति द्युम्नँवृणीत पुष्यसे स्वाहा॥८॥**

**पदपाठः-** विश्वः । देवस्य । नेतुः । मर्त्तः । वुरीत । सक्ख्यम् ॥ विश्वः । राये । इषुध्यति । द्युम्नम्। वृणीत । पुष्यसे । स्वाहा ॥८॥

**सरलार्थः-** सर्वमनुष्यः फलप्रापकस्य दानादिगुणयुक्तस्य देवस्य सवितुः सखिभावं प्रार्थयते । सर्वजनः धनाय सवितारं प्रार्थयते । सर्वजनः स्वप्रजापालनाय यशः अन्नं वा सवितारं प्रार्थयते । तस्मै प्रेरकाय सवित्रे इदं सुहुतमस्तु॥

[यजमानः कृष्णाजिनं स्पृष्ट्वा तदुपरि उपविशति ।]

**मन्त्रः-** **ऋक्कसामयोः शिल्प्पे स्थस्ते वामारभे ते मा पातमास्य यज्ञस्योदृचः। शर्म्मासि शर्म्म मे यच्छ नमस्तेऽअस्तुमामा हिꣳसीः ॥९॥**

**पदपाठः-** ऋक्कसामयोरित्त्यृक् सामयोः। शिल्प्पेऽइतिशिल्प्पे । स्थः । तेऽइतिते । व्वाम् । आ । रभे । तेऽइतिते। मा । पातम् । आ । अस्य । यज्ञस्य । उदृचऽइत्त्युत् ऋचः ॥ शर्म्म । असि । शर्म्म । मे । यच्छ ॥९॥

**सरलार्थः-** हे कृष्णाजिनगते शुक्लकृष्णरेखे ! युवां ऋगभिमानि सामाभिमानि देवतयोः चातुर्ये तद्रूपे भवथः । युवामहं स्पृशामि । अनुष्ठीयमानस्य यज्ञस्य यज्ञसमाप्तिपर्यन्तं मां पालयतम् । हे कृष्णाजिन ! त्वं शरणमसि, अतः मह्यं शरणं प्रयच्छ । तुभ्यं कृष्णाजिनाय नमोऽस्तु । मां (यजमानं) मा जहि ॥

[यजमानः मेखलाबन्धनम् उष्णीष(पाघडी) धारणं विषाण(शृङ्गं) धारणं दण्डधारणं च करोति ।]

**मन्त्रः-** **ऊर्ग्गस्याङ्गिरस्यूर्णम्म्रदाऽऊर्जम्मयि धेहि । सोमस्य नीविरसि व्विष्णोः शर्म्मासि शर्म्म यजमानस्येन्द्रस्य योनिरसि सुसस्याः कृषीस्कृधि । उच्छ्रयस्व वनस्पत ऽऊर्द्ध्वो मा पाह्यꣳहसऽआस्य यज्ञस्योदृचः ॥१०॥**

**पदपाठः-** ऊर्क्क् । असि । आङ्गिरसी । ऊर्णम्म्रदाऽइत्त्यूर्ण म्रदाः । ऊर्ज्जम् । मयि । धेहि ॥ सोमस्य । नीविः । असि । विष्णोः । शर्म्म । असिः । शर्म्म । यजमानस्य । इन्द्रस्य । योनिः । असि। सुसस्याऽइतिसु सस्याः । कृषीः । कृधि ।। उत् । श्रयस्व । व्वनस्पते । ऊर्द्धः । मा । पाहि। अꣳहसः ॥१०॥

**सरलार्थः-** हे मेखले ! त्वम् अङ्गिरानामकानामृषीणां संबन्धिनी अन्नरसरूपासि । कम्बलवत्मृदुरसि । त्वम् अन्नरसं मयि स्थापय । हे मेखले । त्वं सोमदेवतायाः प्रियभूता ग्रन्थिरसि । त्वं व्यापकस्य यज्ञस्य सुखहेतुर्भवसि। अतः यजमानस्य सुखं कुरु । हे कृष्णविषाणे ! त्वमिन्द्रस्य योनिरसि (जन्मस्थानम्) । इदानीं त्वं यजमानस्य स्थानं भव । हे कृष्णविषाणे ! यजमानानां कृषयः सन्ति ताः सर्वाः कल्याणधान्याः कुरुत । हे वनस्पते

वृक्षावयवदण्ड ! अनुष्ठीयमानस्य यज्ञस्य यज्ञसमाप्तिपर्यन्तम् ऊर्ध्वो भूत्वा पापात् मां रक्ष ॥

[यजमानः वाग्विसर्जनं कृत्वा यज्ञारम्भार्थं ऋत्विजः सूचयति ।]

**मन्त्रः-** **व्व्रतङ्कृणुत व्व्रतङ्कृणुताग्निर्ब्रह्माग्निर्य्यज्ञो व्वनस्पतिर्य्यज्ञियः । दैवीन्धियम्मनामहे सुमृडीकामभिष्टये व्वर्च्चोधाँय्यज्ञवाहसꣳ सुतीर्त्था नोऽअसद्वशे । ये देवा मनोजाता मनोयुजो दक्षक्रतवस्ते नोऽवन्तु ते नः पान्तु तेब्भ्यः स्वाहा ॥११॥**

**पदपाठः-** व्रतम् । कृणुत । व्रतम् । कृणुत । अग्निः । ब्रह्म । अग्निः । यज्ञः । वनस्पतिः । यज्ञियः ॥ दैवीम् । धियम् । मनामहे । सुमृडीकामितिसु मृडीकाम् । अभिष्टये । व्वर्च्चोधामितिवर्च्चः धाम् । यज्ञवाहसमितियज्ञ व्वाहसम् । सुतीर्त्थेतिसु तीर्त्था । नः । असत् । व्वशे ॥ ये । देवाः । मनोजाताऽइतिमनः जाताः । मनोयुजाऽइतिमनः युजः । दक्क्षक्क्रतवऽइतिदक्क्ष क्रतवः । ते । नः । अवन्तु । ते । नः । पान्तु । तेब्भ्यः । स्वाहा ॥११॥

**सरलार्थः-** हे परिचारकाः ! दोहनादिना क्षीरं निष्पादयत । अत्र व्रतशब्देन पयः अभिधीयते । ब्रह्मशब्देन वेदत्रयमभिधीयते तस्य वेदत्रयस्य अग्नित्वमुपचर्यते । खदिरादिर्वनस्पतिः सोऽपि यज्ञः इत्यनुवर्तते । वयम् अभिमुखत्वेन प्राप्तस्य यज्ञस्य सिद्धयर्थं देवसम्बधिनीं शोभनसुखहेतुभूतां तेजसो धारयित्रीं यज्ञनिर्वाहकर्त्रीं सुतीर्थां-यज्ञानुष्ठान- विषयां बुद्धिं याचामहे । ये चक्षुरादीन्द्रिय-रूपाः प्राणाः विश्वेदेवाः दर्शनश्रवणादि-इच्छारूपात् मनसः उत्पन्नाः रूपादिदर्शन-कालेऽपि मनसा युक्ताःसङ्कल्पितार्थकारिणः देवाः अस्मान् यज्ञानुष्ठानविघ्नपरिहारेण पालयन्तु । तेभ्यः प्राणरूपेभ्यः देवेभ्यः इदं क्षीरं हुतमस्तु ॥

[यजमानः नाभिस्पर्शनं करोति ।]

**मन्त्रः-** **श्वात्राः पीता भवत यूयमापोऽअस्माकमन्तरुदरे सुशेवाः । ताऽअस्मभ्यमयक्ष्माऽअनमीवाऽअनागसः स्वदन्तु देवीरमृताऽऋतावृधः ॥१२॥**

**पदपाठः-** श्वात्राः । पीताः । भवत । यूयम् । आपः । अस्माकम् । अन्तः । उदरे । सुशेवाऽइतिसु शेवाः ॥ ताः । अस्मभ्यम् । अयक्क्ष्माः । अनमीवाः । अनागसः । स्वदन्तु । देवीः । अमृताः । ऋतावृधः । ऋतवृधऽइत्यृत व्वृधः ॥१२॥

**सरलार्थः-** हे क्षीररूपा आपः ! यूयं पीताः क्षिप्रपरिमाणाः शीघ्रं जीर्णा भवत । अस्माकं जलपाकस्थाने शोभन सुखानि प्रबलरोगराजसहितानि सामान्यरोग-निवर्तिकानि अपराधहारिण्यानि द्योतमानामरण-निवर्तिकानि यक्ष्मनाशकानि यज्ञवृद्धिगतानि अस्मदुपकारार्थं स्वादुत्वयुक्तानि भवन्तु ॥

[यजमानः मूत्रं करिष्यन् शृङ्गेण लोष्टं किञ्चिद्वा तृणादिकं वा गृह्णाति ।]

**मन्त्रः-** **इयन्ते यज्ञिया तनूरपो मुञ्चामि न प्रजाम् । अꣳहोमुचः स्वाहाकृताः पृथिवीमाविशत पृथिव्या सम्भव ॥१३॥**

**पदपाठः-** इयम् । ते । यज्ज्ञिया । तनूः । अपः । मुञ्चामि । न । प्रजामितिप्र जाम् ॥ अꣳहोमुचऽइत्यꣳह मुचः । स्वाहाकृताऽइतिस्वाहा कृताः । पृथिवीम् । आ । व्विशत । पृथिव्या सम् । भव ॥१३॥

**सरलार्थः-** हे यज्ञपुरुष ! इयं पृथिवी तव योग्यो देहः अस्ति । अतः अस्याः पृथिव्याः मूत्रपरिहाराय अपवित्रतादूरीकरणाय लोष्टं तृणं वा स्वीकरोमि । हे पृथिवी ! मूत्ररूपा अपः अहं मुञ्चामि । प्रजोत्पत्तिनिमत्तं रेतः न मुञ्चामि। अतः हे आपः ! यूयं पृथिवीं प्रविशत । अहंसः पूर्वं क्षीरपानकाले स्वाहा-मन्त्रेण स्वीकृताः सत्यः भूमिमाविशत। गृहीतलोष्टादिकं मूत्रस्थाने क्षिपेत् । हे लोष्टादिक ! पृथिव्या सह त्वमेकीभव ॥

[यजमानः आहवनीयाग्नेः दक्षिणस्यां उत्तरस्याम् पूर्वस्यां दिशि वा शयनं करोति ।]

**मन्त्रः-** **अग्ग्ने त्त्वꣳ सुजागृहि व्वयꣳ सुमन्दिषीमहि ।**

**रक्षा णोऽअप्प्रयुच्छन्प्रबुधे नꣳ पुनस्कृधि ॥१४॥**

**पदपाठः-** अग्ग्ने । त्वम् । सु । जागृहि । व्वयम् । सु । मन्दिषीमहि ॥ रक्क्ष । नꣳ । अप्प्रयुच्छन्नित्त्यप्प्र युच्छन् । प्रबुधऽइतिप्र बुधे । नꣳ । पुनरितिपुनः । कृधि ॥१४॥

**सरलार्थः-** हे अग्ने ! त्वं मम भयपरिहाराय सुष्ठु निद्रारहितो भव । वयं यजमानाः साधु स्वप्स्यामः । अस्मान् प्रमादं विना रक्ष । अस्माकं प्रबोधाय पुनः प्रमाददूरं कुरु ॥

[उत्थाय यजमानः मन्त्रपाठं करोति ।]

**मन्त्रः-** **पुनर्म्मनꣳ पुनरायुर्म्मऽआगन्पुनः प्प्राणꣳ पुनरात्त्मा मऽआगन्पुनश्च्चक्क्षुꣳ पुनꣳ श्रोत्रम्मऽआगन् । वैश्श्वानरोऽअदब्धस्त्तनूपाऽअग्ग्निर्नः पातु दुरितादव-द्यात् ॥१५॥**

**पदपाठः-** पुनः । मनः । पुनः । आयुः । मे । आ । अगन् । पुनरितिपुनः । प्राणꣳ । पुनः । आत्मा । मे । आ । अगन् । पुनरितिपुनः । चक्क्षुः । पुनरितिपुनः । श्रोत्रम् । मे । आ । अगन् । वैश्श्वानरꣳ । अदब्धꣳ । तनूपाऽइतितनू पाꣳ । अग्ग्निꣳ । नꣳ । पातु । दुरितादितिदुꣳ इतात्। अवद्द्यात् ॥ १५॥

**सरलार्थः-** मम यजमानस्य मनः सुप्तिकाले विलीय पुनः इदानीं शरीरे समागतम् । स्वापकाले मदीयमायुः नष्टप्रायं भूत्वा पुनः आगतम् । मम प्राणः वायुः पुनः आगतम्। श्रवणेन्द्रियं पुनः आगतम् । मम चक्षुःपुनः आगतम्। मम जीवःपुनःआगतम् । स्वापकाले मनः-आदीनाम् अपक्रमो भवति । तेषां पुनर्यथास्थानमागमनं प्रार्थ्यते। एवं सर्वेन्दियेषु समागतेषु अयमग्निः वदितुमयोग्यात् निन्दितात् दुरितात् पापात् अस्मान् पालयतु ॥

[यजमानः क्रोधं कृत्वा व्रतविरुद्धमश्लीलादिकं व्याहृत्य प्रायश्चित्तार्थं मन्त्रपाठं करोति । ]

**मन्त्रः-** **त्वमग्ग्ने व्व्रतपाऽअसि देवऽआ मर्त्त्येष्ष्वा । त्वँय्यज्ज्ञेष्ष्वीड्ड्यः । रास्स्वेयत्त्सोमा भूयो भर देवो नः सविता व्वसोर्द्दाता व्वस्वदात् ॥१६॥**

**पदपाठः-** त्वम् । अग्ग्ने । व्व्रतपाऽइतिव्रत पाꣳ । असि । देवꣳ । आ । मर्त्त्येषु । आ ॥ त्वम् । यज्ज्ञेषु। ईड्यः ॥ रास्स्व । इयत् । सोम । आ । भूयः । भर । देवꣳ । नꣳ । सविता । व्वसोꣳ । दाता । वसु । अदात् ॥१६॥

**सरलार्थः-** हे अग्ने ! देवः द्योतनात्मकः त्वं मनुष्यपर्यन्तेषु सर्वप्राणिषु व्रतकर्मणः पालको भवसि । कृतौ प्राप्तं धनं स्पृष्ट्वा मन्त्रं पठेत् । हे सोम ! एतावत् धनं मह्यं देहि । यतः धनस्य दाता सविता देवः अस्मभ्यं पूर्वमपि धनं दत्तवान् । त्वं यज्ञकर्मसु पूजयितव्यः भवसि । अतस्त्वं व्रतपा असि ॥

## शब्दार्थाः

**सन्तरन्तः** - समापयन्तः, **मदेम** - हृष्टा भवेम, **हिꣳसीः** - जहि, **शुन्धयन्तु** - पुनन्तु, **घृतप्वः** - घृतेन पुनन्ति, **रिप्प्रम्** - पापम्, **पयः** - नवनीतम्, **ईमहे** - याचामहे, **अद्ध्वरे** - यज्ञे, **मर्तः** - मनुष्यः, **इषुद्ध्यति** - प्रार्थयते, **पुष्यसे** - स्वप्रजापालनाय, **ऊर्गसि** - अन्नरसरुपासि, **पान्तु** - पालयन्तु, **सुशेवाः** - शोभनसुखाः **स्वदन्तु** - स्वादुयुक्ता भवन्तु, **अमृताः** - मरणनिवर्तिकाः, **मुञ्चामि** - त्यजामि, **अꣳहोमुचः** - पापात् मुञ्चन्ति, **सुजागृहि** - सुष्ठु निद्रारहितोभव, **अप्रयुच्छन्** - प्रमादं विना, **प्रबुधे** - प्रबोधाय, **वैश्वानरः** - अग्निः, **आमर्त्येषु** - मनुष्यपर्यन्तेषु, **ईड्यः** पूजयितव्य, **वसोः** - धनस्य ॥

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) यजमानं कस्मात् रक्ष ?

(क) धनात् (ख) क्षुरात् (ग) दुर्जनात् (घ) व्याघ्रात्

(२) नवनीतं कीदृशं वर्तते ?

(क) कान्तिप्रदम् (ख) दृष्टिप्रदम् (ग) आनन्दप्रदम् (घ) ज्ञानप्रदम्

(३) चित्पतिः कं शोधयति ?

(क) ब्राह्मणम् (ख) क्षत्रियम् (ग) गाम् (घ) यजमानम्

(४) यज्ञे वननीयं यज्ञफलं साकल्येन के याचामहे ?

(क) ऋत्विजः (ख) यजमानाः (ग) भक्ताः (घ) शिष्याः

(५) सर्वमनुष्यः दानादि-गुणयुक्तस्य देवस्य कं भावं प्रार्थयते ?

(क) सखिभावम् (ख) धनभावम् (ग) ज्ञानभावम् (घ) फलभावम्

(६) कृष्णाजिनं कः स्पृशति ?

(क) ब्राह्मणः (ख) यजमानः (ग) देवः (घ) अश्वः

(७) सोमदेवतायाः प्रियभूता ग्रन्थिः का अस्ति ?

(क) पत्नी (ख) धरित्री (ग) मेखला (घ) मेधालक्षणा

(८) दोहनादिना क्षीरं के निष्पादयन्ति ?

(क) परिचारकाः (ख) देवताः (ग) राक्षसाः (घ) यजमानाः

(९) प्रबलरोगराजरहिताः काः सन्ति ?

(क) गावः (ख) ओषधयः (ग) मृत्तिकाः (घ) आपः

(१०) धनस्य दाता को देवः अस्ति ?

(क) सवितृदेवः (ख) चन्द्रदेवः (ग) वरुणदेवः (घ) इन्द्रदेवः

**२. निम्नाङ्कित-प्रश्नानामेकवाक्येनोत्तरं लिखन्तु ।**

(१) सोमयागः कतिविधः ?

(२) सत्राणि कति विधानि सन्ति ?

(३) सोमयागे केषाम् अधिकारोऽस्ति ?

(४) देवयजने स्थाने सोमयागं के स्थापयन्तः ?

(५) ''कनीनकः'' इति शब्दस्य कोऽर्थः ?

(६) प्रवर्तमाने यज्ञे यजमानाः किं याचामहे ?

(७) सर्वमनुष्यः कस्य सखिभावं प्रार्थयते ?

(८) ''शिल्पे'' इत्यस्य कोऽर्थ ?

(९) दोहनादिना परिचारकाः किं निष्पादयन्ति ?

(१०) शोभन-सुखाः प्रबलरोगराजरहिताः काः सन्ति ?

**३. अधोलिखितानां कण्डिकानां भावार्थो लेख्यः ।**

(१) म॒ही॒नाम्पयोऽसिद्व॒र्च्चोदाऽअ॑सि॒द्व॒र्च्चोमेदेहि ।
व्वृ॒त्रस्य॑ासिक॒नीन॑कश्च्चक्षु॒र्द्दाऽअ॑सि॒चक्षु॑र्म्मेदेहि ॥

(२) चित्पतिर्म्मा पुनातु वाक्पतिर्म्मा पुनातु देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्य्यस्य रश्मिभि: ।
तस्य ते पवित्रपते पवित्रपूतस्य यत्काम: पुने तच्छकेयम् ॥

(३) विश्श्वो देवस्य नेतुर्म्मर्त्तो व्वुरीत सख्यम् । विश्श्वो राय ऽ इषुध्यति द्युम्नं वृणीत पुष्यसे स्वाहा ॥

## ४. अधोलिखितानां कण्डिकानां पूर्ति: विधेया ।

(१) आवोदेवास: ।

(२) स्वाहायज्ञम् ।

(३) श्वात्रा॒पीता ।

## ५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।

(१) देवास:
(२) ऋक्सामाभ्याम्
(३) अस्मान्
(४) महीनाम्
(५) अच्छिद्रेण
(६) यज्ञम्
(७) अग्नये
(८) मर्त्त:
(९) विष्णो:
(१०) अस्मभ्यम्

## ६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।

(१) आगन्म
(२) सन्तु
(३) असि
(४) वयम्
(५) मदेम
(६) धारयामि
(७) देहि
(८) ईमहे
(९) यच्छा
(१०) भवत

## ७. सन्धिविच्छेदनं कुरुत ।

(१) आगन्म
(२) समिधा
(३) देवीरुत्
(४) तनूरसि
(५) वृत्रस्यासि
(६) कनीनकश्चक्षु:
(७) तच्छकेयम्
(८) प्रयत्यध्वरे
(९) स्वाहोरोरन्तरिक्षात्
(१०) वामारभे

## ८. सन्धिसंयोजनं कुरुत ।

(१) देवास: + अजुषन्त
(२) शुचि: + आपूत:
(३) चक्षु: + मे
(४) प्रयुजे + अग्नये
(५) आप: + देवी:
(६) शर्म्म + असि
(७) ऊर्क् + असि
(८) यजमानस्य + इन्द्रस्य
(९) सुमृडीकाम् + अभिष्टये
(१०) पीता: + भवत

**छात्र-प्रवृत्ति:**

- सस्वर-मन्त्राणां प्रतिदिनं पुनरावर्तनम् कर्तव्यम् ॥

**विशिष्टज्ञानम्**

- ''वयं राष्ट्रे जागृयामपुरोहिता:'' ॥

# ६ शुक्लयजुर्वेदः चतुर्थोऽध्यायः भागः-२

**प्रस्तावना**

**''यज्ञं व्याख्यास्यामः स त्रिभिर्वेदैः'' ( आप.श्रौ.सू )**

वेदत्रयसाध्यः अयं यज्ञः । अग्निहोत्रं तु यजुर्वेदेन एव साध्यते । दर्शपूर्णमासाद्या इष्टयः कैश्चिद्-ऋग्वेदयजुर्वेदाभ्यां कैश्चिद् यजुर्वेदेन एव अनुष्ठीयन्ते । पशुयागः ऋग्वेदयजुर्वेदाभ्यां सर्वैः एव क्रियते । सोमयागात्प्रभृत्येव वेदत्रयसंबन्धः । तत्र याजुषकर्मणि अध्वर्युगणः, हौत्रानुष्ठनाय होतृगणः, सामानुष्ठानाय उदगातृगणः, गणत्रये अनुष्ठीयमानकर्माविक्षणाय ब्रह्मगणः उपयुज्यते । तत्र सोमयागस्य येन साम्ना समाप्तिर्भवति तन्नाम्ना व्यवहारः । अग्निष्टोमसाम्ना यस्य समाप्तिः तस्य अग्निष्टोमेति संज्ञा । उक्थ्येन समाप्यमानत्वाद् उक्थ्यः । षोडशिसामनस्तोत्रेण समाप्यमानत्वाद् षोडशी । अतिरात्रसामस्तोत्रेण समाप्यमानत्वाद् अतिरात्रसंज्ञो यागो भवति । संख्याचतुष्टयविशिष्टस्य क्रतोः ज्योतिष्टोमेति संज्ञा भवति । त्रिवृत्, पञ्चदश,सप्तदश, एकविंशः इति चत्वारः स्तोमाः ज्योतिः पदेन अभिधीयन्ते । ज्योतिषि स्तोमा यस्य स ज्योतिष्टोमः । तत्रापि अग्निष्टोमादिवत् षोडशी न स्वतन्त्रः, किन्तु पृष्ठ्यषडहचतुर्थेऽहनि प्रयुज्यते । एतासामेव चतसृणां संस्थानां क्वचिदावापोद्वापादिना अपरास्तिस्रः संस्था अयत्यग्निष्टोमः, वाजपेयः आप्तोर्यामश्च सम्पद्यन्ते ॥



[अध्वर्युः वस्त्रादिना शालाद्वाराणि अपिधाय ध्रौवमाज्यं जुह्वां चतुर्गृहणाति ।]

---

**मन्त्रः-** **एषा तें शुक्क्र तनूरेतद्वर्च्चस्तया स्मभंव ब्भ्राजंङ्गच्छ । जूरंसि धृता मनंसा जुष्टा व्विष्ण्णंवे ॥१७॥**

**पदपाठः-** एषा । ते । शुक्क्र । तनूः । एतत् । व्वर्च्चंः । तयां । सम् । भव । भ्राजंम् । गच्छ ॥ जूः । असि । धृता । मनंसा । जुष्टां । व्विष्ण्णंवे ॥१७॥

**सरलार्थः-** ध्रुवास्थमाज्यं जुह्वांचतुर्गृहीत्वा तत्राज्ये दर्भतृणबद्धं स्वर्णं क्षिपेत् इति । हे शुक्लदीप्यमानाग्ने ! तव एषा तनूः दृश्यमानमाज्यं शरीरं वर्तते । आज्ये प्रक्षिप्यमाणं हिरण्यं त्वदीयं तेजः वर्तते । आज्यरूपया तन्वा एकीभव । हिरण्यगतां दीप्तिं प्राप्नुहि । एतन्मन्त्रपाठेन अग्नेःसतेजस्त्वं सतनुत्वं च सम्पद्यते । हे वाक्! त्वं वेगयुक्तासि। त्वं मनसा धृतासि । त्वं यज्ञार्थं प्रीतियुक्तासि ॥

[घृतात् स्वर्णखण्डं निष्कास्य तृणबद्धं स्वर्णं वेद्युपरि स्थापयेत् ।]

**मन्त्रः** **तस्यास्ते सत्यसवसः प्रसवे तन्वो यन्त्रमशीय स्वाहा । शुक्रमसि चन्द्रमस्यमृतमसि वैश्वदेवमसि ॥१८॥**

**पदपाठः-** तस्याः । ते । सत्यसवसऽइतिसत्य सवसः । प्रसवइतिप्र सवे । तन्वः । यन्त्रम् । अशीय । स्वाहा॥ शुक्रम् । असि । चन्द्रम् । अमृतम् । वैश्वदेवमितिवैश्व देवम् ॥१८॥

**सरलार्थः-** अवितथाभ्यनुज्ञायाः तथाविधायाः तव वाचः अनुज्ञायां वर्तमानोऽहं शरीरस्य नियमनं दाढ्र्यं प्राप्नुयाम् । इदमाज्यं सुहुतमस्तु । हे हिरण्य ! त्वं दीप्यमानमसि । आह्लादकमसि । विनाशरहितमसि । अग्निसंयोगेऽपि हिरण्यस्य विनाशाभावः प्रसिद्धः । वैश्वदेवमसि । सर्वोऽपि देवः हिरण्यदानेन तुष्येत् ॥

**मन्त्रः** **चिदसि मनासि धीरसि दक्षिणासि क्षत्रियासि यज्ञियास्यदितिरस्युभयतः - शीर्ष्णी । सा नः सुप्राची सुप्रतीच्येधि मित्रस्त्वा पदि बध्नीतामपूषाध्वनस्पात्विन्द्रायाध्यक्षाय ॥१९॥**

**पदपाठः-** चित् । मना । धीः । दक्षिणा । क्षत्रिया । यज्ञिया । अदितिः उभयतः शीर्ष्णीत्युभयतः शीर्ष्णी॥ सा । नः । सुप्राचीतिसु प्राची । सुप्रतीचीतिसु प्रतीची । एधि । मित्रः । त्वा । पदि । बध्नीताम्। पूषा । अध्वनः । पातु । इन्द्राय । अध्यक्षायेत्यधि अक्षाय ॥१९॥

**सरलार्थः-** हे वाग्देवतारूपे सोमक्रयणि । त्वं चित्तमनोबुद्धयः इति तिस्रो वृत्तयः असि । हे गोः । त्वं दक्षिणासि। सोमक्रय साधनत्वेन क्षत्रियासि । यज्ञसंबन्धित्वात् यज्ञार्हासि । देवमातृरूपासि । उभयतः ज्योतिष्टोमस्य आद्यन्तयोः प्रायणीय-उदयनीययोः सर्वतोमुखी असि । सा पूर्वोक्ता चिदादिरूपा त्वमस्माकं सप्राची सुप्रतीची च भव । सूर्यः अप्रणाशाय दक्षिणपादे त्वां बन्धनं करोतु । अध्यक्षाय इन्द्राय प्रीत्यर्थं पोषको देवः सूर्यः मार्गात् त्वां रक्षतु ॥

**मन्त्रः-** **अनु त्वा माता मन्यतामनु पितानु भ्राता सगर्भ्योनु सखा सयूथ्यः ।**

**सा देवि देवमच्छेहीन्द्राय सोमꣳ रुद्रस्त्वावर्त्तयतु स्वस्ति सोमसखा पुनरेहि ॥२०॥**

**पदपाठः-** अनु । त्वा । माता । मन्यताम् । पिता । भ्राता । सगर्भ्यऽइतिस गर्भ्यः । सखा । सयूथ्यऽइतिस यूथ्यः ॥ सा । देवि । देवम् । अच्छ । इहि । इन्द्राय । सोमम् । रुद्रः । त्वा । आ व वर्त्तयतु। स्वस्ति । सोमसखेतिसोम सखा । पुनः । आ इहि ॥२०॥

**सरलार्थः-** सोमाहरणे प्रवृत्ता त्वदीया जननी अनुज्ञां ददातु । पितानुमन्यताम् । भ्रातानुमन्यताम् । सगर्भ्योऽनुमन्यताम्। सयूथ्यः अनुमन्यताम् । वत्सः अनुमन्यताम् । हे देवि ! सोमक्रयणि त्वमिन्द्राय सोमं प्राप्तुं गच्छ । रुद्रः त्वाम् अस्मान् प्रति निवर्तयतु । अविनाशेन क्षेमेण सोमसखा पुनः आगच्छ ॥

**मन्त्रः-** **वस्व्यस्यदितिरस्यादित्यासि रुद्रासि चन्द्रासि । बृहस्पतिष्ट्वा सुम्ने रम्णातु रुद्रो वसुभिराचके ॥२१॥**

**पदपाठः-** वस्वी । असि । अदितिः । आदित्या । रुद्रा । चन्द्रा ॥ बृहस्पतिः । त्वा । सुम्ने । रम्णातु। रुद्रः । वसुभिरितिवसु भिः । आ चके ॥२१॥

**सरलार्थः-** उदीचीं नीयमानाम् अनुगच्छसि । हे गौः ! त्वं वसुरूपासि । अदितिर्देवमातासि । द्वादशादित्य-रूपासि। एकादशरुद्ररूपासि । चन्द्ररूपासि । बृहस्पतिः त्वां सुखे रमयतु । वसुभिः अष्टदेवैः सहितः रुद्रः त्वां रक्षितुं कामयताम् ॥

**मन्त्रः-** **अदित्यास्त्वा मूर्द्धन्नाजिघर्मि देवयजने पृथिव्याऽइडायास्पदमसि घृतवत्स्वाहा । अस्मे रमस्वास्मे ते बन्धुस्त्वे रायो मे रायो मा वयꣳ रायस्पोषेण वियौष्म तोतो राय- ॥२२॥**

**पदपाठः-** अदि॑त्या॒ः । त्वा॒ । मू॒र्द्धन् । आ । जि॒घ॒र्म्मि॒ । दे॒व॒यज॑न॒ऽइति॑दे॒व यज॑ने । पृ॒थि॒व्व्या । इडा॑या॒ः । प॒दम्। अ॒सि॒ । घृ॒तव॑दिति॑घृ॒त व्व॑त् । स्वाहा॑ ॥ अ॒स्म्मेऽइत्त्य॒स्म्मे । र॒म॒स्व॒ । अ॒स्म्मेऽइत्त्य॒स्म्मे । ते॒ । बन्धु॑ः। त्वेऽइति॒त्त्वे । राय॑ः । मेऽइति॒मे । राय॑ः । मा । व्वयम् । रा॒य॒ः । पोषे॑ण । व्वि । यौ॒ष्म्म॒ । तोत॑ः। राय॑ ः ॥२२॥

**सरलार्थः-** अखण्डिताया: पृथिव्या: मूर्धनि देवानां यागयोगस्थ हे आज्य ! त्वामहम् आक्षारयामि । हे स्थानविशेष। त्वं गो: पदमसि । तत्पदं घृतयुक्तं कर्तुं जुहोमि । हे गो: पद ! त्वमस्मासु क्रीडां कुरु । हे सोमक्रयणी पद ! तव वयं बन्धुभूता: स्म: । यजमानाय पदं प्रयच्छति । हे यजमान ! त्वयि धनानि एतत् पदरूपेण तिष्ठन्तु । यजमान: प्रतिगृह्णाति । मयि धनानि पदरूपेण तिष्ठन्तु । वयम् अध्वर्युप्रभृतय: धनस्य पुष्ट्या वियुक्ता मा भवाम: । हत्वा पत्न्यै पदं प्रयच्छति । कलत्रे धनानि पशव: वा पदरूपेण तिष्ठन्तु ॥

मन्त्रः **सम॑क्ख्ये दे॒व्व्या धि॒या सन्द॑क्षि॒णयो॒रुच॑क्षसा । मा म॒ऽआयु॒ः प्रमो॑षी॒र्म्मोऽअ॒हन्तव॑ व्वी॒रँव्वि॑दे॒य तव॑ देवि स॒न्दृशि॑ ॥२३॥**

**पदपाठः-** सम् । अ॒क्ख्ये॒ । दे॒व्वया । धि॒या । सम् । द॒क्क्षि॑णया । उ॒रुच॑क्क्ष॒सेत्त्यु॒रु च॑क्क्षसा ॥ मा । मे॒ । आयु॑ः । प्र । मो॒षी॒ः । मोऽइति॒मो । अ॒हम् । तव॑ । व्वीरम् । व्वि॒दे॒य॒ । तव॑ । दे॒वि॒ । स॒न्दृशीति॑स॒म् दृशि॑ ॥२३॥

**सरलार्थः-** हे सोमक्रयणि ! द्योतमानया त्वया बुद्धिपूर्वकम् अहं समख्ये । दक्षिणात्वयोग्यया विस्तीर्णदर्शनया एवं-विद्या त्वं मम पत्न्या: आयु: मा खण्डय । अहमपि तव सोमक्रयण्या: आयु: न नाशयामि । हे देवि गौ: । तव संदर्शने सति वीरं पुत्रं लभेय ॥

**मन्त्रः-** **ए॒ष ते॑ गाय॒त्रो भा॒गऽइति॑ मे॒ सोमा॑य ब्बूतादे॒ष ते॒ त्रैष्टु॑भौ भा॒गऽइति॑ मे॒ सोमा॑य ब्बूतादे॒ष ते॒ जाग॑तो भा॒गऽइति॑ मे॒ सोमा॑य ब्बूताच्छन्दोना॒माना॒ᳪं साम्म्रा॑ज्य॒ङ्गच्छेति॑ मे॒ सोमा॑य ब्बूतादास्म्मा॒को॒सि शु॒क्क्रस्ते॒ ग्ग्रह्यो॑ व्वि॒चित॑स्त्त्वा॒ व्विचि॑न्न्वन्तु ॥२४॥**

**पदपाठः-** ए॒षः । ते॒ । गा॒य॒त्रः । भा॒गः । इति॑ । मे॒ । सोमा॑य । ब्रू॒तात् । त्रैष्टु॑भः । त्रैस्तु॑भ॒ऽइति॒त्त्रैस्तु॑भः। जाग॑तः । छ॒न्द्रोना॒म॒नामिति॑च्छन्द॑ः नामाना॑म् । साम्म्रा॑ज्य॒मिति॒साम् रा॑ज्यम् । ग॒च्छ॒ । आ॒स्म्मा॒कः । अ॒सि॒। शु॒क्क्रः । ते॒ । ग्रहष । व्वि॒चित॒ऽति॑वि चित॑ः । त्वा॒ । व्वि । चि॒न्व॒न्तु॒ ॥२४॥

**सरलार्थः-** यजमान: मन्त्र-चतुष्टयं पठेत् । हे अध्वर्यो ! सोमाभिमानिने देवाय मे वच: ब्रूतात् । हे सोम ! तव एष: दृश्यमान: भाग: गायत्र: । त्वं मम अभिप्राय: सोमाय कथय । तव एष: त्रिष्टुप् छन्दस: सम्बन्धिनी भाग: इति ममाभिप्रायमध्वर्यो सोमाय त्वं ब्रूहि । जगतीच्छन्दस: भाग: इति मे वच: सोमाय कथय । अन्येषाम् उष्णिगादीनां सर्वेषां छन्दसाम् आधिपत्यं प्राप्नुहि इति मे वच: सोमाय कथय । य: सोमाय छन्दसामाधिपत्यं दत्वा क्रीणाति स: स्वानाधिपत्यं प्राप्नोति । हे सोम ! त्वं क्रयपथमागत: असि । शुक्रादय: सर्वे ग्रहा: विवेकेन विचिन्वन्ति । सारासारविवेकं कृत्वा सारभूतसमूहयतु ॥

**मन्त्रः-** **अ॒भि त्यन्दे॒वᳪ स॑वि॒तार॑मो॒ण्ण्यो॒ः कविक्क्र॑तु॒मर्च्चा॑मि स॒त्त्यस॑वᳪ रत्न॒धाम॒भि प्प्रि॒यम्म॒तिङ्क॒विम् । ऊ॒र्द्ध्वा ष॒स्याम॒तिर्भा॒ऽअदि॑द्द्युतत्त्सवी॑मनि हिर॑ण्ण्यपाणिरमिमीत सु॒क्क्रतु॑ः कृ॒पा स्व॑ः । प्र॒जाब्भ्य॑स्त्त्वा प्प्र॒जास्त्त्वा॑नु॒प्प्राण॑न्तु प्प्र॒जास्त्त्वम॑नु॒प्प्राणि॑हि ॥२५॥**

**पदपाठः-** अ॒भि । त्यम् । दे॒वम् । स॒वि॒तार॑म् । ओ॒ण्यो॒ः । क॒विक्क्र॑तु॒मिति॑कवि क्र॑तुम् । अर्च्चा॑मि । स॒त्त्यस॑व॒मिति॑स॒त्त्य स॑वम्। र॒त्न॒धामिति॑रत्न॒न धाम् । अ॒भि । प्रि॒यम् । म॒तिम्। क॒विम् ॥ ऊ॒र्द्ध्वा । यस्य॑ । अ॒मति॑ ः। भाः । अदि॑द्द्युतत् । सवी॑मनि । हरि॑ण्यपाणि॒रि॒ति॒हिर॑ण्य पाणि॑ः । अ॒मि॒मी॒त॒ । सु॒क्क्रतु॒रिति॑सु॒ क्रतु॑ ः। कृ॒पा । स्व॒रि॒ति॒स्व॒ ः ॥ प्र॒जाब्भ्य॒ऽइति॑प्प्र जाब्भ्य॑ः । त्वा॒ । प्र॒जा॒ऽइति॑प्प्र जा॒ः । त्वा॒ । अ॒नु॒प्प्रा॒ण॒न्त्वि॒त्त्य॑नु प्राण॑न्तु । प्र॒जा॒ऽइति॑प्प्र जा॒ः । त्वम् । अ॒नु॒प्रा॒णि॒हीत्त्य॑नु प्राणि॑हि ॥२६॥

**सरलार्थः-** सवितारं देवं मेधाविकर्मणाम् अवितथ-प्रेरणं रत्नधां प्रीतिविषयं मननयोग्यं क्रान्तदर्शनम् च अभिपूजयामि। यस्य सवितुः दीप्तिः केनापि मातुमशक्त्या सती गगनाभिमुखीं गगनप्रदेशे सर्वाणि वस्तूनि द्योतयन्ते । यस्य सौवर्णाभरणयुक्तहस्तः साधुसंकल्पः हे सोम ! प्रजास्त्वामनुप्राणन्तु । त्वामनुसृत्य सर्वाः प्रजाः श्वासं कुर्वन्तु। हे सोम ! प्रजाः अनुश्वासं कुर्वतीः । प्रजानां तव कदाचित् श्वासरोधो मा भूत् । परस्परं अनुसृत्य जीवनं भवतु ॥

**मन्त्रः-** **शुक्रन्त्वा शुक्रेण क्रीणामि चन्द्रञ्चन्द्रेणामृतममृतेन । सग्गमे ते गोरस्मे ते चन्द्राणि तपसस्तनूरसि प्रजापतेर्वर्ण्ण- परमेण पशुना क्रीयसे सहस्रपोषम्पुषेयम् ॥२६॥**

**पदपाठः-** शुक्रम् । त्वा । शुक्रेण । क्रीणामि । चन्द्रम् । चन्द्रेण । अमृतम । अमृतेन ॥ सग्गमे । ते गो। अस्म्मेइत्त्यस्म्मे । ते । चन्द्राणि । तपस । तनूः । असि । प्रजापतेरितिप्रजा पतेः । व्वर्ण÷ । परमेण। पशुना । क्रीयसे । सहस्रपोषमितिसहस्त्र पोषम् । पुषेयम् ॥२६॥

**सरलार्थः-** हे सोम ! दीव्यमानं त्वां शुक्रेण दीप्यमानेन हिरण्येन क्रीणामि । चन्द्रम् आह्लादकरेण क्रीणामि । अमृतम् अमृतेन क्रीणामि । हे सोमविक्रयिन् गोः ! सोमतुल्यत्वेन तुभ्यं दत्त्वा सा त्वदीया गौः पुनः प्रत्यावृत्य यजमाने तिष्ठतु । हरिण्यमेव तवास्तु गौर्मा भूत् । हे सोम विक्रयिन् ! ते चन्द्राणि तुभ्यं दत्तानि यानि हिरण्यानि तानि अस्मासु प्रत्यावृत्य तिष्ठन्तु । तव गौः एव सोममूल्यमस्तु हिरण्यानि मा भूत् । हे अजे! त्वं पुष्पस्य देहोऽसि । त्वं प्रजापतेर्देऽहोसि । हे सोम ! पशुना उत्तमेन अजालक्षणेन पशुना त्वं क्रीयसे, अतः तव प्रसादात् देहोऽसि पुत्रपशवादि-प्रजापतेर्देहोऽसि सहस्राणां पुष्टो भूयासम् ॥

**मन्त्रः-** **मित्रो नऽएहि सुमित्रधऽइन्द्रस्योरुमाविश दक्षिणमुशन्नुशन्तथं स्योनः स्योनम् । स्वान ब्भ्राजाङ्घारे बम्भारे हस्त सुहस्त कृशानवेते व ÷ सोमक्क्रयणास्तान्रक्षध्वम्मा वो दभन् ॥२७॥**

**पदपाठः-** मित्रः । नः । आ । इहि । सुमित्रधऽइतिसु मित्रधः । इन्द्रस्य । ऊरुम् । आ । व्विश । दक्क्षिणम्। उशन् । उशन्तम् । स्योनः । स्योनम् ॥ स्वान । भ्राज । अङ्घारे । बम्भारे । हस्त । सुहस्तेतिसु हस्त । कृशानोऽइति कृशानो । एते । व्वः । सोमक्क्रयणाऽइतिसोम क्रयणा । तान् । रक्क्षद्ध्वम् । मा । व्वः । दभन् ॥२७॥

**सरलार्थः-** हे सोम ! त्वमस्माकं मित्रः प्रीतियुक्तो भूत्वा शोभनानां मित्रधारकःसन् आगच्छ । क्रीत्वा वाससा बद्धस्य सोमस्य वरुण-देवताकत्वेन क्रूरत्वात् शान्त्यर्थं मित्रत्वेन प्राथ्र्यते । हे सोम ! त्वमिद्रस्य यजमानस्य दक्षिणमूरूमुपविश । हे स्थानादोधिष्ण्याधिष्ठातारः सप्तदेवाः । युष्माकं सोमक्रयणान् हिरणदिपदार्थाः पुरतः स्थापिताः । तान् पदार्थान् यूयं रक्षध्वम् । स्वानः, भ्राजः अंधारम्, बम्भारिः , हस्तः, सुहस्तः, कृशानुः एते स्वानादयः सप्तदेवाः सोमरक्षकाः भवन्ति । एते होतृकाः अपि स्वानभ्राजादयः युष्मान् मा दभन् ॥

**मन्त्रः-** **परि माग्ग्ने दुश्च्चरिताद्बाधस्वा मा सुचरिते भज । उदायुषा स्वायुषोदस्थाममृताँ॥ऽअनु ॥२८॥**

**पदपाठः-** परि । मा । अग्ग्ने । दुश्च्चरितादितिदुः चरितात् । बाधस्व । आ । मा । सुचरितऽइतिसु चरिते । भज ॥ उत् । आयुषा । स्वायुषेतिसु आयुषा । उत् । अस्थाम् । अमृतान् । अनु ॥२८॥

**सरलार्थः-** हे भगवन्नग्ने ! पापात् मां परितो निवारय । मे पापे प्रवृत्तिर्मा भूत् । शोभने चरिते सदाचाररूपे पुष्ये मां यजमानं सर्वतो भज । उत्कृष्टेन चिरजीवनलक्षणेन आयुषा यागदानादिना शोभनेन स्वायुषा च सोमादिदेवान् अनुसृत्य अहम् उत्थितवानस्मि ॥

**मन्त्रः-** **प्रति पन्थामपद्महि स्वस्तिगामनेहसम् ।**

**येन व्विश्श्वाः परि द्विषो व्वृणक्त्ति व्विन्दते व्वसु ॥२९॥**

**पदपाठः-** प्रति॑ । पन्था॑म् । अ॒प॒द्म॒हि । स्व॒स्ति॒गामिति॑स्वस्ति ग्राम् । अ॒ने॒हस॑म् ॥ षेन॑ । व्विश्वा॑ः । परि॑ । द्विष॑ः । व्वृ॒णक्ति॑ । व्विन्दते॑ । व्वसु॑ ॥२९॥

**सरलार्थः-** क्षेमेण गन्तुं योग्यम्, चोरादिबाधो न विद्यते यत्र तादृशम्, यत्र गतानामपराधो न भवति, येन पथा गच्छन् पुरुषः सर्वान् शत्रून् परिवर्जयति, धनं च लभते । तादृशं मार्गं वयं प्राप्ताः अभूम ॥

**मन्त्रः-** **अदि॑त्त्यास्त्वग॒स्यदि॑त्यै सद॒ऽआसी॑द । अस्त॑भ्ना॒द्याँवृ॑ष॒भोऽअ॒न्तरि॑क्षममि॑मीत व्वरि॒माण॑म्पृथि॒व्याः । आसी॑द॒द्विश्श्वा॒ भुव॑नानि स॒म्म्राड्विश्वेत्तानि॒ वरु॑णस्य व्व्र॒तानि॑ ॥३०॥**

**पदपाठः-** अदि॑त्याः । त्वक् । अ॒सि॒ । अदि॑त्यै । सद॑ः । आ । सी॒द॒ ॥ अस्त॑भ्नत् । द्याम् । व्वृ॒ष॒भः । अ॒न्तरि॑क्क्षम् । अमि॑मीत । व्व॒रिमाण॑म् । पृ॒थि॒व्याः ॥ आ । अ॒सी॒द॒त् । विश्श्वा॑ । भुव॑नानि । स॒म्म्राडिति॑सम्राट् । विश्श्वा॑ । इत् । तानि॑ । व्वरुणस्य । व्व्र॒तानि॑ ॥३०॥

**सरलार्थः-** हे कृष्णाजिन ! त्वमखण्डितायाः पृथिव्याः त्वक्रूपं भवसि तस्मिन् सोमं निदधाति । हे सोम ! त्वं भूमेः संबन्धिस्थानं सर्वतः प्राप्नुहि । तत्रोपविश इत्यर्थः । हे वरुणदेवते ! क्रीतसोमस्य वरुणदेवताकत्वात् वरुणः ब्रह्मरूपेण स्तूयते । श्रेष्ठः वरुणः स्वकीयया आज्ञया द्युलोकं स्तम्भितवान् । सर्वप्राणिरक्षणाय अन्तरिक्षमपि अस्तभ्नात् । तथा पृथिव्याः वरिमाणं गुरुत्वं परिमाणमहत्वं जानाति । लोकत्रयेऽपि राजमानो वरुणः सर्वाणि भुवनानि व्याप्नोति । इत्थं तानि द्युलोकस्तम्भनादीनि वरुणस्य व्रतानि विश्वानि भुवनानि आत्मत्वेन आधिपत्येन प्राप्नोति ।

**मन्त्रः-** **व्वने॑षु॒ व्व्यू॒न्तरि॑क्क्षन्ततान॒ व्वाज॒मर्व्व॑त्त्सु॒ पय॑ऽउस्त्रिया॑सु । हृ॒त्त्सु क्क्रतुँ॒व्वरु॑णो व्वि॒क्क्ष्व॒ग्गिन्दि॒वि सूर्य्य॑मदधा॒त्सोम॒मद्रौ॑ ॥३१॥**

**पदपाठः-** व्वने॑षु । व्वि । अ॒न्तरि॑क्क्षम् । त॒ता॒न॒ । व्वाज॑म् । अर्व्व॑त्स्वित्यर्व्व॑त् सु । पय॑ः । उ॒स्त्रिया॑सु ॥ हृ॒त्स्विति॑हृ॒त् सु । क्रतु॑म् । व्वरु॑णः । व्विक्क्षु । अ॒ग्गिनम् । दि॒वि । सूर्य्य॑म् । अ॒द॒धा॒त् । सोम॑म् । अद्रौ॑ ॥३१॥

**सरलार्थः-** वरुणः वनगतवृक्षाग्रेषु आकाशं वितताव । पुरुषेषु वीर्यं ततान । गोषु पयः ततान । हृदयेषु सङ्कल्पं वितताव। प्रजासु अग्निं वितताव । द्युलोके सूर्यं स्थापितवान् । भूभृत्सु सोमं स्थापितवान् । एवं परब्रह्मलक्षणम् वरुणः तं वयं स्तुमः ॥

**मन्त्रः-** **सूर्य्य॑स्य॒ चक्क्षु॒रारो॑हा॒ग्ग्नेर॒क्क्षणः॒ क॒नीन॑कम् ।**

**यत्रै॑त॑शेभि॒रीय॑से॒ ब्भ्राज॑मानो व्विप॒श्चिच्चता॑ ॥३२॥**

**पदपाठः-** सूर्य्य॑स्य । चक्क्षु॑ः । आ रो॒ह॒ । अ॒ग्ग्नेः । अ॒क्क्ष्णः । क॒नीन॑कम् ॥ षत्र॑ । ए॒त॑शेभिः । ईय॑से । भ्राज॑मानः । वि॒प॒श्चिश्श्चतेति॑विपः चिता॑ ॥३२॥

**सरलार्थः-** हे कृष्णाजिन ! त्वं सूर्यस्य नेत्रं वह्नेः नेत्रस्य कनीनकं तारकां च आरोह । यस्मिन् एतयो दर्शने विदुषा सर्वज्ञेन - सूर्येणाग्निना च सहितः दीप्यमानः अश्वैः त्वं गच्छासि ॥

**मन्त्रः-** **उस्त्रा॒वेत॑न्धूर्षाहौ यु॒ज्ज्येथा॑मन॒श्श्रूऽअवी॑रहणौ ब्रह्म॒चोद॑नो । स्व॒स्ति यज॑मानस्य गृ॒हान्ग॑च्छतम् ॥ ३३ ॥**

**पदपाठः-** उस्त्रौ॑ । आ इ॒त॒म् । धू॒र्षा॒हौ॒ । धूः॒स॒हा॒विति॒धूः सहौ । यु॒ज्ज्येथा॑म् । अ॒न॒श्श्रूऽइत्त्य॑नश्श्रू । अवी॑रहणौ । अवी॑रह॒णा॒वित्त्यवीर हनौ । ब्र॒ह्म्म॒चोद॑ना॒विति॑ब्रह्म्म॒ चोद॑नौ॑ ॥ स्व॒स्ति । यज॑मानस्य । गृ॒हान्। ग॒च्छ॒त॒म् ॥३३॥

**सरलार्थः-** हे उस्त्रौ अनड्वाहौ ! युवाम् एत्तमागच्छतम् । स्वयमेव रथे युक्तौ भवतम्। शकटधुरं वोढुं समर्थौ, नेत्रयोः अश्रुरहितौ, न वीरान्हतस्तौ, शृङ्गादिभिः वीराणां शिशूनां हननम् अकुर्वाणौ, ब्राह्मणानां यज्ञं प्रति प्रेरकौ तथाविधौ युवां क्षेमेण यजमानस्य गृहान्प्रति गच्छतम् ॥

**मन्त्रः-** **भद्रोमेसिप्रच्च्यवस्वभुवस्पतेविश्वश्वान्यभिधामानि । मात्त्वापरिपरिणोव्विदन्मात्त्वापरिपन्थिनोव्विदन्मात्त्वा व्वृकाऽअघायवोव्विदन् । श्येनोभूत्त्वापरापतयजमानस्यगृहान्गच्छतन्नौसँस्कृतम् ॥३४॥**

**पदपाठः-** भद्रः । मे । असि । प्र । च्यवस्य । भुवः । पते । विश्श्वानि ॥ अभि । धामानि । मा । त्वा। परिपरिणऽइति - परि परिणः । व्विदन् । परिपन्थिनऽइतिपरि पन्थिनः । व्वृकाः । अघायवः । अघयवऽइत्त्यघ यवः ॥ श्येनः । भूत्वा । परा । पत । यजमानस्य । गृहान् । गच्छ । तत् । नौ। सँस्कृतम् ॥३४॥

**सरलार्थः-** हे सोम ! मह्यं यजमानाय मदुपकारार्थं त्वं कल्याणरूपोऽसि । हे भुवःपते ! सर्वाणि स्थानानि पत्नीशालाहविर्धानप्रभृतीनि अभिलक्ष्य प्रकर्षेण गच्छ । त्वां प्रच्यवमानं मा जानन्तु । परिपरिणः (सर्वतः संचरन्तः तस्कर-विशेषाः परिपरिणः उच्यन्ते) त्वां मा जानन्तु । परिपन्थिनः (यागस्य प्रतिषेधकाः शत्रवः) त्वां मा विदन् । वृकाः (विकर्तनशीला आश्येनाख्यश्वानो दुर्जनाः वा) त्वां मा विदन् । अघायवः (परस्याघं कर्तुमिच्छन्ति ते अघायवः) त्वां मा विदन् मारज्यश्वानो श्येनारख्य-पक्षिवत् (बाजपक्षी) शीघ्रगामी भूत्वा उत्पत । यजमानस्य गृहान्गच्छ । तत्र यजमानगृहेषु अजयोः सर्वोपकरणं संयुक्तं स्थानमस्ति ॥

**मन्त्रः-** **नमो मित्रस्य व्वरुणस्य चक्क्षसे महो देवाय तदृतꣳ सपर्ष्यत ।**

**दूरेदृशे देवजाताय केतवे दिवस्पुत्राय सूर्षाय शꣳसत ॥३६॥**

**पदपाठः-** नमः । मित्रस्य । व्वरुणस्य । चक्क्षसे । महः । देवाय । तत् । ऋतम् । सपर्य्यत ॥ दूरेदृशऽइतिदूरे दृशे । देवजातायेतिदेव जाताय । केतवे । दिवः । पुत्राय । सूर्य्याय । शꣳसत ॥३६॥

**सरलार्थः-** मित्राय वरुणाय जगतां हितकारिणे चक्षुष्मते महसे तेजोरूपाय देवाय दूरेदृशे देवजाताय प्रज्ञारूपाय दिवस्पुत्राय एवं विधाय सूर्याय तदृतं सत्यमवश्यफलप्रद-ज्योतिष्टोमरूपं कर्म हे ऋत्विजः ! यूयम् अनुष्ठानेन सपर्यां कुरुत । (सूर्यप्रीत्यर्थं यज्ञं कुरुत) स्तुति कुरुत इत्यर्थः ॥

**मन्त्रः-** **व्वरुणस्योत्तम्भनमसि व्वरुणस्य स्क्कम्भसर्ज्जनी स्थो व्वरुणस्यऽऋतसदन्यसि व्वरुणस्य ऽऋतसदनमसि व्वरुणस्यऽऋतसदनमासीद ॥३६॥**

**पदपाठः-** व्वरुणस्य । उत्तम्भनम् । असि । स्कम्भसर्ज्जनीऽइतिस्कम्भ सर्ज्जनी । स्थः । ऋतसदनीत्त्यृत सदनी। ऋतसदनमित्त्यृत सदनम् । आ । सीद ॥३६॥

**सरलार्थः-** हे काष्ठ ! त्वं वस्त्रबद्धस्य सोमस्य उन्नमनं भवसि । हे शम्ये ! युवां वरुणस्य स्कम्भसर्जनी स्थः । हे आसन्दि ! त्वं वरुणस्य संबन्धिनी ऋतसदन्यसि । हे कृष्णाजिन ! बद्धस्य सोमस्य यज्ञार्थमुपवेशन-स्थानं त्वमसि । हे सोम ! त्वं वस्त्रबद्धस्य सोमस्य तव यज्ञार्थमुपवेशनस्थानभूतम् आसन्दी संस्थितं कृष्णाजिनं सुखेनोपविश ॥

**मन्त्रः-** **या तेधामानिहविषायजन्तिता तेविश्श्वापरिभूरस्तुयज्ज्ञम् । गयस्फानःप्रतरणःसुवीरोवीरहाप्रचरासोम दुर्य्यान् ॥३७॥**

**पदपाठः-** या । ते । धामानि । हविषा । यजन्ति । ता । ते । व्विश्श्वा । परिभूरितिपरि भूः । अस्तु । यज्ञम्॥ गयस्फानऽइतिगय स्फानः । प्रतरणऽइतिप्र तरणः । सुवीरऽइतिसु वीरः । अवीरहेत्त्यवीर हा । प्र। चर । सोम । दुर्य्यान् ॥३७॥

**सरलार्थः-** हे सोम ! तव यानि धामानि प्रातः सवनादीनि स्थानानि प्राप्य त्वदीयरसरूपेण ऋत्विजः यागं कुर्वन्ति। तव तानि सर्वाणि स्थानानि परितः प्राप्नोति । भवान् परितः प्राप्तवान् भवतु । ऋत्विजः येषु स्थानेषु यजन्ति तानि त्वं प्राप्नुहि । हे सोम ! त्वं गृहान् प्राप्नुहि । गयस्फानः, प्रतरणः, सुवीरः, अवीरहा एतानि सोमस्य विशेषणानि सन्ति ॥

## शब्दार्थाः

**ध्रुवा** – होमसाधनभूता स्त्रुक्र, **जुहूः** – पलाशवृक्षकाष्ठनिर्मिता होमसाधनभूता स्त्रुक्, **शुक्रम्** – दीप्यमानम्, **चन्द्रम्** – आह्लादकम् , **अनुमन्यताम्** – अनुज्ञां ददातु, **स्वस्ति** – क्षेमेण, **रमस्व** – क्रीडां कुरु, **ग्रह्यः** – शुक्रादयो ग्रहाः, **कविम्** – क्रान्तदर्शनम्, **क्रीणाति** – क्रीतं करोमि, **पुषेयम्** – वर्धयेयम्, **भ्राजते** – शोभते, **स्योनः** – सुखभूतः, **दुश्चरितात्** – पापात्, **अस्तभ्नात्** – स्तम्भितवान्, **एतशेभिः** – अश्वैः, **भ्राजमानः** – दीप्यमानः, **भद्रः** – कल्याणम्, **शंसत** – स्तुतिं कुरुत, **कृष्णाजिनः** – कृष्णमृगचर्मासनम् , **दुर्यान्** – गृहान् ॥

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उतरं ददतु ।**

(१) जुह्वायां घृतं प्रयूर्य तस्मिन् किं प्रक्षेपणीयम् ?

(क) रजतम् (ख) काँस्यम् (ग) स्वर्णम् (घ) ताम्रम्

(२) ''चन्द्ररूपा'' का अस्ति ?

(क) गावः (ख) मातरः (ग) पृथिवी (घ) रात्रिः

(३) ''अदिति'' इत्यस्य कोऽर्थः ?

(क) देवमाता (ख) दानवमाता (ग) पृथिवी (घ) स्वमाता

(४) वीरं पुत्रं कया रीत्या लभेय ?

(क) धेनोःसंदर्शने सति (ख) यज्ञेन (ग) स्तुत्या (घ) याचनया

(५) पुण्यस्य देहः का अस्ति ?

(क) सोमलता (ख) अजा (ग) मार्जारी (घ) पृथिवी

(६) यजमानस्य दक्षिणमुरूं कः उपविशति ?

(क) सोम (ख) वरुणः (ग) कामदेवः (घ) सूर्यः

(७) पापात् सर्वतः कः निवारयति ?

(क) प्रजापतिः (ख) अग्निः (ग) बृहस्पतिः (घ) शिवः

(८) अखण्डितायाः पृथिव्याः त्वक्रूपेण कः अस्ति ?

(क) यजमानः (ख) ब्राह्मणः (ग) क्षत्रियः (घ) कृष्णाजिनः

(९) गोषु पयः कः वितितान ?

(क) वरुणः (ख) आदित्यः (ग) विष्णुः (घ) गणेशः

(१०) सूर्यप्रीत्यर्थं स्तुतिं के कुर्वन्ति ?

(क) यजमानाः (ख) ऋत्विजः (ग) भक्ताः (घ) देवाः

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) ध्रुवास्थभाज्यं जुह्वां कतिवारं ग्रहणीयम् ?

(२) हिरण्यं कीदृशम् अस्ति ?

(३) द्वादशादित्यस्वरूपा का अस्ति ?

(४) पदरूपेण के तिष्ठन्तु ?

(५) ''मम पत्न्याः आयुः मा खण्डय'' इति वाक्यं कः वदति ?

(६) ''मेधाविकर्मणाम्'' ''अवितथप्रेरणम्'' इत्यादि विशेषणं कस्य अस्ति ?

(७) हिरण्यं कः स्पृशति ?

(८) ''शुक्र'' शब्दस्य कोऽर्थः ?

(९) ''मित्रः'' शब्दस्य कोऽर्थः ?

(१०) ''वरुणः'' इत्यस्य कोऽर्थः ?

**३. अधोलिखितानां कण्डिकानां भावार्थो लेख्यः ।**

(१) एषातेंशुक्रतनूरेतद्वर्च्चस्तयासम्भंवब्भ्राजंङ्गच्छ । जूरंसिधृतामनंसाजुष्टाविष्ण्णंवे ॥

(२) व्वस्व्यस्यदिंतिरस्यादित्यासिंरुद्रासिचन्द्रासि । बृहस्प्पतिंष्ट्वासुम्म्नेरंम्मणातुरुद्रोव्वसुंभिराचके॥

(३) प्रतिपन्थांमपभहिस्वस्तिगामंनेहसंम् । येनविश्श्वाः परिद्विषोंव्वृणक्ति विन्दतेव्वसु ॥

**४. अधोलिखितानां कण्डिकानां पूर्तिः विधेया ।**

(१) तस्यास्ते. ।

(२) समक्ख्ये. ।

(३) सूर्य्यस्यचक्षुः ।

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) दीप्यमानाग्ने | (६) अस्मान् |
| (२) अनुज्ञायाः | (७) मूर्धनि |
| (३) हिरण्यदानेन | (८) सर्वाणि |
| (४) आद्यन्तयोः | (९) हे अजे |
| (५) मार्गात् | (१०) स्वायुषा |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

| | |
|---|---|
| (१) क्षिपेत् | (६) क्रीणामि |
| (२) प्राप्नुयाम | (७) अभूम |
| (३) रक्षतु | (८) प्राप्नोति |
| (४) कथय | (९) गच्छसि |
| (५) द्योतयन्ते | (१०) भवतम् |

७. **सन्धिविच्छेदनं कुरुत ।**

(१) तनुरेतत्
(२) यन्त्रमशीय
(३) चिदसि
(४) सुप्रतीच्येधि
(५) पूषाध्वनः
(६) अच्छेहीन्द्राय
(७) पुनरेहि
(८) मूर्द्धभाजिघर्म्मि
(९) आस्माकोसि
(१०) स्वायुषा

८. **सन्धिसंयोजनं कुरुत ।**

(१) वैश्वदेवम् + असि
(२) मित्रः + त्वा
(३) वस्वि + असि
(४) तोतः + रायः
(५) सम् + अख्ये
(६) एषः + ते
(७) अमतिः + भाः
(८) नः + एहि
(९) मा + अग्ने
(१०) विक्षु + अग्निम्

**छात्र-प्रवृत्तिः**

- सोमयागस्य कुण्डमण्डपसिद्धिः कथं भवतीति सपरिमाणं सचित्रं च चित्रणीयम् ॥

**विशिष्टज्ञानम्**

- आब्रह्मन्ब्राह्मणोब्रह्मवर्च्चसीजायाताम् ॥

●

# ७ शुक्लयजुर्वेदीयः पञ्चमोऽध्यायः भागः-१

## प्रस्तावना

''**प्रवर्ग्य**'' इति कर्मणो नाम-धेयम् । स च सोमयागाङ्गभूत एव । तैत्तिरीयसहितायां ब्राह्मणे वा नास्य मन्त्रा ब्राह्मणानि वा आम्नायन्ते तैत्तिरीयारण्यके परं चतुर्थपञ्चमयोः प्रश्नयोः क्रमेण मन्त्रा विधयश्चाम्नाताः । काण्वमाध्यन्दिनयोः संहितयोः षट्त्रिंशादिषु त्रिष्वध्यायेषु मन्त्राः तच्छतपथयोः षोडशे त्रयोदशे च काण्डे विधयश्च यथाक्रममाम्नाताः । एवं मैत्रायण्यादिष्वपि शाखासु स्वतन्त्रतयैव प्रवर्ग्यविधि मन्त्राः पठिताः । सूत्रकारा अपि प्रग्वर्यविधिं सौमिकप्रयोगेऽनन्तर्भाव्य स्वतन्त्रतस्तं पठन्ति, तथापि सर्वे तस्य सोमयागाङ्गत्वमभिप्रयन्ति क्वचिद् प्रयोगविशेषे विकल्पयन्तः । अनुष्ठातारः परं नियमेन सोमयागमध्य एव अनुतिष्ठन्ति । अतोऽत्रैव तत्स्वरूपमपि निरूप्यते । तदपेक्षितानि पात्राणि साधनानि च पूर्वमेव सम्पादनीयानि ॥

''**प्रवर्ग्यसम्भारा**'' तत्र प्रथमतो महावीराख्यपात्रनिर्माणं कर्त्तव्यम् तत्प्रकारश्चेत्थम्, कस्यांचिदमावास्यायां पूर्णिमायां वा अभ्रिम्, अश्वं, कृष्णाजिनं, अजां च गृहीत्वा यत्र महावीराद्युपयुक्ता मृदस्ति प्राच्यां दिशि तत्र मृदं खात्वा, कृष्णाजिने न्युप्य, अश्वेन अवघ्राप्य, मृद्-उपरि आजं दुग्ध्वा, तां मृदं बहुभिराहार्य विहारस्योत्तरतोऽवस्थाप्य, वराहोत्खातां मृदं वल्मीकमृदं, पूतीकान्, अजलोमानि, कृष्णाजिनलोमानि अन्यानि च दृढ़ीकरणार्थानि वस्तूनि संयोज्य पिष्ट्वा उष्णजलेन संमिश्र्य संचुत्य, तया मृदा त्रीन् महावीरान् कुर्यात् । ते च प्रादेशमात्रोर्ध्वाः मध्ये स्थलत्रयसंगृहीताः स्थलत्रयोन्नताः उपरिबिलाः स्युः । एवं तयैव मृदा अवशिष्टया हस्त्योष्ठाकारे द्वे दोहनपात्रे, आज्यस्थालीम्, अश्वौ द्वौ रोहिणपुरोडाशार्थं द्वे कपाले च निर्माय, तानि च सूक्ष्मवस्त्रादिभिः गार्हपत्यस्य, पुरस्तादवहं खात्वा, तानि तत्रेष्टकावत् पयेत् । पाकार्थं अग्निं कुशैः मुञ्जतृणैश्च आदीपयेत् । पक्वेषु तेषु शफाभ्यां महावीरानुद्वास्य, भूयसा अजापयसा तान् प्रोक्षेत् । येनोज्ज्वला भवेयुर्महावीराः । इमे एव प्रग्वर्यसंभाराः मार्तिकाः । वानस्पत्यास्तु उदुम्बरकाष्ठैः कारयितव्याः । ते च सम्राडासन्दी मौञ्जोभिस्स्यूता रज्जूभिः । द्वे स्रुचौ गर्तवत्यौ । द्वे चागर्ते । द्वौ शफौ महावीरग्रहणार्थौ । घृष्टी अङ्गारनिरूहणार्थे द्वे काष्ठे । मेयो गोबन्धनार्था । त्रयश्शङ्कवो वत्सबन्धनार्थाः । व्यजनानि त्रीणि कृष्णाजिननिर्मितानि । द्वौ रुक्मौ वर्तुलाकारौ । एको राजतः एकस्सौवर्णः । अभिधानी गोबन्धनार्था (रज्जुः) निदाने गोः पादबन्धनार्थे (रज्जुः) । विशाखदामानि वत्सबन्धनार्थानि (रज्जव एव) । प्रभूतानि मुञ्जतृणानि च ॥



॥ हरिः ॐ ॥

**मन्त्रः-** **अग्ग्नेस्त्तनूरसि व्विष्ण्णवे त्त्वा सोमस्य तनूरसि व्विष्ण्णवे त्त्वातिथेरातित्थ्यमसि व्विष्ण्णवे त्त्वा श्श्येनाय त्त्वा सोमभृते व्विष्ण्णवे त्त्वाग्ग्नये त्त्वा रायस्प्पोषदे व्विष्ण्णवे त्त्वा ॥ १ ॥**

शु.य.अ.५.मं.-१

**पदपाठः-** अग्ग्नेः । तनूः । असि । व्विष्ण्णवे । त्वा । सोमस्य । अतिथेः । आतित्थ्यम् । श्येनाय । सोमभृतऽइतिसोम भृते । अग्ग्नये। रायस्प्पोषदऽइतिरायस्प्पोष दे ॥ १ ॥

**सरलार्थः-** हे हविः ! त्वं सोमस्य अग्निसंज्ञकस्य अनुचरस्य तृप्तिजनकत्वात् शरीरमसि । अतः त्वां व्यापनशीलाय विष्णवे प्रकृत-सोमाय प्रीतिजननार्थं निर्वपामि । अतिथिसंज्ञः सोमराजानुचरः जगतीच्छन्दोऽधिष्ठाताहे हविः ! त्वमतिथि संज्ञकस्य सोमभृत्यस्य आतिथ्यनामसंस्कार रूपमसि । विष्णवे त्वां निर्वपामि । श्येनो नामदेवः सोमराजानुचरः स्वर्गात्सोम-हर्ता श्येनरूपधारि गायत्र्यधिष्ठाता तस्मै श्येनाय विष्णवे त्वां निर्वपामि । धनपुष्टिदायिने अग्नये हे हविः ! त्वां गृह्णामि । विष्णवे इति पूर्ववत् ।

**मन्त्रः-** **अग्ग्नेर्ज्जनित्रमसि व्वृषणौस्त्थऽउर्व्वश्श्यस्यायुरसिपुरूरवाऽअसि । गायत्रेणत्त्वा च्छन्दसामन्थामि त्रैष्टुभेनत्त्वाच्छन्दसामन्थामिजागतेनत्त्वाच्छन्दसामन्थामि ॥२॥** शु.य.अ.५.मं.-२

**पदपाठः-** अग्ग्नेः । जनित्रम् । असि । व्वृषणौ । स्त्थः । उर्व्वशी । आयुः । पुरूरवाः । मन्थामि ॥२॥

**सरलार्थः-** हे दर्भौ ! युवां सेक्तारौ भवथः । यथा पुत्रजननाय स्त्रीपुरूषौ वीर्यस्य सेक्तारौ तद्वत् युवामपि अरण्योः अग्निजननसामर्थ्यसम्पादकौ । शकलस्थापितयोः दर्भयोः अधरारणिं निदध्यात् । हे अधरारणे ! त्वमुर्वशी असि । हे स्थालीगताज्य ! त्वमायुरसि अरणि द्वयेन जनिष्यमाणस्य अग्नेः आयुः प्रदं भवसि । हे उत्तरारणे ! त्वं पुरुरवा असि । यथा पुरुरवा नृपः उर्वश्याः उपरि वर्तते तथा त्वमपि मन्त्रत्रयेण अरण्योःमन्थनं कुर्यात् । हे अग्ने ! गायत्रेण छन्दसा अहं त्वां मन्थामि । शेषं पूर्ववत् ॥

**मन्त्रः-** **भवतन्नः समनसौ सचेतसावरेपसौ । मा यज्ज्ञ हिंसिष्ट्टम्मा यज्ज्ञपतिञ्जातवेदसौ शिवौभवतमद्यनः ॥३॥** शु.य.अ.५.मं.-३

**पदपाठः-** भवतम् । नः । समनसावितिस मनसौ । सचेतसावेतिस चेतसौ । अरेपसौ ॥ मा । यज्ञम् । हिंसिष्टम् । मा । यज्ञपतिमितियज्ज्ञ पतिम् । जातवेदसावितिजात व्वेदसौ । शिवौ । भवतम् । अद्य । नः ॥३॥

**सरलार्थः-** हे जातवेदसौ ! मन्त्रोक्तगुणयुक्तौ युवां नः कल्याण-कारिणौ भवतम् । समनसौ, सचेतसौ, अरेपसौ इत्येतानि अग्नेः विशेषणानि सन्ति । अस्मत् कर्म मा विनाशयतम् । यजमानं च मा विनाशयतम् । अस्मिन् अनुष्ठानदिने अस्मदर्थं शान्तौ कल्याणकारिणौ भवतम् ॥

**मन्त्रः-** **अग्ग्नावग्ग्निश्चरति प्प्रविष्ट्टऽऋषीणाम्पुत्रोऽअभिशस्तिपावा । स नः स्योनः सुयजा षजेह देवेब्भ्यो हव्व्यं सदमप्प्रयुच्छन्त्स्वाहा ॥४॥** शु.य.अ.५.मं.-४

**पदपाठः-** अग्ग्नौ । अग्ग्निः । चरति । प्रविष्ट्टऽइतिप्प्र व्विष्ट्टः । ऋषीणाम् । पुत्त्रः । अभिशस्तिपावेत्त्यभिशस्ति पावा ॥

**सरलार्थः-** आहवनीयाख्ये यः प्रविष्टः अग्निः हविर्भक्षयति । विदुषामग्निहोत्रिणां पुत्रः अभिशस्तिपावा हे अग्ने ! त्वमस्माकं सुखरूपो भूत्वा शोभनेन यागेन अस्मिन् स्थाने इन्द्रादिभ्यः सोमादिरूपं हव्यं देहि । अस्माभिः दत्तं हविर्देवान् प्रापय । इदमाज्यं तुभ्यं हुतमस्तु ॥

**मन्त्रः-** **आप॑तयेत्त्वा॒परि॑पतयेगृह्णामि॒तनू॒नप्त्रे॑शाक्क्व॒राय॒शक्क्व॑न॒ऽओजि॑ष्ट्ठाय ।**
**अना॑धृष्टमस्यनाधृ॒ष्य्यन्दे॒वाना॒मोजोन॑भिशस्त्त्यभिशस्ति॒पाऽअ॑नभिशस्ते॒न्यमञ्ञ्सासत्त्यमुप॑गेषꣳ स्वि॒ते मा॑ धाः ॥५॥** शु.य.अ.५.मं.-५

**पदपाठः-** आप॑तय॒ऽइत्त्या प॑तये । त्वा॒ । परि॑पतय॒ऽइति॒परि॑ पतये । गृ॒ह्णा॒मि॒ । तनूनप्त्र॒ऽइतितनू॒ नप्त्रे॑ । शाक्क्वराय॑। शक्क्वने ओजि॑ष्ट्ठाय ॥ अना॑धृष्टम् । अ॒सि॒ । अ॒ना॒धृ॒ष्य्यम् । दे॒वाना॑म् । ओज॑ः । अन॑भिशस्त्तीत्त्यन॑भि शस्ति । अ॒भि॒श॒स्ति॒पाऽइत्त्य॑भिशस्ति पा । अ॒न॒भि॒श॒स्ते॒न्यामित्त्य॑नभि श॒स्ते॒न्यम् । अञ्ञ्सा । स॒त्त्यम् । उप॑। गे॒ष॒म् । स्वि॒तऽइति॑सु इ॒ते । मा॒ । धाः ॥५॥

**सरलार्थः-** हे आज्य ! सर्वव्यापिने तनूनप्त्रे शाक्वराय शक्वने ओजिष्ठाय त्वामहं गृह्णामि । हे आज्य ! त्वमनाधृष्टम्, अनाधृष्टम्, देवानामोजः, अनभिशस्ति, अभिशस्तिपाः यतः त्वमीदृशः असि । अतः हे तनूनप्त्राज्य ! अहं ऋजुमार्गेण मानसकौटिल्यरहितेन आज्यस्पर्शरूपं शपथम् उपगच्छेयम् । हे आज्य ! शोभनमार्गे यज्ञकर्मणि त्वं मां स्थापय ॥

**मन्त्रः-** **अग्ग्ने॑ व्व्रतपास्त्वे व्व्र॑तपा॒ या तव॑ त॒नूरि॒यꣳ सा मयि॒ यो मम॑ त॒नूरे॒षा सा त्त्वयि॑ ।**
**स॒ह नौ॑ व्व्रतपते व्व्र॒तान्यनु॑ मे दी॒क्क्षान्दी॒क्क्षाप॑ति॒र्म्मन्य॑ता॒मनु॒ तप॒स्त्तप॑स्प्पतिः ॥६॥**

**पदपाठः-** अग्ग्ने॑ । व्व्र॒त॒पा॒ऽइति॑व्व्रत पाः । त्वेऽइति॒त्त्वे । व्व्र॒त॒पा॒ऽइति॑व्व्रत पाः । या । तव॑ । त॒नू । इ॒यम् । सा । मयि॑ । योऽइति॒यो । मम॑ । त॒नू । ए॒षा । सा । त्वयि॑ ॥ स॒ह । नौ॒ । व्व्र॒त॒प॒त॒ऽइति॑व्व्रत पते । व्व्र॒तानि॑ । अनु॑ । मे॒ । दी॒क्क्षाम् । दी॒क्क्षाप॑ति॒रिति॑दी॒क्क्षा प॑तिः । मन्य॑ताम् । अनु॑ । तप॑ः। तप॑स्पतिः । तप॑ःपति॒रिति॒तप॑ः पतिः ॥६॥

**सरलार्थः-** हे व्रतपाः ! सर्वेषां व्रतानां पालकाग्ने ! त्वम् अस्मदीयस्य वर्तमानव्रतस्य पालको भवसि । तथा-विधस्य व्रतपालकस्य या तनुः अस्ति सा मयि भवतु । मदीयं शरीरं त्वयि भवतु । तथा सति हे व्रतपते ! व्रतपालकाग्ने ! अनुष्ठेयानि कर्माणि अग्नियजमानयोः सह प्रवर्तमान । युवान्व्रतेषु ममादरः तावानेन तवापि भवतु । दीक्षायाः पालकः सोमःमम दीक्षामनुमन्यताम् । तथा उपसद्रूपस्य तपसः पालकःसोमः तपः मदीयम् उपस्द्रूपम् अनुमन्यताम्॥

**मन्त्रः-** **अ॒ꣳशुर॑ꣳशुष्ट्टे देव सो॒माप्प्या॑यता॒मिन्द्रा॑यैकधन॒विदे॑ । आ तुब्भ्य॒मिन्द्रः॒ प्प्याय॑ता॒मा त्त्वमिन्द्रा॑य प्प्यायस्व। आप्प्या॑यया॒स्म्मान्त्स॑खीन्त्स॒न्न्या मे॒धया॑ स्व॒स्ति ते॑ देव सोम सु॒त्त्याम॑शीय । एष्ट्टा रा॒यः॒ प्प्रेषे भगा॑य॒ऋ॒तम॑तवा॒दिब्भ्यो नमो॒ द्यावा॑पृथि॒वीब्भ्या॑म् ॥७॥**

**पदपाठः-** अ॒ꣳशूर॑ꣳशु॒रित्त्य॒ꣳशुः अ॑ꣳशुः । ते॒ । दे॒व। सो॒म॒ । आ । प्या॒य॒ता॒म् । इन्द्रा॑य । ए॒क॒ध॒न॒वि॒द॒ऽइत्त्यै॑कधन व्विदे॑ ॥ आ । तु॒ब्भ्य॑म् । इन्द्र॑ः । प्याय॑ताम् । आ । त्व॒म् । इन्द्रा॑य । प्या॒य॒स्व ॥ आ । प्या॒य॒य॒। अ॒स्मान् । सखी॑न् । स॒न्या । मेधया॑ । स्व॒स्ति । ते दे॒व॒ । सो॒म॒ । सु॒त्त्याम् । अ॒शी॒य॒ ॥ एष्ट्टा॒ऽइत्त्या ई॑ष्ट्टाः । राय॑ः । प्र । इ॒षे । भगा॑य । ऋ॒तम् । ऋ॒त॒वा॒दिब्भ्य॒ऽइत्त्यृ॑तवा॒दि भ्य॑ः । नम॑ः । द्यावा॑पृथि॒वीब्भ्या॑म् ॥७॥

**सरलार्थः-** हे सोमदेव ! तव सर्वोऽपि अवयवः इन्द्रप्रीत्यर्थं वर्धताम् । चिरावस्थानेन यः सोमावयवः म्लानः शुष्कश्च तदुभयं मन्त्रेणाप्यायितं भवति । सोमकण्डनाय यैर्जलमानीयते ते कुम्भाः एकधनाः । हे सोम ! तुभ्यं पानार्थम् इन्द्रः वर्धताम् । तथा हे सोम ! त्वमपि इन्द्रपानाय सर्वतोवृद्धो भव । अनेन उभयोरपि वृद्धिर्भवति। हे सोम ! सखिवत्प्रीति-विषयान् अस्मान् ऋत्विजः मेधया प्रवर्धय । हे सोमदेव ! तव क्षेमः अस्तु । तव प्रसादात् अहं सोमाभिषवक्रिया समाप्तिदिनं प्राप्नुयाम् । हे सोम ! एष्टारायः प्रेषे भगाय, ऋतवादिभ्यः सत्यं तत्प्रीत्यर्थम् - अवश्यम्भाविफलवत्कर्म सम्पादय । द्यावापृथिवीभ्यां नमः अस्तु ॥

**मन्त्रः-** **या तेऽअग्ग्नेय॒ःश॒याता॒नूर्व्वर्षि॑ष्ट्ठा गह्व्वरे॒ष्ट्ठा । उ॒ग्ग्रँव्वचो॒ऽअपा॑वधीत्त्वे॒षँव्व्चो॒ऽअपा॑वधी॒त्त्स्वाहा॑ । या ते॑ऽअग्ग्ने रजःशया॒तनू॒र्व्वर्षि॑ष्ट्ठागह्व्वरे॒ष्ट्ठा उ॒ग्ग्रँव्वचो॒ऽअपा॑वधीत्त्वे॒षँव्वचो॒ऽअपा॑वधी॒त्त्स्वाहा॑ । या ते॑ऽअग्ग्ने हरिश॒याता॒नूर्व्वर्षि॑ष्ठागह्व्वरे॒ष्ठा। उ॒ग्ग्रँव्वचो॒ ऽअपा॑वधी॒त्त्वे॒षँव्वचो॒ऽअपा॑वधी॒त्त्स्वाहा॑ ॥८॥**

**पदपाठः-** या । ते॒ । अ॒ग्ग्ने॒ । अ॒य॒ꣳशयेत्त्य॑य॒ꣳ श॒या । त॒नू ꣳ । व्वर्षि॑ष्ठा ग॒ह्व॒रे॒ष्ठा । ग॒ह॒व्व॒रे॒स्त्थेति॑ग॒ह्व॒रे स्था॥ उ॒ग्ग्रम् । व्वच॑ः । अप॑ । अ॒व॒धी॒त् । त्वे॒षम् । व्वच॑ः । अप॑ । अ॒व॒धी॒त् । स्वाहा॑ ॥ र॒जु॒ꣳश॒येति॑रज॒ꣳ श॒या । ह॒रि॒श॒येति॑हरि श॒या ॥८॥

**सरलार्थः-** हे अग्ने ! तव अयः शया तनूः देवानामतिशयेनामिमतफलवर्षिणी असुराणां देशे तिष्ठति । तव तनुः उग्रं वचः अपावधीत् । तथा त्वेषं वचः अपावधीत् । तथाविधोपकाराय अग्नये हविर्दत्तम । हे अग्ने ! तव राजः शया तनूः, तव हरिशया तनूः इति पूर्ववत् ज्ञेयम् ॥

**मन्त्रः-** **त॒प्प्ताय॑नीमेसिव्वि॒त्ताय॑नीमे॒स्यव॑तान्मानाथि॒तादव॑तान्माव्व्यथि॒तात् । व्वि॒दे॒द॒ग्ग्निर्न्नभो॒ नामाग्ग्नेऽअङ्गिर॒ऽआयु॑ना॒नाम्न्नेहि॒योꣳस्याम्पृ॑थि॒व्वायमसि॒ यत्तेना॑धृष्ष्ट॒न्नाम॑ य॒ज्ञियन्तेन॒ त्त्वा द॑धे व्वि॒दे॒द॒ग्ग्निर्न्नभो॒ नामाग्ग्नेऽअङ्गिर॒ऽआयु॑ना नाम्न्नेहि यो द्वि॒तीय॑स्याम्पृथि॒व्यामसि॒ यत्तेना॑धृष्ष्ट॒न्नाम॑ य॒ज्ञियन्तेन॒ त्वाद॑धे व्वि॒दे॒द॒ग्ग्निर्न्नभो नामाग्ग्नेऽअङ्गिर॒ऽआयु॑ना नाम्न्नेहि॒ यस्तृ॒तीय॑स्याम्पृथि॒व्यामसि॒ यत्तेना॑धृष्ष्ट॒न्नाम॑ य॒ज्ञियन्तेन॒ त्त्वा द॑धे । अनु॑ त्त्वा दे॒ववी॑तये ॥९॥**

**पदपाठः-** त॒प्प्ताय॑नीति॑त॒प्प्त अय॑नी । मे॒ । अ॒सि॒ । वि॒त्ताय॑नीतिवि॒त्त अय॑नी । मे॒ । अ॒सि॒ । अव॑तात् । मा॒ । ना॒थि॒तात् । अव॑तात् । मा॒ । व्य॒थि॒तात् ॥ व्वि॒दे॒त् । अ॒ग्ग्निःꣳ । नभ॑ः । नाम॑ । अग्ग्ने । अङ्ङ्गिरःꣳ । आयुना । नाम्म्ना॑ । आ इ॒हिꣳ । अ॒स्याम् । पृ॒थि॒व्वाय॒म् । असि॑ । यत् । ते॒ । अना॑धृष्ट॒म् । नाम॑। य॒ज्ञिय॑म् । तेन॑ । त्वा॒ । आ । द॒धे॒ । द्वि॒तीय॑स्याम् । तृ॒तीय॑स्याम् । अनु॑ । त्वा॒ । दे॒ववी॑तय॒ऽइतिदे॒व व्वी॑तये ॥९॥

**सरलार्थः-** हे पृथिवि ! त्वं ममानुग्रहार्थं तप्तायनी असि । त्वं वित्तायनी असि । त्वं याचितात् मा रक्ष । त्वं भयात् चलनात् स्थानभ्रँशाच्च मां रक्ष । हे चात्वालगतमृत्तिके ! त्वां नभोनामाग्निः जानीयात् । अग्निनामोच्चारण-पुरः-संर प्रहरेत् । हे अग्ने ! अङ्गिरः त्वम् आयुना नाम्नाभिहितः सन् गच्छ । हे अग्ने ! त्वमस्यां दृश्यमानयां पृथिव्यामसि । तव यज्ञयोग्यं यत् नामाग्निः अनाधृष्यं केनापि याज्ञिकेन तिरस्कृतं तेन नाम्ना युक्तं त्वां स्थापयामि । एवं द्वितीयस्यां तृतीयस्यामिति विशेषः । देवतर्पणाय हे मृत्तिके ! त्वां पूर्वोक्तम् आहरणत्रयम् अनुसृत्य आहरामि ॥

**मन्त्रः-** **सि॒ꣳहय॑सिसपत्नसाहीदे॒वेभ्य॑ः कल्प्पस्वसि॒ꣳहय॑सिसपत्नसाहीदे॒वेभ्य॑ः**
**शुन्धस्वसि॒ꣳहय॑सिसपत्नसाहीदे॒वेभ्य॑ः शुम्भस्व ॥१०॥**

**पदपाठः-** सि॒ꣳही । अ॒सि॒ स॒प॒त्न॒साही । स॒प॒त्न॒सहीति॑सपत्न ही । दे॒बेभ्य॑ः क॒ल्प्पस्व॒ । शु॒न्धस्व॒ । शु॒म्भस्व॒ ॥१०॥

**सरलार्थः-** हे उत्तरवेदे ! त्वं सिंहसमाना भूत्वा सपत्नसाही भवसि । शत्रूणामभिभवित्री असि । अतः देवोपकारार्थं समर्थाः उत्तरवेदि-रूपेण क्लृप्ता भव । हे उत्तरवेदे ! शुद्धा भव । हे उत्तरवेदे ! त्वं सिकताप्रक्षेपेण शोभिता भव ॥

**मन्त्रः-** **इन्द्र॒घोषस्त्वा॒व्वसु॑भि॒ꣳ पु॒रस्ता॑त्पातु॒प्प्रचे॑तास्त्वा रू॒द्रैꣳ प॒श्चात्त्पा॑तु॒मनो॑जवास्त्वापि॒तृभि॑र्द्दक्षिण॒तꣳ पा॑तु व्वि॒श्वक॑र्म्मात्त्वादि॒त्त्यैरु॑त्तर॒तꣳ पा॑त्त्वि॒दम॒हन्तप्प्तँवाब्र्बहि॒र्द्धा य॒ज्ञान्नि॒ꣳसृ॑जामि ॥११॥**

**पदपाठः-** इन्द्र॒घोष॒ऽइतीन्द्र॒ घोषꣳ । त्वा॒ । व्वसु॑भिरिति॒वसु॑ भि॒ꣳ । पु॒रस्ता॑त् । पा॒तु । प्रचे॑ता॒ऽइति॒प्र चे॑ता॒ꣳ । रु॒द्रैꣳ। प॒श्चात् । मनो॑जवा॒ऽइति॒मन॑ः जवा॒ꣳ । पि॒तृभि॒रिति॑पि॒तृ भि॑ः । द॒क्षि॒ण॒तꣳ । विश्श्वक॒र्म्मेति॑विश्श्व क॑र्म्मा। आ॒दि॒त्त्यैꣳ । उ॒त्त॒र॒तꣳ । इ॒दम् । अ॒हम् । त॒प्प्तम् ॥ वा॒ꣳ । ब॒हि॒र्द्धेति॑ब॒हि॒ꣳधा । य॒ज्ञात् । नि॒ꣳ । सृ॒जा॒मि॒ ॥११॥

**सरलार्थः-** इन्द्रघोषः वसुभिः अष्टसंख्याकैर्गणैदेवैर्युक्तः सन् हे उत्तरवेदे ! त्वां पूर्वस्यां दिशि रक्षतु । प्रचेताः प्रकृष्टप्रज्ञो वरुणो एकादश-रूद्रैः सहितः पश्चिमायां दिशि त्वां पातु । मनोजवाःमनोवद् वेगयुक्तो यमो देवः पितृभिः सहितः दक्षिणस्यां दिशि त्वां पातु । विश्वकर्मा द्वादशादित्यैः सहितः उत्तरस्यां दिशि त्वां पातु । [असुरनिवारणाय येनोदकेन प्रोक्षणं कृतं तदुदकम् उग्ररूपत्वात् ''तप्तम्'' इत्युच्यते] तप्तमिदम् उदकं प्रोक्षणशेषभूतं यज्ञप्रदेशात् बाह्यप्रदेशे अहं निक्षिपामि ॥

**मन्त्र:-** **सि॒थ्ठंह्य॑सि॒ स्वाहा॑ सि॒थ्ठंह्य॒स्यादि॒त्य॒वनि॒ꣳ स्वाहा॑ सि॒थ्ठंह्य॑सि ब्र॒ह्मवनि॑ꣳ क्ष॒त्रवनि॒ꣳ स्वाहा॑ सि॒थ्ठंह्य॑सि सु॒प्र॒जा॒वनी॑ रायस्पो॒ष॒वनि॒ꣳ स्वाहा॑ सि॒थ्ठंह्य॒स्याव॑ह दे॒वान्यज॑मानाय॒ स्वाहा॑ भू॒तेभ्य॑स्त्वा ॥१२॥**

**पदपाठ:-** सि॒ꣳही । अ॒सि॒ । स्वाहा॑ । आ॒दि॒त्य॒वनि॒रित्या॑दित्य॒ व्वनि॑ । ब्र॒ह्म॒व॒नि॒रिति॑ब्रह्म॒ व्वनि॑ꣳ । क्ष॒त्र॒व॒नि॒रिति॑क्क्षत्र॒व्वनि॑ꣳ । सु॒प्र॒जा॒व॒नि॒रित॑सुप्र॒जा॒ वनि॑ꣳ । रा॒य॒स्पो॒ष॒व॒नि॒रिति॑रायस्पो॒ष॒ व्वनि - । आ। व्व॒ह॒ । दे॒वान् । यज॑मानाय । स्वाहा॑ । भू॒तेभ्य॑ꣳ । त्वा॒ ॥१२॥

**सरलार्थ:-** हे उत्तरवेदे ! त्वं सिंहरूपा भवसि तादृश्यै तुभ्यं स्वाहा । त्वम् आदित्यवनि: ब्रह्मवनि: क्षत्रवनि: सुप्रजावनि: रायस्पोषवनि: च सिंहरूपा भवसि । तुभ्यं सुहुतमस्तु । यजमानोपकारार्थं देवान् आनय । हे होमविशेषाज्य-युक्ते जुहू:, चतुर्विधाय भूतग्रामाय प्रीत्यर्थं त्वां स्रुचम् उद्गृह्णामि ॥

**मंत्र:-** **ध्रु॒वो॑सि पृथि॒वीन्दृ॑ꣳह ध्रु॒व॒क्षिद॑स्य॒न्तरि॑क्षन्दृꣳहाच्युत॒क्षिद॑सि॒ दिव॑न्दृꣳहा॒ग्ग्नेः पुरी॑षमसि ॥१३॥**

**पदपाठ:-** ध्रु॒वः । अ॒सि॒ । पृ॒थि॒वीम् । दृ॒ꣳह॒ । ध्रु॒व॒क्क्षि॒दिति॑ध्रु॒व॒ क्षित् । अ॒न्तरि॑क्क्षम् । अ॒च्यु॒त॒क्क्षि॒दित्य॑च्युत॒ क्षित् । दिव॑म् । अ॒ग्ग्नेः । पुरी॑षम् । अ॒सि॒ ॥१३॥

**सरलार्थ:-** हे मध्यमपरिधे ! त्वं स्थिरोऽसि । अत:पृथिवीं दृढीकुरु । हे दक्षिणपरिधे ! त्वं स्थिरे यज्ञे निवसति ध्रुवक्षिदसि तस्मादन्तरिक्षं दृढीकुरु । हे उत्तरपरिधे ! त्वं विनाशरहिते यज्ञे निवसति । त्वमच्युतक्षिदसि अत:द्युलोकं दृढीकरु । हे गुग्गुलप्रभृतिसंभार समूह ! त्वमग्ने: पूरकमसि ।

**मन्त्र:-** **यु॒ञ्ज॒ते॒ मन॑ऽउ॒त यु॑ञ्ज॒ते॒ धियो॒ व्विप्रा॒ व्विप्र॑स्य बृह॒तो व्विप॒श्चित॑: ।**

**व्वि होत्रा॑ दधे व्वयुना॒विदेक॒ऽइन्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुति॒ꣳ स्वाहा॑ ॥१४॥**

**पदपाठ:-** यु॒ञ्ज॒ते॑ । मन॑: । उ॒त । यु॒ञ्ज॒ते॒ । धिय॑: । विप्रा॑ । विप्र॑स्य । बृ॒ह॒तः । व्वि॒प॒श्चि॒त॒ऽइति॑विप॒ꣳ चित॑: ॥ व्वि । होत्रा॑ । द॒धे॒ । व्व॒यु॒ना॒वित् । व्व॒यु॒न॒वि॒दिति॑वयुन॒ व्वित् । एक॑: । इ॒त । म॒ही दे॒वस्य॑ । स॒वि॒तुः। परि॑ष्टुति॒ꣳ । परि॑स्तुति॒रिति॑परि॑ स्तुति॒ꣳ । स्वाहा॑ ॥ १४ ॥

**सरलार्थ:-** मेधाविन: अध्वर्युप्रमुखा: ऋत्विज: मनसा वाचा च यज्ञ-सम्बन्धि कर्म प्रेरयन्ति । तथा वषट्कर्तार: सप्तहोत्रका: यज्ञविषये सावित्रानुज्ञाता एव मन: धिय: च कुर्वते । यस्मात् सविता एक: एव प्रज्ञावान् । तस्य सवितुर्देवस्य स्तुतिरुपमिदं द्रव्यं सुहुतमस्तु ॥

**मन्त्र:-** **इ॒दँव्विष्णु॒र्व्विच॑क्रमे॒ त्रे॒धा॒निद॑धे॒ प॒दम् । सम॑ढमस्य पाथ्ठंसु॒रे स्वाहा॑ ॥१५॥**

**पदपाठ:-** इ॒दम् । व्विष्णु॑: । व्वि । च॒क्र॒मे॒ । त्रे॒धा । नि । द॒धे॒। प॒दम् ॥ सम॑ढ॒मि॒ति॒सम् ऊढम् । अ॒स्य॒। पा॒थ्ठंसु॒रे । स्वाहा॑ ॥१५॥

**सरलार्थ:-** इदं जगत् विष्णु: विचक्रमे । भूमौ एकं पदम् अन्तरिक्षे द्वितीयं दिवि तृतीयम् इति क्रमात् अग्निवायुसूर्यरूपेण इत्यर्थ: । भूम्यादिलोकरूपा: विद्यन्ते । यस्य तत्पासुर तस्मिन् पांसुरे अस्य विष्णो: सम्यक् अन्तर्भूतं विश्वम्। तस्मै विष्णवे हविर्दत्तम् ॥

**मन्त्र:-** **इरा॑वती धे॒नु॒मती॒हि भू॒तꣳ सू॑यव॒सिनी॒मन॑वे दश॒स्या ।**

**व्य॑स्क्कभ्ना॒रोद॑सी व्विष्ण॒वे॒ते दा॒धर्त्थ॑पृथि॒वीम॒भितो॑ म॒यूखै॒ꣳ स्वाहा॑ ॥१६॥**

**पदपाठ:-** इरा॑वती॒ऽइतीरा॑ व्वती । धे॒नु॒मती॒ऽइति॑धेनु॒ मती॑ । हि । भूतम् । सू॒य॒व॒सिनी॑ । सू॒य॒व॒सिनी॒ऽइति॑सु यव॒सिनी॑। मन॑वे । द॒श॒स्या ॥ व्वि । अ॒स्क्क॒भ्नाः । रोद॑सी॒ऽइ॒तिरोद॑सी । व्वि॒ष्णो॒ऽइति॑विष्णो । ए॒ते॒ऽइत्ये॒ते । दा॒धर्त्थ॑ । पृ॒थि॒वीम् । अ॒भित॑: । म॒यूखै॑: । स्वाहा॑ ॥१६॥

**सरलार्थ:-** हे रोदसी द्यावापृथिव्यौ । इरावती धेनुमती सुयवसिनी यज्ञसाधनानां यजमानाय युवामीदृश्यौ भवतम् । हे विष्णो ! एते रोदसी त्वं व्यस्कभ्ना: असि । मयूखै: सर्वत: धारितवानसि । तस्मै विष्णवे हवि: दत्तम्॥

**मन्त्रः-** **देवश्श्रुतौंदेवेष्ष्वाघोषतम्प्राचीप्प्रेतंमद्ध्वरङ्कल्पयन्तीऽऊर्द्ध्वंयज्ञन्नयतम्मा जिंह्वरतम् । स्वङ्गोष्ठमावदतन्देवी दुर्य्येऽआयुर्म्मा निर्व्वादिष्टम्प्रजाम्मा निर्व्वादिष्टमत्र रमेथाँवर्ष्मन्पृथिव्याः ॥१७॥**

**पदपाठः-** देवश्श्रुतावितिदेव श्रुतौ । देवेषु । आ । घोषतम्। प्राचीऽइतिप्राची । प्र । इतम् । अद्ध्वरम् । कल्प्पयन्तीऽइतिकल्प्पयन्ती । उर्द्ध्वम् । यज्ञम् । नयतम् । मा । जिह्व्वरतम् ॥ स्वम् । गोष्ठम् । गोस्थमितिगो स्थम् । आ । व्वदतम् । देवीऽइतिदेवी । दुर्य्येइतिदुर्य्ये । आयुः । मा । निः । व्वादिष्ट्टम्। प्रजामितिप्र जाम् । मा । निः । व्वादिष्ट्टम् । अत्र । रमेथाम् । वर्ष्मन् । पृथिव्याः ॥१७॥

**सरलार्थः-** हे देवश्रुतौ ! युवां यजमानः यक्ष्यति इति उच्चध्वनिना कथयतम् । हे उभे शकटे ! युवां प्राङ्मुखे प्रकर्षेण गच्छतम् । इदं कर्म समर्थ कुर्वाणे । इमं यज्ञमूर्ध्वं नयतम् । मा कुटिले भवतम् । हे देवि दुर्ये ! गृहसदृशशकटद्वयरूपे देवते ! युवां स्वकीयं गोस्थानं सर्वतः कथयतम् । यजमानस्य यावदायुः अस्ति तावत्सर्वं मा निराकार्ष्टम् । पशुधनादिरहितमायुः मा उच्चारयतम् । यजमानाय प्रजां पुत्रादिरूपां मा निराकार्ष्टम् । हे शकटे ! युवां पृथिव्याः वर्ष्मन् देवयजने क्रीडां कुरुतम् ॥

**मन्त्रः-** **व्विष्णोर्नुकंव्वीर्य्याणिप्प्रवोचँय्यः पार्त्थिवानिव्विममेरजाँसि ।**

**योऽअस्क्कभायदुत्तरँ सधस्त्थँव्विचक्क्रमाणस्त्रेधोरुगायोव्विष्ण्णवे त्त्वा ॥१८॥**

**पदपाठः-** विष्णोः । नु । कम् । व्वीर्य्याणि । प्र । वोचम् । यः । पार्त्थिवानि । व्विममऽइतिवि ममे । रजाँसि॥ षः। अस्क्कभायत् । उत्तरमित्त्युत् तरम् । सधस्त्थमितिसध स्त्थम् । व्विचक्क्रमाणऽइतिवि चक्क्रमाणः। त्रेधा । उरुगायऽइत्त्युरु गायः । विष्ण्णवे । त्वा ॥१८॥

**सरलार्थः-** विष्णोः एव कर्माणि अहं प्रब्रवीमि । यो विष्णुः पार्थवानि रजांसि निर्ममे । यश्च त्रेधा विचक्रमाणः ऊरुगायः विष्णुः उपरितनं देवानां सहवासस्थानं स्तम्भितवान् । हे स्थूणेकाष्ठः । हविर्धान शकटाभिमानि विष्णुप्रीत्यर्थं त्वां निखनामि ॥

**मन्त्रः-** **दिवोवाव्विष्ण्णऽउतवापृथिव्व्यामहोवा व्विष्ण्णऽउरोरन्तरिक्क्षात् ।**

**उभाहिहस्त्ताव्वसुनापृणस्वाप्प्रयच्छदक्क्षिणादोतसव्व्यादिव्विष्ण्णवे त्त्वा ॥१९॥**

**पदपाठः-** दिवः । व्वा । व्विष्ण्णोऽइतिविष्ण्णो । उत । व्वा । पृथिव्व्या । महः । व्वा । विष्ण्णोइतिविष्ण्णो। उरोः । अन्तरिक्क्षात् ॥ उभा । हि । हस्ता । वसुना । पृणस्व । आ । प्र । यच्छ । दक्क्षिणात्। आ । उत । सव्व्यात् । व्विष्ण्णवे । त्वा ॥१९॥

**सरलार्थः-** हे विष्णो ! द्युलोकात् अपि च भूलोकात् अपि च महतः अपि च विस्तीर्णादन्तरिक्ष लोकात् वा समानीतेन द्रव्येण उभावपि स्वकीयौ हस्तौ पूरयस्व । ततः धनपूर्णात् दक्षिणवाम-हस्तात् प्रकृष्टं मणिमुक्तादि धनम् अस्मभ्यं देहि ॥

**मन्त्रः-** **प्रतद्विष्ण्णुस्त्तवते व्वीर्य्येण मृगोनभीमः कुचरोगिरिष्ठाः ।**

**यस्योरुषु त्रिषु व्विक्क्रमणेष्ष्वधिक्क्षियन्ति भुवनानि व्विश्श्वा ॥२०॥**

**पदपाठः-** प्र । तत् । व्विष्ण्णुः । स्तवते । व्वीर्य्येण । मृगः । न । भीमः । कुचरः । गिरिष्ठाः । गिरिस्त्थाऽइतिगिरि स्थाः ॥ षस्य । उरुषु । त्रिषु । व्विक्क्रमणेष्विति वि क्रमणेषु । अधिक्क्षियन्तीत्त्यधि क्षियन्ति । भुवनानि। व्विश्श्वा ॥२०॥

**सरलार्थः-** सः प्रसिद्धः मृगः भीमः कुचरः गिरिष्ठाः विष्णुः असाधारण-वीर-कर्मणा प्रस्तूयते । यस्य विष्णोः प्रभूतेषु पादप्रक्षेपण-स्थानेषु लोकेषु विश्वानि भुवनानि अधिनिवसन्ति ॥

**मन्त्रः-** **व्विष्ण्णोरराटमसिव्विष्ण्णोः श्नप्त्रेस्त्थोव्विष्ण्णोः स्यूरसिव्विष्ण्णोर्द्ध्रुवोसि । व्वैष्ण्णवमसि व्विष्ण्णवे त्त्वा ॥२१॥**

**पदपाठः-** विष्णोः । रराटम् । असि । श्नप्त्रेऽइतिश्नप्त्रे । स्थः । स्यूः । ध्रुवः । वैष्णवम् । विष्णवे । त्वा ॥२१॥

**सरलार्थः-** हे माले ! त्वं विष्णोः हविर्धानमण्डपस्य ललाटस्थानीयोऽसि । हे रराटयन्तौ । युवां विष्णोः हविर्धानमण्डपस्य ओष्ठसन्धिरूपे भवथः । हे लस्यूजनि ! त्वं विष्णोः हविर्धानस्य स्यूरसि । हे रज्जुग्रन्थे ! त्वं विष्णोः ग्रन्थिर्भवसि । हे हविर्धान ! त्वं विष्णुदेवताकत्वेन तत्सबन्धि भवसि । तस्मात् विष्णुप्रीत्यर्थं त्वां स्पृशामि ॥

## शब्दार्थः

**श्येनः** – विष्णुः, **वृषणौ** – कुशतरुणे, **यज्ञपतिः** – यजमानः, **सुज्ञा** – शोभनयागेन, **तनूः** – शरीरम्, **ऋतवादिभ्यः** – अग्निहोत्रिभ्यः, **गह्वरेष्ठा** – असुराणां देशे, **देववीतये** – देवानां प्रीतये, **सपत्नसाही** – शत्रूणामभिभवित्री, **पुरस्तात्** – पूर्वस्यां दिशि, **सिंही** – सिंहरुपा, **ध्रुवः** – स्थिरः, **होत्राः** – होमकर्तारः, **मा जिह्वरतम्** – मा कुटिले भवतम्, **स्वं गोष्ठम्** – स्वकीय गो-स्थानम्, **अस्कभायत्** – स्तम्भितवान्, **निहन्मि** – निखनामि, **दिवः** – द्युलोकात्, **प्रणस्व** – पूरयस्व, **वीर्येण** – असाधारणवीर-कर्मणा, **कुचरः** – पृथिव्यां मत्स्यादिरूपेण चरति, **रराटम्** – ललाटम्, **स्यूः** – सूचिः ॥

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) प्रथमकण्डिकायां कस्य ग्रहणं प्रतिपादितमस्ति ?

(क) देवस्य (ख) पशोः (ग) हविर्द्रव्यस्य (घ) यजमानस्य

(२) ''हविः'' कस्य शरीरमस्ति ?

(क) सोमस्य (ख) ब्राह्मणस्य (ग) सवितुः (घ) भक्तस्य

(३) ''शकलं'' नाम किमस्ति ?

(क) कुशतरुणम् (ख) हविर्द्रव्यम् (ग) काष्ठम् (घ) पुष्पम्

(४) मन्थनात् जातमग्निं कस्मिन्नग्नौ प्रक्षेपणीयम् ?

(क) गार्हपत्ये (ख) सभ्ये (ग) आवसथ्ये (घ) आहवनीये

(५) व्रतस्य पालकः कः अस्ति ?

(क) अग्निः (ख) शिवः (ग) ब्रह्मा (घ) शिवः

(६) सोमस्यावयवः कस्य प्रीत्यर्थं वर्धयति ?

(क) सूर्यस्य (ख) सोमस्य (ग) इन्द्रस्य (घ) वरुणस्य

(७) केन मन्त्रेण चात्वालं परिलिखति ?

(क) अग्नेस्तनूः. (ख) तप्तायनीमे. (ग) याते. (घ) सिध्ठंहयसि. ।

(८) शत्रूणामभिभवित्री का भवति ?

(क) उत्तरवेदी (ख) दक्षिणवेदी (ग) पश्चिमवेदी (घ) अन्तिमवेदी

(९) यज्ञसंबन्धिकर्म के प्रेरयन्ति ?

(क) यजमानाः (ख) ऋत्विजः (ग) ज्येष्ठाः (घ) भक्ताः

(१०) उच्चध्वनिना यजमानं कौ कथयत ?

(क) देवश्रुतौ (ख) ब्राह्मणौ (ग) राजानौ (घ) अश्विनीकुमारौ

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) अरणिमन्थनस्य का कण्डिका अस्ति ?

(२) निष्पन्नस्याग्ने: आहवनीयाग्निना योजनं कया कण्डिकया भवति ?

(३) ''आपतयेत्त्वा'' इत्यनया कण्डिकया किं कर्त्तव्यम् ?

(४) ''यातेऽअग्नेय'' इत्यनया कण्डिकया किं करणीयम् ?

(५) सोमदेवस्य अवयव: कस्य प्रीत्यर्थं तप्तायनी भवति ?

(६) ''पृथिवी'' कस्य अनुग्रहार्थं तप्तायनी भवति ?

(७) सिंहसमाना भूत्वा सपत्नसाही का भवति ?

(८) कया कण्डिकया उत्तरवेदिप्रोक्षणं भवति ?

(९) यज्ञसंबन्धि कर्म के प्रेरयन्ति ?

(१०) मृग: - भीम:- कुचर: इत्यादि-विशेषणं कस्यास्ति ?

**३. अधोलिखितानां कण्डिकानां भावार्थो लेख्य: ।**

(१) भवतन्नꣳ समनसौसचेतसावरेपसौ । मा यज्ञꣳहिꣳ सिष्टम्मायज्ञपतिञ्जातवेदसौशिवौभवतमद्यन॑÷ ॥

(२) सिꣳह्यसिसपत्नसाहीदेवेभ्य॑÷कल्पस्वसिꣳह्यसिसपत्नसाहीदेवेभ्य॑ ÷
शुन्धस्वसिꣳह्यासिसपत्नसाहीदेवेभ्य॑÷शुम्भस्व ॥

(३) ध्रुवोसिपृथिवीन्दृꣳ हद्ध्रुवक्षिदस्यन्तरिक्षन्दृꣳ हाच्युतक्षिदसिदिवन्दृꣳ हाग्नेꣳपुरीषमसि ॥

**४. अधोलिखितानां कण्डिकाना पूर्ति: विधेया ।**

(१) अग्नेस्तनू:.।

(२) युञ्जतेमन÷. ।

(३) इदंविष्णु÷ .।

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) अग्ने:
(२) विष्णवे
(३) जनित्रम्
(४) वृषणौ
(५) ऋषीणाम्
(६) देवेभ्य÷
(७) अञ्जसा
(८) अग्ने
(९) नौ
(१०) ते

६. **अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) असि
(२) त्वम्
(३) त्वाम्
(४) गृह्णामि
(५) स्थ:
(६) स्थापय
(७) अस्तु
(८) वर्धताम्
(९) तव
(१०) जानीयात्

७. **सन्धिविच्छेदनं कुरुत ।**

(१) अग्नेस्तनू:
(२) उर्वश्यसि
(३) भवतमद्य
(४) अग्नावग्नि:
(५) देवानामोज:
(६) इन्द्रायैकधनविदे
(७) सुत्यामशीय
(८) तप्तायनीमेसि
(९) ध्रुवोऽसि
(१०) मनऽउत

८. **सन्धिसंयोजनं कुरुत ।**

(१) स्थ: + उर्वशी
(२) मा + यज्ञम्
(३) यज + इह
(४) शक्वने + ओजिष्ठाय
(५) व्रतपा: + त्वे
(६) व्रतानि + अनु
(७) नम: + अस्तु
(८) अङ्गिर: + आयुना
(९) इन्द्रघोष + त्वा
(१०) पुरीषम् + असि

**छात्र-प्रवृत्तिः**

- सोमयागस्य महत्त्वं छात्रेभ्य: प्रदेयम् ।

**विशिष्टज्ञानम्**

- सूर्य्यस्यावृतमन्वावर्त्ते ॥

●

**प्रस्तावना**

''**उपसत्**'' एवं प्रातः प्रवर्ग्यमनुष्ठाय, ततः प्रातरुपसदनुष्ठेया । सा अपूर्वा काचिदिष्टिः । तत्र अग्निः, सोमः, विष्णुः इति प्रधानदेवताः । सर्वत्र आज्यं द्रव्यम् । प्रायेणोपांशुयाजवत् प्रयोगः । प्रधानाहूत्यनन्तरं प्रथमोवसद्होमः । एवं प्रातः प्रवर्ग्योपसदावनुष्ठाय, सुब्रह्मण्याह्वानं कृत्वा विरामः । ततोऽपराह्णे (सायंकालीने) आपराह्निक्यौ प्रवर्ग्योपसदौ, सुब्रह्मण्याह्वानं च । एवं दिनत्रयं (द्वितीयतृतीयचतुर्थ दिवसेषु) सायंप्रातरनुष्ठेयम् । तेन अग्निष्टोमे षड्वारं प्रवर्ग्योपसदोरनुष्ठानं सिद्धयति ॥



''**तृतीयदिनकृत्यम्**' द्वितीयोपसद्दिने (दीक्षातस्तृतीयदिवसे) प्रातः प्रवर्ग्योपसदावनुष्ठाय, महावेदे र्निर्माणं कर्त्तव्यम् । सा च प्राचीनवंशमण्डलात् पुरतः षट् पदानि परित्यज्य ततो निर्मातव्या । प्राक्पश्चात् द्विसप्ततिपदायामा दक्षिणोत्तरतः षष्टिपदविस्तारा च भवति । श्रोणिभागे, अंशभागे. च अष्टचत्वारिंशच्च । विशेषविवरणं त्वेतदन्ते कृतम्। एवं समग्रां वेदिं निर्माय प्रातः ततो यजमानस्य व्रतकरणम् (पयः पानम्) सायं सायाह्निकीभ्यां प्रवर्ग्योपसद्भ्यां प्रचर्य सुब्रह्मण्यामाहूय व्रतं कृत्वा विरमणम् । एतावत् तृतीयदिनकृत्यम् ॥

मन्त्रः- **दे॒वस्य॑ त्त्वा सवि॒तुः प्प्र॑स॒वे᳖ऽश्विनो॑र्बा॒हुभ्या॑म्पू॒ष्ण्णो हस्ता॑भ्याम् । आद॑दे॒ नार्य्य॑सी॒दम॒हꣳ रक्क्ष॑सांग्री॒वाऽअपि॑ कृन्तामि । बृ॒हन्न॑सि बृ॒हद्र॑वा बृ॒ह॒तीमिन्द्रा॑य॒ व्वाचव्वद ॥२२॥**

पदपाठः- नारी॑ अ॒सि॒ । इ॒दम्। अ॒हम् । रक्क्षा॑साम् । ग्री॒वाः । अपि॑ । कृ॒न्ता॒मि॒ ॥ बृ॒हन् । अ॒सि॒ । बृ॒हद्र॑वा॒ऽइति॑बृ॒हत् र॑वाः । बृ॒ह॒तीम् । इन्द्रा॑य । व्वाच॑म् । व्व॒द॒ ॥२२॥

सरलार्थः- हे अभ्रे ! सवितुर्देवस्य वर्तमानः सन् अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां त्वां स्वीकरोमि । ('अभ्रि'-शब्देन काष्ठनिर्मितं खननसाधनमुच्यते) । त्वं तु नार्यसि खननसाधनत्वेन कर्मोपयोगित्वात् नराणां अनुष्ठातृणां संबन्धिनी भवसि । अनेन परिलेखनेन रक्षसां यज्ञघ्नानां ग्रीवा कण्ठप्रदेशात् छिनद्मि । हे उपरवाख्यगर्त! त्वं महान् भवसि वर्तुलस्य गर्तस्य प्रादेशपरिमाणेन विस्तृततत्वात् खाततत्वाच्च महत्त्वम् । तस्मात् त्वम् इन्द्रप्रीत्यर्थं प्रौढध्वनियुक्तं वाक्यं वद ॥

मन्त्रः- **र॒क्क्षो॒ह॒णं॑ व्व॑लग॒ह॒नं॑ वै॑ष्ण्ण॒वीमि॒दम॒हन्तं॑व्व॑ल॒गमुत्कि॑रामि॒यम्मे॑निष्ट्ट्यो॒यम॑मात्त्यो॑ निच॒खाने॒दम॒हन्तँ॑व्व॑ल॒गमुत्कि॑रामि॒ यम्मे॑समा॒नोयम॑समानोनिच॒खाने॒दम॒हन्तँ॑व्व॑ल॒गमुत्कि॑रामि॒यम्मे सब॑न्धु॒र्य्यम॑सबन्धु॒र्न्नि॒च॒खाने॒दम॒हन्तँ॑व्व॑ल॒गमुत्कि॑रामि॒यम्मे॑ सजा॒तोयम॑संजातोनिच॒खानोत्कृ॒त्त्याङ्कि॑रामि ॥२३॥**

पदपाठः- र॒क्क्षो॒ह॒णम्॑ । र॒क्क्षो॒ह॒नमिति॑रक्क्षः हन॑म् । व्व॒ल॒ग॒ह॒नमिति॑वलग ह॒न॑म् । व्वै॒ष्ण्ण॒वीम् । इ॒दम् । अ॒हम्। तम् । व्व॒ल॒गम् । उत् । कि॒रा॒मि॒ । य॒म् । मे॒ । नि॒ष्ट्ट्य॑ः । यम् । अ॒मात्त्य॑ः । नि॒च॒खाने॑तिं॑नि च॒खान॑। स॒मा॒नः । अस॑मानः । सब॑न्धु॒रिति॒स ब॑न्धुः । अस॑बन्धु॒रित्त्यस॑ बन्धुः । स॒जा॒तऽइति॑स जा॒तः । अस॑जातः। उत् । कृ॒त्त्याम् । कि॒रा॒मि॒ ॥२३॥

सरलार्थः- हे विष्णो ! रक्षोहणं वलगहनं तादृशीं वैष्णवीं वाचं वद, त्वद्-वचनेन रक्षसां कृत्यानां चोपरामेण भक्तानां कल्याणसम्भवात् । मम पुत्रादिरमात्यः गृहवासी सहवासी वा यं वलगं (अभिचारं) केशादिनिखननेन कृतवान्, इदं प्रत्यक्षं यथा स्यात् तथाहं तं वलगम् उत्किरामि । यं मम पुत्रादिरमात्यः यं वलगं निचखान, तमुत्किरामि। यं समानः असमानः वा वलगं निचखान, सबन्धुः असबन्धुः वा यं निचखान, तमुत्किरामि ॥

[यजमानः प्रतिमन्त्रं यथाखातम् अवमर्शयति]

मन्त्रः- **स्व॒राड॑सिसपत्न॒हास॑त्त्रराड॑स्यभिमाति॒हाज॑न॒राड॑सिरक्षो॒हास॑र्व्व॒राड॑स्यमित्र॒हा ॥२४॥**

पदपाठः- स्व॒राडिति॑स्व॒ राट् । अ॒सि॒ । स॒प॒त्न॒हेति॑सपत्न॒ हा । स॒त्त्र॒राडिति॑सत्त्र॒ राट् । अ॒भि॒मा॒ति॒हेत्त्य॑भिमाति॒ हा । ज॒न॒राडिति॑जन॒ राट् । र॒क्क्षो॒हेति॑रक्क्षः हा । स॒र्व्व॒राडिति॑सर्व्व॒ राट् । अ॒मि॒त्र॒हेत्त्य॑मित्र॒ हा ॥२४॥

सरलार्थः- हे प्रथमगर्त ! त्वं स्वराडसि । स्वेनैव राजने इति स्वराट् स्वयमेव राजमानो भवसि । अतः शत्रुघाती भव । हे द्वितीयगर्त ! त्वं सत्रराडसि । अतः शत्रुघाती भव । हे तृतीयगर्त ! त्वं जनराडसि । अतः शत्रुघाती भव । हे चतुर्थगर्त! त्वं सर्वराडसि । अतः शत्रुघाती भव ॥

[लौलिकोदकेन आग्नेयकोण-उपरवानारभ्य प्रदक्षिणं हस्तेन अध्वर्युः उपरवान् प्रोक्षेत्]

मन्त्रः- **र॒क्क्षो॒हणो॑ वो व्व॒ल॒ग॒हनः॒ प्प्रोक्क्षा॑मि व्वैष्ण्ण॒वान्र॑क्क्षो॒हणो॑ वो व्व॒ल॒ग॒हनो॑व॑नयामि व्वैष्ण्ण॒वान्र॑क्क्षो॒हणो॑ वो व्व॒ल॒ग॒हनो॑व॑स्तृणामि व्वैष्ण्ण॒वान्र॑क्क्षो॒हणौ॑ वाँव्व॒ल॒ग॒हना॒ऽउप॑दधामि व्वैष्ण्ण॒वी र॑क्क्षो॒हणौ वाँव्व॒ल॒ग॒ह॒नौ पर्य्यू॑हामि व्वैष्ण्ण॒वी व्वैष्ण्ण॒वम॑सि व्वैष्ण्ण॒वा स्त्थ॑ ॥२५॥**

पदपाठः- र॒क्क्षो॒हण॑ः । र॒क्क्षो॒ह॒न॒ऽइति॑रक्क्षः हन॑ः । व्व॒ः । व्व॒ल॒ग॒ह॒न॒ऽइति॑वलग॒ हन॑ः । प्र । उ॒क्क्षा॒मि॒ । व्वै॒ष्ण्ण॒वान् । अव॑ । न॒या॒मि॒ । अव॑ । स्तृ॒णा॒मि॒ । र॒क्क्षो॒हणौ॑ । र॒क्क्षो॒ह॒ना॒विति॑रक्क्षः हनौ॑ । व्वाम्। व्व॒ल॒ग॒ह॒ना॒विति॑वलग॒ हनौ॑। उप॑ । द॒धा॒मि॒ । व्वै॒ष्ण्ण॒वीऽइति॑व्वैष्ण्णवी । परि॑ । ऊ॒हा॒मि॒ । व्वै॒ष्ण्ण॒वीऽइति॑व्वैष्ण्णवी। व्वै॒ष्ण्ण॒वम् । अ॒सि॒ । व्वै॒ष्ण्ण॒वाः । स्थ ॥२५॥

सरलार्थः- वैष्णवान् विष्णुदेवताकान् गर्तान् युष्मान्प्रोक्षामि । कीदृशान् राक्षसहन्तृन् अभिचारसाधनहन्तृन् गर्तेषु प्रोक्षणं शेषोदकसेचनमवनयनं दर्भैराच्छादनं संस्तरणमिति । अवनयामि सिञ्चामि । आस्तृणामि । दर्भैराच्छादयामि।

अन्यत्पूर्ववत् । रक्षसां नाशकौ कृत्यविनाशकौ वैष्णवौ विष्णुदेवताकौ युवामहं स्थापयामि । पर्यूहामि मृदापरितः छादयामि । अन्यत्पूर्ववत् । हे चर्म ! त्वं वैष्णवमसि । यज्ञरक्षकविष्णुसम्बन्धि भवसि । हे ग्रावाणः! यूयं यज्ञरक्षक-विष्णुसम्बन्धिनः भवथ ॥

[औदुम्बरी-मन्त्राः]

**मन्त्रः-** **दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे᳕ऽश्विनो॑र्ब्बा॒हुभ्या॑म्पू॒ष्णो हस्ता॑भ्याम् । आद॑दे॒नार्य्य॑सी॒दम॒हꣳ रक्ष॑साङ्ग्री॒वाऽअपि॑ कृन्तामि । यवो॑सि य॒वया॒स्मद्द्वेषो॑ य॒वयारा॑तीर्द्दि॒वे त्वा॒न्तरि॑क्षाय त्वा पृथि॒व्यै त्वा॒ शुन्ध॑न्ताँल्लो॒काः पि॑तृ॒षदनाः॑ पितृ॒षद॑नमसि ॥२६॥**

**पदपाठः-** यव॑ः । अ॒सि॒ । य॒वय॑ । अ॒स्मत् । द्वेष॑ः । य॒वय॑ । अरा॑तीः । दि॒वे । त्वा॒ । अ॒न्तरि॑क्षाय । पृ॒थि॒व्यै । शु॒न्ध॑न्ताम् । लो॒काः । पि॒तृ॒षद॑ना । पि॒तृ॒सद॑ना॒ऽइति॑पितृ सद॑नाः । पि॒तृ॒षद॑नम् । पि॒तृ॒सद॒॑नमिति॑पितृ सद॑नम् । अ॒सि॒ ॥२६॥

**सरलार्थः-** हे धान्य-विशेष ! त्वं यवोऽसि अस्मत् द्वेष्टॄन् शत्रून् दौर्भाग्यं वा पृथक्कुरु । अनेन शौभाग्यं धनं च प्रार्थ्यते । हे औदुम्बर्यग्रभाग ! द्युलोकप्रीत्यर्थं त्वां प्रोक्षामि । हेमध्यभाग ! अन्तरिक्ष-लोकप्रीत्यै त्वां प्रोक्षामि। हे मूलभाग ! पृथिवीप्रीत्यै त्वां प्रोक्षामि । पितृषदनाः लोकाः उदकसेचनेन शुद्धा भवन्तु । हे बर्हिः ! त्वं पितृषदनमसि ॥

[औदुम्बरीं गर्ते प्रक्षिपेत्]

**मन्त्रः-** **उद्दिव॑ꣳ स्तभा॒नान्तरि॑क्षम्पृण॒ दृꣳह॑स्व पृथि॒व्यान्द्यु॑ता॒नस्त्वा॑ मारु॒तो मि॑नोतु मि॒त्रावरु॑णौ ध्रु॒वेण॒ धर्म्म॑णा। ब्र॒ह्म॒वनि॑ त्वा क्षत्र॒वनि॑ रायस्पोष॒वनि॒ पर्य्यू॑हामि । ब्रह्म॑ दृꣳह क्ष॒त्रन्दृꣳहायु॑र्दृꣳह प्र॒जान्दृꣳह ॥२७॥**

**पदपाठः-** उत् । दिव॑म् । स्त॒भा॒न । आ । अ॒न्तरि॑क्षम् । पृ॒ण । दृꣳह॑स्व । पृ॒थि॒व्याम् । द्यु॒ता॒नः । त्वा॒ । मा॒रु॒तः । मि॒नो॒तु । मि॒त्रावरु॑णौ । ध्रु॒वेण॑ । धर्म्म॑णा ॥ ब्र॒ह्म॒वनी॒ति॑ब्रह्म्॒ व्वनि॑ । त्वा॒ । क्ष॒त्र॒वनी॒ति॑क्षत्र॒ व्वनि॑ । रा॒य॒स्पो॒ष॒वनी॒ति॑रायस्पोष॒ व्वनि॑ । परि॑ । ऊ॒हा॒मि॒ ॥ ब्रह्म॑ । दृ॒ꣳह॒ । क्ष॒त्रम् । आयु॑ः । प्प्राजामिति॑प्र॒ जाम् ॥२७॥

**सरलार्थः-** हे औदुम्बरि ! त्वं द्युलोकं स्तम्भय ऊर्ध्वःसन् यथा न पतति तथा कुरु । अन्तरिक्षं पूरय । पृथिव्यां दृढा भव । हे औदुम्बरि ! दीप्यमानः वायुः स्थिरेण धारणेन त्वां प्रक्षितामितिशेषः । हे औदुम्बरि ! त्वां परितः मृत्तिकां क्षिपामि । कि भूतां त्वाम् । ब्रह्मवनिः क्षत्रवनिः रायस्पोषवनिः । हे औदुम्बरि ! ब्राह्मणजातिं क्षत्रियजातिं जीवनं पुत्रादिरूपाः च दृढीकुरु ॥

[यजमानः औदुम्बरीं स्पृशति]

**मन्त्रः-** **ध्रु॒वासि॑ ध्रु॒वो᳕ऽयं यज॑मानो॒स्मिन्ना॒यत॑ने प्र॒जया॑ प॒शुभि॑र्भूयात् । घृ॒तेन॑द्यावापृथिवी पूर्य्येथा॒मिन्द्र॑स्य च्छ॒दिर॑सिव्विश्श्वज॒नस्य॑च्छा॒या ॥२८॥**

**पदपाठः-** ध्रुवा । अ॒सि॒ । ध्रु॒वः । अ॒यम् । यज॑मानः । अ॒स्मिन् । आ॒यत॑न॒ऽइत्या॒ यत॑ने । प्र॒जयेति॑प्र॒ जया॑। प॒शु॒भि॒रिति॑प॒शु भिः॑ भू॒यात् ॥ घृ॒तेन॑ । द्या॒वा॒पृ॒थि॒वी॒ऽइति॑द्द्यावापृथिवी । पू॒र्य्ये॒था॒म् । इन्द्र॑स्य । छ॒दिः। अ॒सि॒ । व्वि॒श्श्व॒ज॒नस्येति॑विश्व ज॒नस्य॑ । छा॒या ॥२८॥

**सरलार्थः-** हे औदुम्बरि ! त्वं स्थिरा भवसि । अयं यजमानः स्वकीये गृहे ध्रुवो भूयात् । पुत्रादिकया गवादिभिश्च सहस्थिरः अस्तु । हूयमानेन घृतेन द्यावापृथिव्यौ पूरिते भवताम् । हे तृणमयकट ! त्वमिन्द्रस्य छदिरसि इन्द्र सम्बन्धी कटो भवसि । अतः त्वं विश्वजनस्य छाया भव । [छदिशब्देन तृणनिर्मितः कट उच्यते]॥

**मन्त्रः-** **परि॑त्वागिर्व्वणो॒गिर॑ऽइ॒माभ॑वन्तुवि॒श्श्वत॑- ।**

**वृ॒द्धायुमनु॒ वृद्ध॑यो॒ जुष्टा॑ भवन्तु॒ जुष्ट॑यः ॥२९॥**

**पदपाठः-** परि॑ । त्वा॒ । गि॒र्व्व॒ण॒ः । गिर॑ः । इ॒माः । भ॒व॒न्तु॒ । वि॒श्वत॑ः । वृ॒द्धायु॑मिति॑वृ॒द्ध आ॑युम् । अनु॑। वृ॒द्ध॑यः । जुष्टा॑ः । भ॒व॒न्तु॒ । जुष्ट॑यः ॥२९॥

**सरलार्थः-** हे गिर्वण इन्द्र ! स्तोत्र-शस्त्ररूपा गिरः त्वां सर्वतः कटरूपेण परिगृह्णन्तु । किं भूतं त्वाम् । वृद्धायुम्। किं भूताः गिरः । अनुवृद्धयः । अस्मत् सेवाः तव प्रियाः भवन्तु ॥

**मन्त्रः-** **इन्द्र॑स्य॒ स्यू॒रसीन्द्र॑स्य ध्रु॒वो॑सि । ऐ॒न्द्रम॑सि वैश्वदे॒वम॑सि ॥३०॥**

**पदपाठः-** इन्द्र॑स्य । स्यूः । अ॒सि॒ । ध्रु॒वः । ऐ॒न्द्रम् । वै॒श्व॒दे॒व मेति॑वैश्श्व दे॒वम् ॥३०॥

**सरलार्थः-** हे रज्जो ! त्वमिन्द्रस्य सीवनमसि । हे ग्रन्थे ! त्वमिन्द्र-संबन्धी भूत्वा स्थिरो भवसि । हे सदः ! त्वमिन्द्रसम्बन्धी भवसि । हे अग्नीध्र ! त्वं सर्वदेवसंबन्धी भवसि ॥

**मन्त्रः-** **वि॒भूर॑सि प्र॒वाह॑णो॒ वह्नि॑रसि हव्य॒वाह॑नः । श्वा॒त्रो॑सि॒ प्रचे॑तास्तु॒थो॑सि वि॒श्ववे॑दाऽउ॒शिग॑सि ॥३१॥**

**पदपाठः-** वि॒भूरिति॑वि भू ः। अ॒सि॒ । प्र॒वाह॑णः । प्र॒वाह॑नइति॑प्र वाह॑नः । वह्नि॑ः । ह॒व्य॒वाह॑न॒ऽइति॑हव्य वाह॑नः । श्वा॒त्रः । प्रचे॑ता॒ऽइ॒ति॒प्र चे॑ताः । तु॒थः । वि॒श्श्ववे॑दा॒ऽइ॒ति॒वि॒श्श्ववेदाः ।। ३१॥

**सरलार्थः-** हे आग्नीध्रीय ! धिष्ण्य ! त्वं विभूः प्रवाहणश्चासि । हे होतृधिष्ण्य ! त्वं वह्निर्हव्यवाहनश्चासि । हे मैत्रावरुणधिष्ण्य । त्वं श्वात्रः प्रचेताश्चासि । हे ब्राह्मणाच्छंसि धिष्ण्य ! त्वं तुथो विश्ववेदाश्चासि ॥

**मन्त्रः-** **उ॒शिग॑सिक॒विरङ्घा॑रिरसि॒बम्भा॑रिरव॒स्यूर॑सि॒दुव॑स्वाञ्छु॒न्ध्यूर॑सिमार्ज्जा॒लीय॑ः सम्राड॑सिकृ॒शानु॑ः परि॒षद्यो॑सि॒पव॑मानो॒नभो॑सिप्र॒तक्क्वा॑मृ॒ष्टो॑सिहव्य॒सूद॑नऽऋ॒तधा॑मासि॒स्व॒र्ज्ज्यो॑तिसमु॒द्रो॑सि ॥३२॥**

**पदपाठः-** उ॒शिक् । क॒विः । अङ्घा॑रिः । बम्भा॑रिः । अ॒व॒स्यूः । दुव॑स्वान् । शु॒न्ध्यूः । मा॒र्ज्जा॒लीय॑ः । 'सम्राडिति॑सम् राट् । कृ॒शानु॑ः । प॒रि॒षद्य॑ः । प॒रि॒सद्य॒ऽइति॑परि सद्य॑ः । पव॑मानः । नभ॑ः । प्र॒तक्क्केति॑प्र तक्क्वा॑ मृ॒ष्टः । ह॒व्य॒सूद॑न॒ऽइति॑हव्य॒ सूद॑नः । ऋ॒तधा॒मेत्यृ॒त धा॑मा । स्व॑र्ज्ज्यो॑ति॒रिति॒स्व॒ः ज्योतिः ॥३२॥

**सरलार्थः-** हे पोतृधिष्ण्य ! त्वं कमनीयः विद्वाँश्चासि । हे नेष्टृधिष्ण्य ! त्वमङ्घारिः बम्भारिश्चासि । हे अच्छावाकधृष्ण्य! त्वमवस्यूः दुवस्वान् चासि । हे मार्जालीय धिष्ण्य ! त्वं शुन्ध्यूरसि । हे उत्तरवेदिगताहवनीय ! त्वं सम्राडसि कृशानुश्चासि । हे बहिष्पवमानदेश ! त्वं परिषद्यः पवमानश्चासि । हे शामित्र ! त्वं मृष्टः हव्यसूदनश्च असि । हे औदुम्बरि ! त्वं ऋतधामा स्वर्ज्योतिश्च असि ॥

**मन्त्रः-** **स॒मु॒द्रो॑सि वि॒श्श्वव्य॑चाऽअ॒जो॑स्येक॑पा॒दहि॑रसिबु॒ध्न्यो॒वाग॑स्यै॒न्द्रम॑सि॒सदो॒स्यृत॑स्यद्वारौ॒मामा॒ सन्ता॑प्तमद्ध्व॑पतेप्रमा॑तिरस्व॒स्तिमे॒स्मिन्पथिदे॑वया॒नेभूयान्मि॒त्रस्य॑ मा॒ ॥३३॥**

**पदपाठः-** स॒मु॒द्रः । वि॒श्श्वव्य॑चा॒ऽइति॑वि॒श्व व्य॑चाः । अ॒जः । एक॑पादित्येक॑ पात् । अहि॑ः । बु॒ध्न्य॒ः । वाक् । ऐ॒न्द्रम् । सद॑ः । ऋ॒तस्य॑ । द्वा॒रौ॒ । मा । मा॒ । सम् । ता॒प्तम् । अ॒द्ध्व॑नाम् । अ॒ध्व॒प॒त॒ऽइत्य॑ध्व पते । प्र । मा॒ । ति॒र॒ । स्व॒स्तिमे॒ । अ॒स्मिन् । प॒थि । दे॒व॒यान॒ऽइति॑दे॒व याने॑ । भू॒या॒त् ॥३३॥

**सरलार्थः-** हे ब्रह्मासनप्रदेश ! त्वं समुद्रः विश्वव्याचाश्चासि । हे शालाद्वार्य ! प्राचीनवंशद्वारवर्तिन्नग्ने । त्वम् अजः एकपात् चासि । हे प्राजहित गार्हपत्याग्ने ! त्वम् अहिः बुध्न्यश्चासि । हे सदः । त्वं वाक् ऐन्द्रं सदश्चासि। हे यज्ञस्य द्वारदेशस्थायिन्यौ शाखे ! युवां मां प्रवेशनिष्क्रमणेन स्खलनादिना मा सन्तापयतम् । हे अध्वपते मार्गपालक सूर्य ! त्वं मार्गाणां मध्ये मा प्रवर्धय । अस्मिन् देवभावप्रापके मार्गे मम कल्याणं भूयात् ॥

**मन्त्रः-** **मि॒त्रस्य॑ मा॒ चक्क्षु॑षेक्क्षध्द्व॒मग्ग्न॑यः सगराः सग॑रास्स्थसगरेण॒नाम्ना॒रौद्रे॒णानी॑केन पा॒त मा॑ग्नयः पिपृ॒तमा॑ग्नयोगोपा॒यत॑मा॒नमो॑वोस्तु॒मामा॑ हि॑ꣳसिष्ट ॥३४॥**

**पदपाठः-** मि॒त्रस्य॑ । मा॒ । चक्क्षु॑षा । ईक्क्ष॒ध्द्व॒म् । अग्ग्न॑यः । स॒ग॒राः । सग॑राः । स्थ॒ । सगरेण । नाम्ना॑

रौद्रेण । अनीकेन । पात । मा । अग्नयः । पिपृत । गोपायत । नमः । वः । अस्तु । मा। मा । हिंसिष्ट ॥३४॥

**सरलार्थः-** हे ऋत्विजः ! आदित्यस्य नेत्रेण मां पश्यत । हे अग्नयः ! सगराः स्तुत्याः सहिताः यूयं स्तुतिसहितेन नाम्ना समान-स्तुतिभाजः भवथ । हे अग्नयः ! यूयं शत्रुविनाशकत्वादुग्रेण भवदीयेन सैन्येन मां रक्षत । हे अग्नयः ! मां धनादिभिः पूरयत । मां निरन्तरं रक्षत । युष्मभ्यं नमोऽस्तु । मां मा वधिष्ट । निर्विघ्नं यज्ञं निवर्तयत ॥

**मन्त्रः-** **ज्योतिरसिव्विश्वरूपँव्विश्वेषान्देवानाᳬं समित् । त्वᳬं सोमतनूकृद्भ्यो द्वेषोब्भ्योन्यकृतेब्भ्यऽउरु यन्तासि व्वरूथᳬं स्वाहा जुषाणोऽअप्तुराज्यस्यव्वेतुस्वाहा ॥३५॥**

**पदपाठः-** ज्योतिः । असि । व्विश्वरूपमितिव्विश्व रूपम् । व्विश्वेषाम् । देवानाम् । समिदितिसम इत् ॥ त्वम्। सोम । तनूकृद्भ्यऽइतितनूकृत् भ्यः । द्वेषोब्भ्यऽइतिद्वेषः भ्य । अन्यकृतेब्भ्यऽइत्यन्य कृतेब्भ्यः । उरु। यन्ता । असि । व्वरूथम् । स्वाहा । जुषाणः । अप्तुः । आज्यस्य । व्वेतु स्वाहा ॥३५॥

**सरलार्थः-** हे आज्य ! त्वं ज्योतिरसि । किं भूतम् । सर्वरूपं बहुषु आहुतिषु उपयुक्तवात् विश्वरूपत्वम् । त्वं विश्वेषां देवानां समिन्धनमसि । देवाः आज्यं भूक्त्वा दीप्यन्ते । हे सोम ! त्वं तनूकृद्भ्यः द्वेषोभ्यः अन्यकृतेभ्यः बहुप्रकारं नियामकोऽसि त्वम् अस्माकं प्रभूतं बलमसि । तुभ्यमिदं हुतमस्तु । प्रीयमाणः सोमः आज्यं पिबतु । तस्मै इदं सुहुतमस्तु ॥

**मन्त्रः-** **अग्ग्ने नय सुपथा रायेऽअस्म्मान्विश्श्वानि देव व्वयुनानि व्विद्वान् । युयोध्ध्यस्म्मज्जुहुराणमेनो भूयिष्ठान्तेनमऽउक्क्तिँव्विधेम ॥३६॥**

**पदपाठः-** अग्ग्ने । नय । सुपथेतिसु पथा । राये । अस्म्मान् । व्विश्वानि । देव । व्वयुनानि । व्विद्वान् ॥ युयोधि अस्म्मत् । ज्जुहुराणम् । एनः । भूयिष्ठाम् । ते नमऽउक्क्तिमितिनम- उक्तिकम् । व्विधेम ॥३६॥

**सरलार्थः-** हे अग्ने ! सर्वाणि ज्ञानानि विद्वान् अस्मान् (अनुष्ठातृन्) धनाय यज्ञफलाय शोभनमार्गेण प्रापय । अस्मत् (अनुष्ठातृभ्यः- अभिलषित-क्रियातत्फलप्रतिबन्धिपापं पृथक्कुरु) । तुभ्यं बहुलतां नमस्कार-विषयां वाचं सम्पादयाम ॥

**मन्त्रः-** **अयन्नोऽअग्निर्व्वरिवस्कृणोत्त्वयम्मृधः पुरऽएतुप्प्रभिन्दन् । अयँव्वाजाञ्जयतुव्वाजसातावयᳬं शत्रूञ्जयतुजर्हृषाणः स्वाहा ॥३७॥**

**पदपाठः-** अयम् । नः । अग्निः । व्वरिवः । कृणोतु । अयम् । वृधः । पुरः । एतु । प्रभिन्दन्नितिप्प्र भिन्दन् ॥ अयम् । व्वाजान् । जयतु । व्वाजसाताविविवाज सातौ । अयम् । शत्रून् । जयतु । जर्हृषाणः। स्वाहा ॥३७॥

**सरलार्थः-** अयमग्निः अस्माकम् अभीष्टं धनं सम्पादयतु । अयमेवाग्निः संग्रामान् प्रभिन्दन् वैरिणः विदारयन् अग्रतः गच्छतु । अयमग्निः संग्रामे वाजसातौ शत्रु-सम्बन्धीनि अन्नानि अस्मदर्थं वाजान् जयतु । अयमग्निः जर्हृषाणः शत्रूञ्जयतु । तुभ्यमिदं सुहुतमस्तु ॥

**मन्त्रः-** **उरुव्विष्ण्णोव्विक्क्रमस्वोरुक्क्षयायनस्कृधि । घृतङ्घृतयोनेपिबप्प्रप्प्रयज्ज्ञपतिन्तिरस्वाहा ॥३८॥**

**पदपाठः-** उरु । व्विष्णोऽइतिविष्ण्णो । व्वि । क्रमस्व । उरु । क्षयाय । नः । कृधि । घृतम् । घृतयोनऽइतिघृत योने । पिब । प्रप्रेतिप्प्र प्र । षज्ज्जपतिमितियज्ज्म पतिम् । तिर । स्वाहा ॥३८॥

**सरलार्थः-** हे विष्णो ! व्यापिन् आहवनीय-शत्रुषु बहुलं पराक्रमं कुरु । किं च ब्रह्मगृहनिवासाय अस्मान् विस्तीर्ण यथा स्यात्तथा कुरु । धृतयोने हे अग्ने ! हूयमानमिदमाज्यं भक्षय । यज्ञपतिम् अतिशयेन वर्धय । इदं घृतं तुभ्यं सुहुतमस्तु ॥

**मन्त्रः-** **देवसवितरेषतेसोमस्तꣳरक्षस्वमात्त्वादभन् । एतत्त्वन्देवसोमदेवोदेवाꣳ॥ऽउपागाऽइदमहम्मनुष्ष्यान्त्सहरायस्पोषेणस्वाहानिर्व्वरुणस्यपाशान्मुच्च्ये ॥३९॥**

**पदपाठः-** देव । सवितः । एषः । ते । सोमः । तम् । रक्क्षस्व । मा । त्वा । दभन् ॥ एतत् । त्वम्। देव । सोम । देवः । देवान् । उप । अगाः । इदम् । अहम् । मनुष्ष्यान् । सह । रायः । पोषेण। स्वाहा । निः । व्वरुणस्य । पाशात् । मुच्च्ये ॥ अभूत् । यथायथमितियथा यथम् । अमंस्त ॥३९॥

**सरलार्थः-** हे देव जगदुत्पत्यादिक्रीडन-परायण सवितः ! जगत्प्रेरकान्तर्यामिन्, एष प्रत्यगात्मा तव सोमः समर्पणीयः पदार्थः । तं रक्षस्व मायामयेभ्यः कामक्रोधादिभ्यः शान्तिदान्ति-ब्राह्मात्मज्ञानादि-सम्पादनेन पालय । एते मायासहिता अपि कामादयः शरणागतपालकं त्वां मा दभन् ॥

**मन्त्रः-** **अग्ग्ने व्व्रतपास्त्वे व्व्रतापा या तव तनूर्म्मय्यभूदेषा सा त्वयि यो मम तनूस्त्वय्यभूदियꣳसा मयि । यथायथन्नौव्व्रतपतेव्व्रतान्यनुमेदीक्क्षान्दीक्क्षापतिरमꣳस्तानु तपस्तपस्प्पतिः ॥४०॥**

**पदपाठः-** अस्याः कण्डिकायाः पदपाठः पूर्वे निर्दिष्टः । पदानां गलितत्वात् अत्र पदपाठः नोपलभ्यते ॥

**सरलार्थः-** हे अग्ने ! त्वं स्वभावतः सर्वेषां व्रतानां पालकोऽसि तस्मात् कारणात् इदानीमपि त्वं मदीय व्रतस्य पालको भव । हे अग्ने ! व्रतप्रार्थनकाले तव सम्बन्धिनी या तनूः मयि अवस्थिता सा एषा तव तनूः त्वयि भवतु । हे व्रतपालकाग्ने ! आवयोर्व्रतानि यथायथं स्वसंबन्धम् अनतिक्रम्य सन्तु । अनुष्ठानरूपं व्रतं ममास्तु तत्पालनरूपं व्रतं तवास्तु । दीक्षायाः पालकः अग्निः मदीयदीक्षार्थं व्रतम् अङ्गीकृतवान् । तपसः पालकोऽग्निः मदीयं तपः अङ्गीकृतवान् ॥

**मन्त्रः-** **उरुव्विष्णोव्विक्क्रमस्वोरुक्क्षयायनस्कृधि । घृतङ्घृतयोनेपिबप्प्रप्प्र यज्ज्ञपतिन्तिरस्वाहा ॥४१॥**

**पदपाठः-** अस्याः कण्डिकायाः पदपाठः पूर्वे निर्दिष्टः । पदानां गलितत्वात् अत्र पदपाठः नोपलभ्यते ॥

**सरलार्थः-** चतुर्गृहीतमाज्यमाहवनीये जुहोति यूयं छेत्तुं गमिष्यन् सा यूपाहूतिः इति । अस्याः कण्डिकायाः अर्थः पूर्ववत् ज्ञेयः ॥

**मन्त्रः-** **अत्त्यन्न्याꣳ॥ऽअगान्नान्न्याꣳ॥ऽउपागामर्व्वाक्क्त्वा परेब्भ्योविदम्परोवरेब्भ्यः । तन्त्वा जुषामहे देव व्वनस्प्पते देवयज्ज्यायै देवास्त्त्वादेवयज्ज्यायैजुषन्ताँविष्णवे त्वा । ओषधेत्रायस्वस्वधितेमैनꣳ हिꣳसीः ॥४२॥**

**पदपाठः-** अति । अन्न्यान् । अगाम् । न अन्न्यान् । उप । अगाम् । अर्व्वाक् । त्वा । परेब्भ्यः । अविदम्। परः। अवरेब्भ्यः ॥ तम् । त्वा । जुषामहे । देव । व्वनस्प्पते । देवयज्ज्यायाऽइतिदेव यज्ज्यायै । देवा। त्वा । देवयज्ज्यायाऽइतिदेव यज्ज्यायै । जुषन्ताम् । व्विष्णवे । त्वा ॥४२॥

**सरलार्थः-** हे पुरोवर्ति यूपवृक्ष ! त्वत्तोऽन्यान् काँश्चिद्यूप्यानपि समप्रदेशादिलक्षण रहितान् अतिक्रान्तवान् अस्मि । पुनः कीदृशम् अत्यन्तनिकृष्टलक्षणेभ्यः दूरवर्तितम् इति यावत् । ये त्वत्तः पराञ्च वृक्षाः तेभ्यः त्वाम् अविदम्। हे वनस्पते देव ! त्वां देवयागार्थं सेवामहे । देवाः अपि देवयागार्थं त्वां सेवन्ताम् । हे यूपवृक्ष ! त्वां यज्ञार्थमुपस्पृशामि दूरवर्तिभ्यः निकटं त्वामविदम् । निकटेभ्यः परस्तात् अपि निकटमविदम् । हे ओषधे! त्वं स्वधितिभयात् मां रक्ष । हे स्वधिते परशो ! एनं यूपं मा वधीः ॥

**मन्त्रः-** **द्याम्मालेखीरन्तरिक्क्षम्माहिꣳसीः पृथिव्व्यासम्भव । अयꣳ हित्त्वास्वधितिस्तेतिजानः प्प्रणिनाय महतेसौभगाय । अतस्त्वन्देवव्वनस्प्पतेशतवल्शोव्विरोहसहस्त्रवल्शाव्वियꣳ रुहेम ॥४३॥**

**पदपाठः-** द्याम् । मा लेखीः । अन्तरिक्क्षम् । मा हिꣳसीः । पृथिव्व्या । सम् । भव ॥ अयम् । हि । त्वा। स्वधितिरितिस्व धितिः । तेतिजानः । प्रणिनाय । प्रनिनायेतिप्प्र निनाय । महते । सौभगाय । अतः। त्वम् । देव । व्वनस्प्पते । शतवल्शऽइतिशत व्वल्शः । व्वि । रोह । सहस्त्रवल्शाऽइतिसहस्त्र व्वल्शाः। व्वि । व्वयम् । रुहेम ॥४३॥

**सरलार्थः-** हे यूपवृक्ष ! द्युलोकं त्वं मा हिंसीः । अन्तरिक्षं च मा जहि । पृथिव्या सह सङ्गतो भव । यूपस्य वज्ररूपत्वात् लोकानां शान्तिः आशास्यते इति भावः । हे छिन्नवृक्ष ! अति-तीक्ष्णः अयं स्वधितिः (कुठारः) महते सौभाग्याय दर्शनीयत्वात् त्वां यज्ञाय प्रणयति यूपत्वं प्रापयति । हे देव ! वनस्पते ! अतः अस्मात् स्थाणोः त्वं शतवल्शः विशेषेण जायस्व । वयं च पुत्रपौत्रादिभिर्बहुशाखोपेताः प्रजायेमहि ॥

## शब्दार्थाः

**स्वराट्** - स्वेनैव राजते इति, **सपत्नहा** - शत्रुघाती, **वैष्णवान्** - विष्णुदेवताकान् गर्तान्, **यवः** - धान्यविशेषः, **द्युतानः** - दीप्यमानः, **अन्तरिक्षम्** - द्युलोकम्, **ऊहामि** - क्षिपामि, **दृꣳह** - दृढीकुरु, **ध्रुवासि** - स्थिरा भवसि, **पशुभिः** - गवादिभिः, **छादिः** - तृणनिर्मितः कटः, **गिर्वणः** - इन्द्रः, **विश्वतः** - सर्वतः, **स्यूः** - रज्जुः, **उशिक्** - कमनीयः, **कविः** - विद्वान्, **मित्रस्य** - आदित्यस्य, **चक्षुषा** - नेत्रेण, **ईक्षध्वम्** - पश्यत, **नः** - अस्माकम्, **मा हिꣳसीः** - मा जहि ॥

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) इन्द्रप्रीत्यर्थं प्रौढध्वनियुक्तं वाक्यं कः वदति ?

(क) उपवाख्यगर्तः (ख) वरुणः (ग) सूर्यः (घ) सोमः

(२) वैष्णवीं वाचं कः वदति ?

(क) गणेशः (ख) शिवः (ग) विष्णुः (घ) ब्रह्मा

(३) धान्य-विशेषः कः ?

(क) तिलः (ख) यवः (ग) गोधूमः (घ) एतेषु किमपि न

(४) लौकिकोदकेन उपरवानारभ्य प्रदक्षिणं अध्वर्युः उपरवान् कस्य कोणे प्रोक्षयति ?

(क) दक्षिणकोणे (ख) उत्तरकोणे (ग) पूर्वकोणे (घ) आग्नेयकोणे

(५) यज्ञरक्षकः को भवति ?

(क) शिवः (ख) विष्णुः (ग) ब्रह्मा (घ) अग्निः

(६) यजमानः कं स्पृशति ?

(क) पालाशम् (ख) खादिरम् (ग) औदुम्बरीम् (घ) अश्वत्थम्

(७) गिर्वणः कस्य देवस्य सम्बोधनं वर्तते ?

(क) इन्द्रस्य (ख) विष्णोः (ग) महेशस्य (घ) ब्रह्मणः

(८) पितृषदनाः लोकाः केन शुद्धाः भवन्ति ?

(क) धान्येन (ख) उदकेन (ग) दुग्धेन (घ) एतेषु किमपि न

(९) प्रीयमाणः सोमः किं पिबति ?

(क) जलम् (ख) सोमरसम् (ग) अमृतम् (घ) आज्यम्

(१०) अस्मिन् पाठे कति मन्त्राः विद्यन्ते ?

(क) एकत्रिंशत् (ख) विंशतिः (ग) द्वाविंशतिः (घ) त्रिंशत्

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) ''छदिः'' इति शब्दस्य कोऽर्थः ?

(२) ''अभ्रिः'' इति शब्दस्य कोऽर्थः ?

(३) विश्वव्यचा कः अस्ति ?

(४) व्रतानां पालकः कः अस्ति ?

(५) देवाः देवयागार्थं कं सेवयन्ति ?

(६) अभीष्टं धनं कः सम्पादयति ?

(७) अहिः बुध्न्यश्च कः अस्ति ?

(८) जगदुत्पत्यादिक्रीडनपरायणः कः देवः अस्ति ?

(९) ''वाजसातौ'' इति शब्दस्य कोऽर्थः ?

(१०) ''जर्हृषाणः'' इत्यस्य कोऽर्थः ?

३. **अधोलिखितानां कण्डिकानां भावार्थो लेख्यः ।**

(१) परि॑त्त्वागिर्व्वणो॒गिर॑ऽइ॒माभ॑वन्तु वि॒श्श्वत॑ः । वृ॒द्धायु॑मनु॒वृद्ध॑यो॒जुष्ट्टा॑भवन्तु॒ जुष्ट्ट॑यꣳ ॥

(२) स्व॒राड॑सिप्सपत्क्न॒हास॑त्त्र॒राड॑स्यभिमाति॒हाज॑न॒राड॑सिरक्षो॒हास॑र्व्व॒राड॑स्यमित्र॒हा ॥

(३) वि॒भूर॑सिप्र॒वाह॑णो॒व्वाह्नि॒र॑रसिहव्य॒वाह॑नꣳ । श्वा॒त्रो॒सि॒प्रचे॑तास्तु॒थो॒सिवि॒श्श्ववे॑दाꣳ ॥

४. **अधोलिखितानां कण्डिकानां पूर्तिः विधेया ।**

(१) ध्रुवासिध्रुवो ।

(२) समुद्रोसि. ।

(३) देवसवितरेषते. ।

५. **अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) वैष्णवान्

(२) द्युतानः

(३) अन्तरिक्षम्

(४) पशुभिः

(५) कटः

(६) मित्रस्य

(७) नेत्रेण

(८) आदित्यस्य

(९) गिर्वणः

(१०) यवः

६. **अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) ऊहामि

(२) भव

(३) भवथ

(४) कुरु

(५) उच्यते

(६) अस्तु

(७) असि

(८) वर्तयत

(९) अपिबत्

(१०) मुच्ये

७. **सन्धिविच्छेदनं कुरुत ।**

| | |
|---|---|
| (१) बृहन्नसि | (६) यवयारातीः |
| (२) वलगमुत्किरामि | (७) उद्दिवम् |
| (३) स्वराडसि | (८) ध्रुवासि |
| (४) वलगहनाऽउप | (९) यजमानोस्मिन् |
| (५) यवोसि | (१०) तन्त्वा |

८. **सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) ग्रीवाः + अपि | (६) सम् + ताप्तम् |
| (२) बृहतीम् + इन्द्रम् | (७) चक्षुषा + ईक्षध्वम् |
| (३) निष्टयः + यम् | (८) अप्तुः + आज्यस्य |
| (४) अशिक् + असि | (९) ज्योतिः + असि |
| (५) अजः + असि + एकपात् | (१०) राये + अस्मान् |

**छात्र-प्रवृत्तिः**

- सोमयागस्य दर्शनं कृत्त्वा कथं विधिः भवतीति ज्ञानं प्राप्तव्यम् ।

**विशिष्टज्ञानम्**

- अग्नेव्व्रतपतेव्व्रतञ्चरिष्यामि ॥

●

| ९ | ऋग्वेदीय-रुद्राभिषेकमन्त्राः-१ |
|---|---|

**प्रस्तावना**

योगक्षेमार्थं धर्मार्थकाममोक्ष-चतुर्विध-पुरुषार्थसिद्ध्यर्थं, भयसङ्कटरोगादि विनाशपूर्वकं सदभीष्टसिद्ध्यर्थं रुद्राभिषेकः ऋग्वेदीय-मन्त्रैः करणीयः ।

भगवतः रुद्रस्य मूर्ध्नि सौवर्णेन, राजतेन, ताम्रेण वा कलशेन मधुना, गव्येन, सर्पिषा, पयसा, इक्षुरसेन, नारिकेलरसेन वा केवलोदकेन अभिषेकः कर्तव्यः ।

लघुरुद्राभिषेकः, महारुद्राभिषेकः, अतिरुद्राभिषेकः इत्यादयः रुद्राभिषेकाणां प्रकाराः भवन्ति ।

ऋग्वेदीयरुद्राभिषेकमन्त्रैः अभिषेकेन महारुद्रस्य कृपा भवति तथा कृपया भक्ताः सङ्कल्पसिद्धिं प्राप्नुवन्ति । प्रस्तुते प्रकरणे एते सर्वे मन्त्राः आश्वलायन-रुद्रपद्धत्यानुसारं ऋग्वेदीयरुद्रमन्त्राः ऋग्वेदसंहितातः उद्धृताः सन्ति ।

---

**मन्त्र :-** **स्तुहिश्रुतंगर्तसदंयुवानंमृगंन भीममुपहन्तुमुग्रम् ।**

**मृलाजरित्रेरुद्रस्तवानोन्यंते अस्मन्निवपन्तु सेनाः ॥**

**मंडल. २ सूक्त - ३३ मंत्र. ११**

**पदपाठः-** स्तुहि । श्रुतम् । गर्त सदम् । युवानम् । मृगम् । न । भीमम् । उपहन्तुम् । उग्रम् । मृल । जरित्रे । रुद्र । स्तवानः । अन्यम् । ते । अस्मत् । नि । वपन्तु । सेनाः ॥

**सरलार्थः-** हे स्तोतारः ! भवन्तः यशस्विनि रथे विराजमानं, नित्यतरुणं सिंहमिव भयङ्करं, शत्रुसंहारकं, बलवन्तं रुद्रदेवं स्तुवन्तु । हे रुद्रदेव ! भवान् स्तोतॄन् सुखिनः तान् करोतु । भवतः च सेना शत्रून् संहरतु ।

**मन्त्रः-** **कुमारश्चित्पितरंवन्दमानंप्रतिनाना मरुद्रोपयन्तम् ।**

**भूरेर्दातारंसत्पतिं गृणीषेस्तुतस्त्वंभेषजारास्यस्मे ॥**

**मंडल. २ सूक्त - ३३ मंत्र. १२**

**पदपाठः-** कुमारः । चित् । पितरम् । वन्दमानम्। प्रति । ननाम । रुद्र । उपदयन्तम् । भूरे : । दातारम् । सत्पतिम् । गृणीषे । स्तुतः । त्वम् । भेषजा । रासि । अस्मे इति ॥

**सरलार्थः-** हे रुद्रदेव ! यथा पुत्रः पितरं प्रणमति तथा वयं भवतः समीपम् आगत्य प्रणमामः । हे सज्जनानां स्वामिन् ! धनद ! रुद्रदेव ! वयं भवतः स्तुतिं कुर्मः । भवान् स्तुत्या अस्मभ्यम् औषधीः ददातु ।

**मन्त्रः-** **या वो भेषजा मरुतः शुचीनियाशंतमावृषणोयामयोभु ।**

**यानि मनुरवृणी तापितानस्तारांचयोश्वरुद्रस्य वशिम ॥**

**मंडल. २ सूक्त - ३३ मंत्र. १३**

**पदपाठः-** या । वः । भेषजा । मरुतः । शुचीनि । या । शम्ऽतमा । वृषणः । या । मयःऽदभु । यानि। मनुः । अवृणीत । पिता । नः । ता । शम् । च । यः । च । रुद्रस्य । वशिम ॥

**सरलार्थः-** हे बलवन्तः मरुतः ! भवतां कल्याणकारिकाः, पवित्राः, सुखदाः च औषधीः अस्माकं पिता मनुः अवृणोत् (अयाचीत्) ताः रोगापहारिकाः औषधीः वयम् अभिलषामः ।

मन्त्रः- परिंणोहेतीरुद्रस्यंवृज्याः परिंत्वेषस्यंदुर्मतिर्महीगात् ।

अवंस्थिरामघवंद्भ्यस्तनुष्वमीढ्वस्तोकायतनंयायमृळ ॥

**मंडल. २ सूक्त - ३३ मंत्र. १४**

पदपाठः- परिं । नः । हेतिः । रुद्रस्यं । वृज्याः । परिं । त्वेषस्यं । दुःऽमतिः । मही । गात् । अवं । स्थिरा । मघवंत्ऽभ्यः। तनुष्व । मीढ्वः । तोकायं । तनंयाय । मृळ ॥

सरलार्थः- रुद्रदेवस्य महान्ति आयुधानि, तीक्ष्णानि शस्त्राणि च अस्मत् दूरे भवन्तु । दुर्बुद्धिः दूरे तिष्ठतु । हे सुखद रुद्रदेव ! ऐश्वर्ययुक्तान् याजकान् प्रति स्वस्य दृढस्य चापस्य गुणं शिथिलं करोतु । अपि च अस्माकं सन्ततिं सुखिनीं करोतु ।

मन्त्रः- एवाबंभ्रोवृषभचेकितानयथां देवन हंणीषेनहंसिं ।

हवनश्रुन्नों रुद्रेहबोंधिबृहद् वदेम विदथेंसुवीरांः ॥

**मंडळ. २ सूक्त - ३३ मंत्र. १५**

पदपाठः- एव । बभ्रोइति । वृषभ । चेकितान । यथां । देव । न । हृणीषे । न । हंसिं । हवनऽश्रुत् । नः रुद्र । इह। बोधि । बृहत् । वदेम । विदथें । सुऽवीरांः ।

सरलार्थः- हे तेजस्विन् ! सुखकर ! सर्वज्ञ ! प्रार्थनायाः ग्राहक ! रुद्रदेव ! भवान् तथा मार्गदर्शनं करोतु येन अस्माकं कारणात् भवान् कदापि न कुप्येत् । भवान् अस्मान् न नाशयतु । श्रेष्ठसन्ततिसहिताः वयं यज्ञे भवतः स्तोत्रं उच्चारयामः ।

मन्त्रः- आवोराजांनमध्वरस्यंरुद्रंहोतांरंसत्ययजंरोदंस्योः ।

अग्निंपुरातंनयित्नोरचित्तांद्धिरंण्यरूपमवंसेकृणुध्वम् ॥

**मंडल. ४ सूक्त - ३ मंत्र. १**

पदपाठः- आ । वः । राजांनम् । अध्वरस्यं । रुद्रम् । होतांरम् । सत्यऽयजंम् । रोदंस्योः । अग्निम् । पुरा । तनयित्नोः । अचित्तांत् । हिरंण्यऽरूपम् । अवंसे । कृणुध्वम् ॥

सरलार्थः- हे सत्पुरुषाः ! चञ्चला विद्युत् इव मृत्युः भविष्यति । (अतः) तत्पूर्वमेव स्वरक्षणाय यूयं समन्तात् हविर्भिः अग्निं भजध्वे । सः (अग्नि-देवः) यज्ञस्य स्वामी, देवानाम् आह्वायकः, रुद्ररूपः, आकाशस्य पृथिव्याः च मध्ये यजनक्रियाप्रवर्तकः, सुवर्ण इव आभायुक्तः च वर्तते ।

मन्त्रः- तवंश्रियेमरुतोंमर्जयन्तरुद्रयत्तेजनिंमचारु चित्रम् ।

पदंयद्विष्णोंरुपमंनिधायितेनंपासि गुह्यं नाम गोनांम् ॥

**मंडल. ५ सूक्त - ३ मंत्र. ३**

पदपाठः- तवं । श्रिये । मरुतंः । मर्जयन्त । रुद्रं । यत् । ते । जनिंम । चारुं । चित्रम् । पदम् । यत् । विष्णोंः । उपऽमम् । निऽधायिं तेनं । पासि । गृहयंम । नामं । गोनांम् ॥

सरलार्थः- हे अग्निदेव ! भवतः शोभां वर्धयितुं मरुद्गणः शोधनं करोति । हे रुद्रस्वरूप ! भवतः जन्म सुन्दरं विलक्षणं च वर्तते । भवत्कृते विष्णुदेवः उपमेयपदानि निर्धारयति । भवान् देवानाम् एतान् गूढान् अनुग्रहान् रक्षतु ।

मन्त्र :- तमुंष्टु हि यः स्विषुः सुधन्वा - योविश्वस्यक्षयंतिभेषजस्य ।

यक्ष्वामहे सौमनसाय रुद्रं नमोभिर्देवमसुरंदुवस्य ॥

मंडल. ५ सू.- ४२ मंत्र. ११

**पदपाठः-** तम् । ऊँ इति । स्तुहि । यः । सुऽइषुः । सुऽधन्वा । यः । विश्वस्य । क्षयति । भेषजस्य । यक्ष्व । महे । सौमनसाय । रुद्रम् । नमःऽभिः । देवम् । असुरम् । दुवस्य ॥

**सरलार्थः-** हे ऋत्विजः ! भवन्तः रुद्रदेवस्य सम्यक् स्तुतिं कुर्वन्तु । यः उत्तमेन बाणेन चापेन च युक्तः अस्ति, अखिलाभिः च औषधिभिः रोगं निवारयति, तस्य रुद्रदेवस्य यजनं कुर्वन्तु । मङ्गलकारकजीवनप्राप्त्यर्थं दीप्तिमन्तं प्राणदं रुद्रदेवं सप्रश्रयं सेवन्ताम् ।

**मन्त्रः-** सोमारुद्राधारयेथामसुर्यंप्रवामिष्टयोरमश्नुवन्तु ।

दमेदमेसप्तरत्नादधानाशंनोभूतं द्विपदेशं चतुंष्पदे ॥

मंडल. ६ सू.- ७४ मंत्र. १

**पदपाठः-** सोमारुद्रा । धारयेथाम् । असुर्यम् । प्र । वाम् । इष्टयः । अरम् । अश्नुवन्तु । दमेऽदमे । सप्त । रत्ना । दधाना । शम् । नः । भूतम् । द्विऽपदे । शम् । चतुःऽ पदे ॥

**सरलार्थः-** हे सोमदेव ! हे रुद्रदेव ! भवन्तौ द्वौ समर्थौ । अस्माकं सर्वे यज्ञाः भवन्तौ प्रति पूर्णतः प्राप्नुयाताम्ः । प्रत्येकं गृहे सप्तरत्नानि स्थापयन्तौ भवन्तौ अस्माकं मङ्गलं कुरुताम् । अस्मदीयेभ्यः मनुष्येभ्यः पशुभ्यश्च सुखं वितरताम् ।

**मन्त्रः-** सोमारुद्राविवृहतंविषूचीममीवायानोगयमाविवेश ।

आरेबाधेथांनिर्ऋतिंपराचैरस्मेभद्रासौश्रवसानिसन्तु ॥

मंडल. ६ सू.- ७४ मंत्र. २

**पदपाठः-** सामारुद्रा । वि । वृहतम् विषूचीम् । अमीवा । या । नः । गयम् । आऽविवेश । आरे । बाधेथाम्। निःऽऋतिम् । पराचैः । अस्मे । इति । भद्रा सौश्रवसानि । सन्तु ॥

**सरलार्थः-** हे सोमदेव ! हे रुद्रदेव ! भवन्तौ अस्माकं गृहाणि प्रविष्टान् रोगान् नाशयेताम् । दरिद्रता अस्मत् दूरे तिष्ठतु [भवतु] । अन्नयुक्ताः वयं सुखेन वसेम ।

**मन्त्रः-** सोमारुद्रायुवमेतान्यस्मेविश्वातनूषुभेषजानिधत्तम् ।

अवस्यतंमुश्चतंयन्नोअस्तितनूषुबद्धंकृतमेनोअस्मत् ॥

मंडल. ६ सू.- ७४ मंत्र. ३

**पदपाठः-** सोमारुद्रा । युवम् । एतानि । अस्मे इति । विश्वा । तनूषु भेषजानि । धत्तम् । अव । स्यतम्। मुञ्चतम् । यत् । नः । अस्ति । तनूषु । बद्धम् । कृतम् । एनः । अस्मत् ॥

**सरलार्थः-** हे सोमदेव ! हे रुद्रदेव ! भवन्तौ अस्माकं शरीरे सर्वाः औषधीः धारयेताम् । अस्माकं बन्धनम् उद्घाटयेताम्। अस्मान् च मोचयेताम् ।

**मन्त्रः-** तिग्मायुधौतिग्महेतीसुशेवौसोमारुद्राविहसुमृळतंनः ।

प्रनोमुञ्चतंवरुणस्यपाशाद्गोपायतंनःसुमनस्यमाना ॥

मंडल. ६ सू.- ७४ मंत्र. ४

**पदपाठः-** ति॒ग्मऽआ॑युधौ । ति॒ग्महे॑ती॒ इति॑ ति॒ग्मऽहे॑ती । सु॒ऽशेवौ॑ । सोमा॑रुद्रौ । इ॒ह । सु । मृ॒ळ॒त॒म् । न॒ः । प्र । न॒ः । मु॒ञ्च॒त॒म् । वरु॑णस्य । पाशा॑त् । गो॒पा॒यत॑म् । नः । सु॒ऽम॒न॒स्यमा॑ना ॥

**सरलार्थः-** तीक्ष्णायुधधारिणौ ! सुचिन्तकौ ! सुसेव्यौ ! हे सोमरुद्रौ ! भवन्तौ अस्मान् वरुणपाशात् मोचयित्वा उत्तमं सुखं प्रयच्छेताम् ।

**मन्त्रः-** **इ॒मारु॒द्राय॑स्थि॒रध॑न्वने॒गिर॑ःक्षि॒प्रेष॑वेदे॒वाय॑स्व॒धाव्ने॑ ।**

**अषा॑ह्लाय॒सह॑मानायवे॒धसे॑ति॒ग्मायु॑धायक्षरताशृणोतु॑नः ॥**

**मंडल. 7 सू.- ४६ मंत्र. १**

**पदपाठः-** इ॒माः । रु॒द्राय॑ । स्थि॒रऽध॑न्वने । गिर॑ः । क्षि॒प्रऽइ॑षवे । दे॒वाय॑ । स्व॒धाऽव्ने॑ । अषा॑ह्लाय । सह॑मानाय। वे॒धसे॑ । ति॒ग्मऽआ॑युधाय । भ॒र॒त॒ । शृ॒णोतु॑ । नः ॥

**सरलार्थः-** एतानि स्तोत्राणि दृढं धनुर्धरं क्षिप्रं बाणम्, अस्यन्तम्, अजेयं, तीक्ष्णशस्त्रधरम्, अन्नपरिपूर्णं रुद्रदेवं तोषयन्तु। सः तानि (अस्माकं स्तोत्राणि ) शृणोतु ।

**मन्त्रः-** **सहि॒क्षये॑ण॒क्षम्य॑स्य॒जन्म॑न॒ः साम्रा॑ज्येनदि॒व्यस्य॒चेत॑ति ।**

**अव॒न्नव॑न्ती॒रुप॑नो॒दुर॑श्चरानमी॒वोरु॑द्र॒जासु॑नोभव ॥**

**मंडल. 7 सू.- ४६ मंत्र. २**

**पदपाठः-** सः । हि । क्षये॑ण । क्षम्य॑स्य । जन्म॑नः । साम्ऽरा॑ज्येन । दि॒व्यस्य॑ । चेत॑ति । अव॑न् । अव॑न्तीः । उप॑ । न॒ः । दुर॑ः । च॒र॒ । अ॒न॒मी॒वः । रु॒द्र॒ । जासु॑ । न॒ः । भ॒व॒ ॥

**सरलार्थः-** हे रुद्रदेव ! भवान् भौतिकीभिः दिव्याभिः च विभूतिभिः ज्ञातुं शक्यते । भवान् सर्वान् प्रसादयतः अस्मान् स्वस्थान् कृत्वा अस्माकं गृहे वसतु ।

**मन्त्रः-** **यातेदि॒द्युदव॑सृष्टादि॒वस्परि॑क्ष्म॒याचर॑ति॒परि॒सावृ॑णक्तुनः ।**

**स॒हस्रं॑तेस्वपिवातभेष॒जामान॒स्तो॒केषुतन॑येपुरीरिषः ॥**

**मंडल. 7 सू.- ४६ मंत्र. ३**

**पदपाठः-** या । ते॒ । दि॒द्युत् । अव॑ऽसृष्टा । दि॒वः । परि॑ । क्ष्म॒या । चर॑ति । परि॑ । सा । वृ॒णक्तु॒ । न॒ः । स॒हस्र॑म् । ते॒ । सु॒ऽअ॒पि॒वा॒त॒ । भे॒ष॒जा । मा । न॒ः । तो॒केषु॑ । तन॑येषु । रि॒रि॒षः ॥

**सरलार्थः-** वायु इव सञ्चरणशील हे रुद्रदेव ! भवता सञ्चारिता आकाशस्था विद्युत् अस्मान् न क्लेशयतु । भवतः सहस्रशः औषधयः अस्माकं बालकान् न क्षाययन्तु ।

## शब्दार्थः

**गतसदम्** - रथे विराजमानम् , रथारूढम्, **निवपन्तु** - संहरतु, **सत्पतिम्** - सज्जनानां स्वामिनम्, **गृणीषे** - स्तुतिं करोमि, **भेषजा** - ओषधिः, **शुचीनि** - पवित्राणि, **शंतमानि** - सुखदाः, **अवृणीत** - अयाचीत्, **हेतिः** - आयुधम्, **परिवृज्याः** - परिवर्जयतु, **दुर्मतिः** - दुर्बुद्धिः, **अवतनुष्व** - शिथिलीकुरु, **तनयाय** - तत्पुत्राय, **कामानांवषितः** - अभीष्टदायकः, **न हंसीः** - न नाशयतु, **अवसे** - रक्षणाय, **स्विषुः** - उत्तमः बाणः, **इष्टयः** - यज्ञाः, **अरमलं** - पर्याप्तम्, **द्विपदे** - अस्मत्कृते, **चतुष्पदे** - पशवे, **अमीवा** - रोगः, **विष्वक्** - सर्वथा, **विवृहत** - अपसाश्यत, **निर्ऋतिं** - अकल्याणम्, **तनुषु** - अङ्गेषु, **अव** - रक्षस्व, **गिरः** - वाणी, **दिव्यस्य** - स्वर्गसम्बन्धिनः, **अनमीवा** - निरोगाः, **मारीरिषः** - न क्षाययन्तु / हिंसां मा कुरु

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) रुद्राभिषेकमन्त्रैः भक्तः किं प्राप्नुवन्ति ?

(क) सङ्कल्पं (ख) सङ्कल्पसिद्धिं (ग) सन्मित्रं (घ) धनं

(२) योगक्षेमार्थं मनुष्यैः किं करणीयम् ?

(क) ध्यानम् (ख) भजनम् (ग) रुद्राभिषेकः (घ) अभिषेकः

(३) भगवतो रुद्रस्य कस्मिन् अङ्गे अभिषेकः कर्तव्यः ?

(क) हस्तयोः (ख) चरणयोः (ग) मूर्ध्नि (घ) उदरे

(४) 'गर्तसदम्' शब्दस्य कोऽर्थः ?

(क) गर्ते पतितम् (ख) भीमम् (ग) प्रसिद्धम् (घ) रथे विराजमानम्

(५) अभिषेकः केन पात्रेण कर्तव्यः ?

(क) चषकेन (ख) चमसेन (ग) कलशेन (घ) घटेन

(६) बलवन्तं रुद्रदेवं के स्तुवन्तु ?

(क) स्तोतारः (ख) दरिद्राः (ग) भक्तारः (घ) मरुद्गणाः

(७) वयं कीदृशीः औषधीः अभिलषामः ?

(क) सुखदाः (ख) पवित्राः (ग) रोगापहारिकाः (घ) बलवतीः

(८) श्रेष्ठ सन्ततिसहिताः वयं यज्ञे किम् उच्चारयामः ?

(क) मंत्रम् (ख) श्लोकम् (ग) स्तोत्रम् (घ) गीतम्

(९) मनुष्येभ्यः पशुभ्यः च किं वितरताम् ?

(क) सुखं (ख) दुःखम् (ग) भयम् (घ) क्रोधम्

(१०) सोमारुद्रौ कस्मात् मुञ्चेताम् ?

(क) वरुणपाशात् (ख) यमपाशात् (ग) रुद्रपाशात् (घ) इन्द्रपाशात्

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) रुद्राभिषेकाणां प्रकाराः के भवन्ति ?

(२) प्रस्तुते पाठे कस्य संहितायाः मन्त्राः सन्ति ?

(३) रुद्राभिषेकः किमर्थं करणीयः ?

(४) केन द्रव्येण अभिषेकः कर्तव्यः ?

(५) अग्निदेवस्य शोभां वर्धयितुं कः शोधनं करोति ?

(६) रुद्रदेवः केन युक्तः अस्ति ?

(७) सप्तरत्नानि स्थापयन्तौ भवन्तौ अस्माकं किं कुरुताम् ?

(८) केन युक्ताः वयं सुखेन वसेम ?

(९) रुद्रदेवः काभिः ज्ञातुं शक्यते ?

(१०) आकाशस्था विद्युत् अस्मान् किं न करोतु ?

**३. अधोलिखितानां कण्डिकानां भावार्थो लेख्यः ।**

(१) सोमारुद्राधारयेथामसुर्यंप्रवामिष्टयोरमश्नुवन्तु । दमेदमेसप्तरत्नादधानाशंनोभूतंद्विपदेशंचतुष्पदे ॥

(२) आवोराजानमध्वरस्यरुद्रंहोतारंसत्ययजंरोदस्योः । अग्निपुरातनयित्नोरचित्ताद्धिरण्यरूपमवसेकृणुध्वम् ॥

(३) अयंयोनिश्चकृमायंवयन्तेजायेवपत्यउशतीसुवासाः । अर्वाचीनःपरिवीतोनिपीदेमाउतेस्वपाकप्रतीचीः ॥

**४. निम्नलिखित-मन्त्राणां पूर्तिः विधेया ।**

(१) इमारुद्रा ............... शृणोतुनः ॥

(२) स्तुहिश्रुतं ................. सेनाः ॥

(३) परिणोहेती ....................... तनयायमृळ ॥

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) कृपया | (६) मरुतः |
| (२) पयसा | (७) सुधन्वा |
| (३) शत्रूणाम् | (८) तनयेषु |
| (४) भवतः | (९) अस्माभिः |
| (५) संहितायाः | (१०) तया |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

| | |
|---|---|
| (१) भवन्ति | (६) वदेम |
| (२) निवपन्तु | (७) क्रुध्यसि |
| (३) कृणुध्वम् | (८) उपचर |
| (४) अश्नुवन्तु | (९) वश्मि |
| (५) करणीयम् | (१०) कुरु |

**७. सन्धिविच्छेदनं कुरुत ।**

| | |
|---|---|
| (१) केवलोदकेन | (६) कुमारश्चित |
| (२) अस्मन्निवपन्तु | (७) ईश्वराधानाविच्चत्तशांतिः |
| (३) अवन्तीरुप | (८) हविर्भिरग्निम् |
| (४) केनाप्यभिभूताय | (९) भूरेर्दातारम् |
| (५) मघवद्भ्यस्तनुष्व | (१०) पश्यन्तीति |

८. **सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) तिग्म + आयुधौ | (६) रूपम् + अवसे |
| (२) तनयित्नोः + अचितात् | (७) मीढ्वः + तोकाय |
| (३) दुर्मतिः + महीगात् | (८) भूरेः + दातारम् |
| (४) अस्मत् + आरोग्यम् | (९) सः + हि + क्षयेण |
| (५) नः + भव | (१०) तिग्म + आयुधाय |

**छात्र-प्रवृत्तिः**

- ऋग्वेदीय-स्वर-प्रक्रिया ज्ञेया ।

**विशिष्टज्ञानम्**

- स्वधास्थतर्पयतमे पितृन् ।

●

# १० ऋग्वेदीय-रुद्राभिषेकमन्त्राः-२

**प्रस्तावना**

भगवतः रुद्रस्य प्रसन्नता-प्राप्त्यर्थं यजमान : निष्कामभावनया रुद्राभिषेकं करोति चेत् सः रुद्रस्वरूपं भवति अर्थात् मुक्तिं प्राप्नोति ।

विविध-फलापेक्षया पृथक्-पृथक् द्रव्यैरपि रुद्राभिषेकः क्रियते यथा -

**''जलेन वृष्टिमाप्नोति व्याधिशान्त्यै कुशोदकैः ।**

**दध्ना च पशुकामाय श्रिया इक्षुरसेन वै ॥**

**मध्वाज्येन धनार्थी स्यान्मुमुक्षुस्तीर्थवारिणा**

**पुत्रार्थी पुत्रमाप्नोति पयसा चाभिषेचनात् ॥''**

वृष्टिः-प्राप्त्यर्थं जलेन, व्याधि-शान्त्यर्थं (रोग-निवारणार्थं) कुशोदेकन, पशुकामनार्थं दध्ना, लक्ष्मीप्राप्त्यर्थम् इक्षुरसेन, धनार्थं मधुना च आज्येन, मोक्षार्थं तीर्थवारिणा, पुत्रार्थं पयसा गवय-श्रृङ्गेण ऋग्वेदीयरुद्राभिषेक मन्त्रैः भगवद्-रुद्रस्य उपरि अभिषेकः करणीयः ।

अत्र पुस्तुते पाठे रुद्राभिषेकसन्दर्भे मन्त्राः समुद्धृताः सन्ति । एते ऋग्वेदीय मन्त्राः सन्ति ।

---

**१ मन्त्रः-** **मानो॑वधीरुद्रमापरा॑दामाते॑भूमप्रसि॑तौहीळि॒तस्य॑ । आनो॑भजब॒र्हिषि॑जीवशं॒सेयू॒यंपा॑तस्व॒स्तिभिः॒सदा॑नः ॥ मंडल. २ सूक्त - ४६ मंत्र. ४**

**पदपाठः-** मा । न॒ः । व॒धीः॒ । रु॒द्र॒ । मा । परा॑ । दा॒ः । मा । ते॒ । भू॒म॒ । प्र॒ऽसि॑तौ । ही॒ळि॒तस्य॑ । आ। न॒ः । भ॒ज॒ । ब॒र्हिषि॑ । जी॒व॒ऽशं॒से । यू॒यम् । पा॒त॒ । स्व॒स्तिहभि॑ः । सदा॑ । न॒ः ॥

**सरलार्थः-** हे रुद्रदेव! भवान् अस्मान् न मारयतु । भवान् अस्मान् न त्यजतु । भवतः क्रोधबन्धनानि अस्मान् न बध्नन्तु । प्राणिभिः प्रशस्तेषु कार्येषु अस्मान् योजयतु । कल्याणप्रदैः साधनैः अस्मान् रक्षतु ।

**२ मन्त्रः-** **त्र्यम्बकं जाममहे सु॒गन्धिं॑ पु॒ष्टि॒वर्ध॑नम् । उ॒र्वा॒रु॒कमि॑व बन्ध॑नान्मृ॒त्योर्मु॑क्षीय मामृता॑त् ॥ (परिशिष्ट)**

**पदपाठः-** त्रि अ॑म्बकम् । य॒जा॒म॒हे॒ । सु॒गन्धिम् । पुष्टि॒वर्धनम् । उर्वा॒रु॒कम् । इ॑व । बन्ध॑नात् । मृ॒त्योः । मु॒क्षीय॒। मा । अ॒मृता॑त् ॥

**सरलार्थः-** नेत्रत्रयोपेतं, दिव्यगन्धोपेतं, धनधान्यादिपुष्टेः वर्धयितारं रुद्रं पूजयामः । यथा कर्कटी फलं पक्वं भूत्वा स्वस्य वृन्तात् प्रमुच्यते तथैव मरणात् संसाराद् वा मोचय ॥

**३ मन्त्रः-** **अ॒स्मे रु॒द्रा मे॒हना॒ पर्व॑तासो वृ॒त्र॒हत्ये॒ भर॑हूतौ स॒जोषा॑ः । यः शंस॑ते स्तु॒वते धायि॑ प॒ज्र इन्द्र॑ ज्येष्ठा अस्माँ अ॑वन्तु दे॒वाः ॥**

**पदपाठः-** अ॒स्मे इति॑ । रु॒द्राः । मेहना॑ । पर्व॑तासः । वृ॒त्र॒ऽहत्यै॑ । भर॑हूतौ । स॒ऽजोषा॑ः । यः । शंस॑ते । स्तु॒वते॒। धायि॑ । प॒ज्रः । इन्द्र॑ऽ ज्येष्ठाः । अ॒स्मान् । अ॒व॒न्तु॒ । दे॒वाः ॥

**सरलार्थः-** सर्वेषां देवानां वृत्रहा इन्द्रः मुख्यः शक्तिमान् च वर्तते । सः स्तोतृणां पुरतः गच्छति । वृष्टिकरैः मेघैः, रुद्रैः सह रणाङ्गणे सः अस्मान् रक्षतु ।

**४ मन्त्रः-** **त्वंसो॑म॒प्रचि॑कितोनमनी॒षात्वंरजि॑ष्ठ॒मनु॑नेषि॒पन्था॑म् । तव॒प्रणी॑तीपि॒तरो॑नइन्दोदे॒वेषु॒रत्न॑मभजन्त॒धीरा॑ः ॥ मं.३ सू.३१ मंत्र १**

**पदपाठः-** त्वम् । सो॒म॒ । प्र । चि॒कि॒तः । म॒नी॒षा ।. त्वम् । रजि॑ष्ठम् । अनु॑ । ने॒षि॒ । पन्था॑म् । तव॑ । प्रहनी॑ती । पि॒तरः॑ । न॒ः । इ॒न्दो॒ इति॑ । दे॒वेषु॑ । रत्न॑म् । अ॒भ॒ज॒न्त॒ । धीरा॑ः ॥

**सरलार्थः-** हे सोमदेव ! वयं स्वबुद्ध्या भवन्तं जानीयाम । भवान् अस्मान् सुपथं नयति । अस्माकं पूर्वजाः भवतः नेतृत्वे अनुगमनं कृत्वा देवेभ्यः रमणीयं सुखं प्राप्तुं सफलाः अभवन् ।

**५ मन्त्रः-** **त्वंसो॑म॒क्रतु॑भिःसु॒क्रतु॑र्भू॒स्त्वंदक्षैः॑सु॒दक्षो॑वि॒श्ववे॑दाः । त्वंवृषा॑वृष॒त्वेभि॑र्म॑हि॒त्वाद्यु॒म्नेभि॑र्द्यु॒म्न्यंभवोनृ॒चक्षा॑ः ॥ मं.३ सू.३१ मंत्र २**

**पदपाठः-** त्वम् । सो॒म॒ । क्रतु॑ऽभिः । सु॒ऽक्रतुः॑ । भूः । त्वम् । दक्षैः॑ । सु॒ऽदक्षः॑ । वि॒श्वऽवे॑दाः । त्वम् । वृषा॑ । वृ॒ष॒ऽत्वेभिः॑ । म॒हि॒ऽत्वा । द्यु॒म्नेभिः॑ । द्यु॒म्नी । अ॒भ॒वः॒ । नृ॒ऽचक्षा॑ः ॥

**सरलार्थः-** हे सोमदेव ! नैककर्मसम्पादकः भवान् सुकर्मा इति प्रसिद्धः अस्ति । सर्ववित् भवान् नैककर्मकुशलः सन् दक्षः अस्ति । भवान् नैकबलयुक्तः अस्ति, अतः महाबलः अस्ति । भवान् तेजस्विधनेन युक्तः अस्ति। वैभवेन च सम्पन्नः अस्ति ।

**६ मन्त्रः-** **रा॒ज्ञो॒नुते॒वरु॑णस्यव्र॒तानि॑बृ॒हद्ग॑भी॒रन्तव॑सो॒म॒धाम॑ । शुचि॒ष्ट्वम॑सिप्रि॒योनमि॒त्रोद॒क्षाय्यो॑अर्य॒मेवा॑सिसोम ॥ मं.३ सू.३२ मंत्र ३**

**पदपाठः-** राज्ञः॑ । नु । ते॒ । वरु॑णस्य । व्र॒तानि॑ । बृहत । ग॒भीरम् । तव॑ । सो॒म॒ । धाम॑ । शुचिः॑ । त्वम्। अ॒सि॒ । प्रि॒यः । न । मि॒त्रः । द॒क्षाय्यः॑ । अ॒र्य॒माऽइ॑व । अ॒सि॒ । सो॒म॒ ॥

**सरलार्थः-** हे सोमदेव ! भवान् अतीव पवित्रः अस्ति । भवतः धाम विस्तृतं भव्यं च अस्ति । राज्ञः वरुणस्य सर्वेभ्यः नियमेभ्यः भवान् मुक्तः अस्ति । भवान् मित्रसदृशः प्रीति-करः अस्ति । भवान् अर्यमा इव अतीव कुशलः अस्ति ।

**७ मन्त्रः-** **याते॒धामा॑निदि॒वियापृ॑थि॒व्यांयापर्व॑ते॒ष्वोष॑धीष्व॒प्सु । तेभि॑र्नो॒विश्वैः॑सु॒मना॒अहे॑ळन्राज॑न्त्सोम॒प्रति॑ह॒व्यागृ॑भाय ॥ मं.३ सू.३२ मंत्र ४**

**पदपाठः-** या । ते॒ । धामा॑नि । दि॒वि । या । पृ॒थि॒व्याम् । या । पर्व॑तेषु । ओष॑धीषु । अ॒प्ऽसु । तेभिः॑ । न॒ः । विश्वैः॑ । सु॒ऽमना॑ः । अहे॑ळन् । राज॑न् । सो॒म॒ । प्रति॑ । ह॒व्या । गृ॒भा॒य॒ ॥

**सरलार्थः-** हे राजन् ! हे सोम ! भवतः उत्तमानि स्थानानि आकाशे, पृथिव्यां पर्वतेषु, ओषधिषु जले च वर्तन्ते। भवान् सर्वेभ्यः स्थानेभ्यः द्वेषरहितेन प्रसन्नेन मनसा अत्र आगत्य अस्माकं हविः गृह्णातु ।

**८ मन्त्रः-** **त्वंसो॑मासि॒सत्प॑ति॒स्त्वंराजो॒तवृ॑त्र॒हा । त्वंभ॒द्रोअ॑सि॒क्रतुः॑ ॥ मं.३ सू.३२ मंत्र ५**

**पदपाठः-** त्वम् । सो॒म॒ । अ॒सि॒ । सत्ऽप॑तिः । त्वम् । राजा॑ । उ॒त । वृ॒त्र॒ऽहा त्वम् । भ॒द्रः । अ॒सि॒ । क्रतुः॑॥

**सरलार्थः-** हे सोमदेव ! भवान् श्रेष्ठः अधिपतिः अस्ति । भवान् सर्वेषां नेता पोषकः च अस्ति । वृत्रनाशकः भवान् कल्याणकारकस्य बलस्य मूर्तं रूपम् अस्ति ।

**९ मन्त्रः-** **त्वंचसोमनोवशोजीवातुंनमरामहे । प्रियस्तोत्रोवनस्पतिः ॥ मं.३ सू.३२ मंत्र ६**

**पदपाठः-** त्वम् । च । सोम । नः । वशः । जीवातुम् । न । मरामहे । प्रियऽस्तोत्रः । वनस्पतिः ॥

**सरलार्थः-** हे सोमदेव ! भवान् अस्माकं दीर्घायुष्याय प्रशस्यः वनस्पतिः अस्ति । भवतः आनुकूल्यात् वयं मृत्योः रक्षणं प्राप्स्यामः [न म्रियामहे]

**१० मन्त्रः-** **त्वंसोममहेभगंत्वंयूनऋतायते । दक्षंदधासिजीवसे ॥ मं.३ सू.३२ मंत्र ७**

**पदपाठः-** त्वम् । सोम । महे । भगम् । त्वम् । यूने । ऋतहयते । दक्षम् । दधासि । जीवसे ॥

**सरलार्थः-** हे सोमदेव ! भवान् महायज्ञस्थ-सम्पादकः अस्ति । भवान् तरुणेभ्यः उपासकेभ्यः सुष्ठु जीवनार्थं बलं सद्भाग्यं च ददाति ।

**११ मन्त्रः-** **त्वंनःसोमविश्वतोरक्षाराजन्नधायतः । नरिष्येत्वावतःसखा ॥ मं.३ सू.३२ मंत्र ८**

**पदपाठः-** त्वम् । नः । सोम । विश्वतः । रक्ष । राजन् । अघऽयतः । न । रिष्येत् । त्वाऽवतः । सखा॥

**सरलार्थः-** हे राजन् सोमदेव ! भवता रक्षितः कदापि न नश्यति । भवान् दुष्टेभ्यः पापेभ्यः अस्मान् सर्वतः रक्षतु।

**१२ मन्त्रः-** **सोमयास्तेमयोभुवऊतयःसन्तिदाशुषे । ताभिर्नोविताभव ॥ मं.३ सू.३२ मंत्र ९**

**पदपाठः-** सोम । याः । ते । मयःऽभुवः । ऊतयः । सन्ति । दाशुषे । ताभिः । नः । अविता । भव ॥

**सरलार्थः-** हे सोमदेव ! हव्यदातृणां सुखमयजीवनार्थं, स्वरक्षणसामर्थ्यैः रक्षणं करोतु ।

**१३ मन्त्रः-** **इमंयज्ञमिदंवचोजुजुषाणउपागहि। सोमत्वंनोवृधेक्षव ॥ मं.३ सू.३२ मंत्र १०**

**पदपाठः-** इमम् । यज्ञम् । इदम् । वचः । जुजुषाणः । उपऽआगहि । सोम । त्वम् । नः । वृधे ॥ भव ॥

**सरलार्थः-** हे सोमदेव ! भवान् अस्मिन् यज्ञे, अस्मदीयाः स्तुतयः स्वीकरोतु । अस्माकं समीपम् आगत्य (अस्माकं) वृद्धिं करोतु ।

**१४ मन्त्रः-** **सोमगीर्भिष्ट्वावयंवर्धयामोवचोविदः । सुमृळीकोनआविशा ॥ मं.३ सू.३२ मंत्र ११**

**पदपाठः-** सोम । गीःऽभिः । त्वा । वयम् । वर्धयामः । वचःऽविदः । सुऽमृळीकः । नः । आ । विश॥

**सरलार्थः-** हे स्तुतिज्ञ सोमदेव ! वयं स्ववाग्भिः भवन्तं वर्धयामः । भवान् ससुखं प्रविशतु ।

**१५ मन्त्रः-** **गयस्फानोअमीवहावसुवित्पुष्टिवर्धनः । सुमित्रःसोमनोभव ॥ मं.३ सू.३२ मंत्र १२**

**पदपाठः-** गयऽस्फानः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः । सुऽमित्रः । सोम । नः । भव ॥

**सरलार्थः-** हे सोमदेव ! भवान् अस्माकं वृद्धिकरः, रोगनाशकः, धनदाता, पुष्टिवर्धकः, उत्तमं मित्रं च भवतु ।

**१६ मन्त्रः-** **सोमरारन्धिनोहृदिगावोनयवसेष्वा । मर्यइवस्वओक्ये ॥ मं.१ सू.३२ मंत्र १३**

**पदपाठः-** सोम । ररन्धि । नः । हृदि । गावः । न । यवसेषु । आ । मर्यःऽइव । स्वे । ओक्ये ॥

**सरलार्थः-** हे सोमदेव ! यथा गावः यवक्षेत्रेषु मनुष्याः स्वगृहेषु च रमणं कुर्वन्ति तथैव भवान् अस्माकं हृदये रमणं करोतु ।

**१७ मन्त्रः- यःसोमसख्येतवरारणद्देवमर्त्यः । तंदक्षःसचेतकविः ॥ मं.१ सू.३२ मंत्र १४**

**पदपाठः-** यः । सोम । सख्ये । तव । ररणत् । देव । मर्त्यः । तम् । दक्षः । सचते । कविः ॥

**सरलार्थः-** हे सोमदेव ! यः याजकः भवतः मित्रतया (मैत्र्या) युक्तः भवति, सः एव मेधावी (बुद्धिमान्), कुशलः ज्ञानी च भवति ।

**१८ मन्त्रः- उरुष्याणोअभिशस्तेःसोमनिपाह्यंहसः । सखासुशेवएधिनः ॥ मं.१ सू.३२ मंत्र १५**

**पदपाठः-** उरुष्य । नः । अभिऽशस्तेः । सोम । नि । पाहि । अंहसः । सखा । सुऽशेवः । एधि । नः ॥

**सरलार्थः-** हे सोमदेव ! अस्मान् अपयशसः (अपमानात्) रक्षतु । अस्मान् पापेभ्यः रक्षतु । अस्माकं सुखकरं मित्रं भवतु ।

**१९ मन्त्रः- आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यम् । भवावाजस्यसंगथे ॥ मं.१ सू.३२ मंत्र १६**

**पदपाठः-** आ । प्यायस्व । सम् । एतु । ते । विश्वतः । सोम । वृष्ण्यम् । भव । वाजस्य । सम्ऽगथे।।

**सरलार्थः-** हे सोमदेव ! भवान् वृद्धिं प्राप्नोतु । भवान् सर्वतः बलवान् भवतु । सङ्ग्रामे अस्माकं सहायकः भवतु।

**२० मन्त्रः- आप्यायस्वमदिन्तमसोमविश्वेभिरंशुभिः । भवानःसुश्रवस्तमःसखावृधे ॥ मं.१ सू.३२ मंत्र १७**

**पदपाठः-** आ । प्यायस्व । मदिन्ऽतम । सोम । विश्वेभिः । अंशुऽभिः । भव । नः । सुश्रवःऽतमः । सखा। वृधे ॥

**सरलार्थः-** हे आह्लादक ! सोमदेव ! भवान् स्वदिव्यगुणानां यशोगाथाभिः सर्वासु दिक्षु विस्तरतु । अस्माकं विकासाय भवान् मित्ररूपेण साहाय्यं करोतु ।

## शब्दार्थः

**मा वधीः** – न मारयतु / मा हिंसीः, **वर्हिषि** – यज्ञे (प्रशस्तेषु कार्येषु), **आभज** – योजय, **यजामहे** – पूजयामः, **मेहना** – सेचकः, **मृत्योः** – मरणात्, **मुक्षीय** – मोचय, **धायि** – गच्छति, **ब्रह्मद्विषः** – शत्रून्, **शं** – कल्याणम्, **ऊरुक्रमः** – विष्णुः, **पज्रः** – शक्तिमान्, **सुदक्षः** – सुबलः, **दिवि** – स्वर्गे, **सुमनाः** – शोभनमनाः, **वृत्रहा** – वृत्रासुरस्य हन्ता, **भद्रः** – कल्याणकारकः, **मरामहे** – म्रियामहे, **वनस्पतिः** – वननामोषधिः, **जीवसे** – जीवितुम्, **भगं** – धनं, **विदधासि** – करोषि, **रिष्येत्** – विनश्येत्, **अविता** – रक्षिता, **जुजुषाणः** – सेवमानः, **उपागहि** – उपागच्छ, **वृधं** – यज्ञस्य वर्धनाय, **गयस्फानः** – धनस्य वर्धयिता, **सचते** – अनुगृह्णासि, **अभिसस्ते** – अपमानात्, **उरुष्य** – रक्षस्व, **आप्यायस्व** – वर्धस्व, **वृष्णयम्** – सामर्थ्यम्

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) व्याधिशान्त्यर्थं केन अभिषेकः करणीयः ?

(क) जलेन (ख) आज्येन (ग) इक्षुरसेन (घ) कुशोदकेन

(२) कस्य प्रसन्नता-प्राप्त्यर्थं रुद्राभिषेकः करणीयः ?

(क) जनस्य (ख) रुद्रस्य (ग) देवस्य (घ) वेदस्य

(३) पृथक् - पृथक्-द्रव्यैः किमर्थं रुद्राभिषेकः क्रियते ?

(क) मोक्षार्थं (ख) धनार्थं (ग) विविधफलापेक्षया (घ) पशुकामनार्थं

(४) कः अस्मान् मा हिंसीः ?

(क) अग्निः (ख) इन्द्रः (ग) रुद्रः (घ) सोमः

(५) कल्याणप्रदैः शब्दस्य समानार्थी कः ?

(क) स्वस्तिभिः (ख) स्वस्तिः (ग) स्वस्तैः (घ) स्वस्तये

(६) वयं स्वबुद्ध्या कं जानीयाम ?

(क) सोमं (ख) रुद्रं (ग) इन्द्रं (घ) अग्निं

(७) नैककर्मकुशलः सन् सोमः कीदृशः अस्ति ?

(क) रमणीयः (ख) मुख्यः (ग) दक्षः (घ) मुक्तः

(८) सोमः केन सम्पन्नः अस्ति ?

(क) वैभवेन (ख) वस्त्रेण (ग) शस्त्रेण (घ) जलेन

(९) 'धनस्य वर्धयिता' शब्दस्य पर्यायः कः ?

(क) पुष्टिवर्धनः (ख) गयस्फानः (ग) जुजुषाणः (घ) सुश्रवस्तमः

(१०) सोमस्य उत्तमानि स्थानानि कुत्र वर्तते ?

(क) ओषधिषु (ख) मन्दिरेषु (ग) गृहेषु (घ) क्षेत्रेषु

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) निष्कामभावनायै रुद्राभिषेकेन यजमानः किं प्राप्नोति ?

(२) पुत्रार्थी केन द्रव्येण अभिषेकं करोतु ?

(३) सोमः तरुणेभ्यः किं ददाति ?

(४) सोमः केभ्यः अस्मान् सर्वतः रक्षतु ?

(५) अपमानात् रक्षणं कः करोतु ?

(६) 'स्वर्गे' शब्दस्य पर्यायः अत्र किं वर्तते ?

(७) सोमदेवः सुखमयजीवनार्थं केषां रक्षणं करोतु ?

(८) कः मेधावी भवति ?

(९) स्तुतिज्ञः कः अस्ति ?

(१०) सोमदेवः कथम् अस्माकं हृदये रमणं करोतु ?

**३. अधोलिखितानां कण्डिकानां भावार्थौ लेख्यः ।**

(१) त्वंसो॑म॒प्रचि॑कितोमनी॒षात्वंरजि॑ष्ठ॒मनु॑नेषि॒पन्था॑म् । तव॒प्रणी॑तीपि॒तरो॑नइन्दोदे॒वेषु॒रत्न॑मभजन्त॒धीरा॑ः ॥

(२) त्वंसो॑म॒क्रतु॑भिःसु॒क्रतु॑र्भू॒स्त्वंदक्षैः॑सु॒दक्षो॑वि॒श्ववे॑दाः । त्वंवृषा॑वृष॒त्वेभि॑र्महि॒त्वाद्यु॒म्नेभि॑र्द्यु॒म्न्यवोनृ॒चक्षा॑ः ॥

(३) ग॒य॒स्फानो॑अमीव॒हाव॑सु॒वित्पु॑ष्टि॒वर्धनः । सु॒मि॒त्रःसो॑मनोभव ॥

**४. निम्नलिखित-मन्त्राणां पूर्तिः विधेया ।**

(१) त्र्यबकं ..................... मामृतात् ॥

(२) मानोवधी रुद्र .................. सदा नः ॥

(३) अस्मेरुद्राः ............................... देवाः ॥

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) विश्वेभिः
(२) अस्माकम्
(३) हे सोम !
(४) त्वयि
(५) राज्ञः
(६) शुचिः
(७) ब्राह्मणानाम्
(८) मधुना
(९) दिक्षु
(१०) पितरः

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) प्राप्नुहि
(२) म्रियामहे
(३) यजामहे
(४) धायि
(५) अस्ति
(६) वृधे
(७) विदधासित
(८) सचते
(९) उरुष्य
(१०) भवति

७. **सन्धिविच्छेदनं कुरुत ।**

(१) विश्वेभिरंशुभिः

(२) शुश्रवस्तमः

(३) अन्नप्रदो भव

(४) तेभिर्नो

(५) त्वमसि

(६) तथैव

(७) पर्वतेष्वोषधीषु

(८) वृद्धिकारणोऽसि

(९) तंदक्षः

(१०) नोहृदि

८. **सन्धिसंयोजनं कुरुत ।**

(१) सम् + गथे

(२) सम् + एतु

(३) ओषधीषु + अप्सु

(४) राज्ञः + नु

(५) शुचिः + त्वम्

(६) मर्यः + इव

(७) गावः + न

(८) यवसेषु + आ

(९) भूः + त्वम्

(१०) त्वम् + सोम + असि

**छात्र-प्रवृत्तिः**

- ऋग्वेदीय-रुद्राभिषेकमन्त्रैः पृथक् - पृथक्-द्रव्यैः अभिषेकः करणीयः ।

**विशिष्टज्ञानम्**

- चरित्राँस्ते शुन्धामि ।

●

# ११ सामवेदीय-रुद्राभिषेकमन्त्राः भागः-1

**प्रस्तावना**

चतुर्षु वेदेषु उपासनायुक्तोऽयं वेदः अर्थात् सामवेदः ।''सहस्त्रवर्त्मा सामवेदः'' इति महाभाष्यकार पतञ्जलिमतानुसारं सामवेदस्य सहस्त्रा शाखा आसन् । साम्प्रतसमये तिस्रः शाखाः सन्ति । यथाः ''राणायनीयशाखा'' ''कोथुमीयशाखा'' ''जैमिनीयशाखा'' इति । एतासु तिसृषु शाखासु ''कौथुमीयशाखा'' प्रसिद्धा विख्याताश्च । कौथुमीयशाखा-माध्यमेन सामवेदस्य भागद्वयं पूर्वार्चिक उत्तरार्चिकश्चेति । पूर्वाचिके काण्डत्रयं विद्यते । ''आग्नेयकाण्डः'' इन्द्रियकाण्डः ''पवमानकाण्डश्चेति'' आहत्य सामवेदे ''सप्तविंशतिः अध्यायाः'' सन्ति । ''पञ्चसप्तत्युत्तराष्टशत्तोत्तरसहस्रं (1875) मन्त्राः सन्ति । सामवेदस्य पञ्चसप्ततिः मन्त्रान् विहाय अवशिष्टाः मन्त्राः ऋग्वेदस्य शाकलशाखायाम् अपि दृश्यन्ते । सामवेदे अग्निस्तुतिः इन्द्रसोमादि तथा ईश्वरस्तुतिः दरीदृश्यन्ते । प्रस्तुतोऽयं पाठः सामवेदात् उद्धृतोऽस्ति । अस्मिन् पाठे आग्नेय एन्द्र काण्डस्य कतिपय मन्त्राः स्वीकृताः सन्ति। रुद्राभिषेक-कारकाः इमे मन्त्राः सन्ति ।

एतेषु मन्त्रेषु इन्द्रस्तुतिः सोमनिष्पादनम् ऐश्वर्योत्पादनम् ईश्वर-प्रार्थना प्रभृत्यादयः विषयाः सन्ति ।

---

**साममंत्रः** **ॐ सुष्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् । आनो भर सुवितं यस्य कोना तना त्मना सहह्यामा त्वोताः ॥ पूर्वार्चिक तृ. अ. ३३ खण्ड, मंत्रसंख्या ३१६**

**सामगानम् :** सूष्वाणासाः । इन्द्रस्तु । मसित्वा । सनिष्यन्तश्चितुविनृ । म्णवा२ ३ ४ जाम् । आनः । भराओ २३४ वा । सुवितयंस्यको । ना तानात्माना । सहिया । मा ३४३ । तू ३ तो ५ ता ६५६ः ॥१॥

ओ ३ हो ३ होइ । सू २३४ ष्वा । णासाः । इन्द्रस्तु । मसित्वा । ओ ३ हो ३ होइ । सा २३४ नी । ष्यन्त्राः । ची ३ तु वि । नृम्णवाजाम् । ओ ३ हो ३ होइ । आ २३४ नाः । भरा । सुविता३म् । यस्यकोना। ओ३हो३होइ । ता २३४ ना । त्मना । सहिया । मा ३४३ । तू ३वो ४ ता ६५६ः ॥२॥

**सरलार्थः-** हे इन्द्र ! भोग्यपदार्थानां सेवनं कुर्वन्तो वयम् आनन्द रसानां सम्पादनं कुर्वन्तः ते स्तुतिं कुर्मः अतः अस्मभ्यम् उत्तमं बलम् ऐश्वर्यम् एवं प्रेमबद्धम् अतीव उत्तमं धनं वसु ददातु तथा धनानां स्वयमेव प्राप्ताः भवामः।

**साममंत्रः-** **आ तू न इन्द्र क्षुमन्तं चित्रं ग्राभंऽसं गृभाय । महा हस्ती दक्षिणेन ॥ पूर्वाचिक तृ. आ. ३३ खण्ड मंत्रसंख्या - ३१७**

**सामगानम् :**-आतुनआ । द्रक्षुमा २३न्ताम् । चाइत्रंग्रामा २३ड्हाइ । संगृ२भाया । महाहस्तो २३४ हाइ । दक्षा रयिणायिना । मेहा २३ । हा २ स्ता २३४ औहोवा । दक्षिणे ३ना २३४५ ॥३॥

आतुनइन्द्रक्षुमान्ताम् । चित्रा २ ग्रा २३४ भाम् । सगृभा २३४ या ।

मा३हा३ । हा २ स्ता २३४ औहोवा । दक्षिणेना २३४५ ॥४॥

आतुनइ । दूक्षुमाद्दन्ताम् । चित्रग्रामङ्संगृभा २ या । चित्रग्राभङ्न्सां । गृ । औ ३ होइ । भा २३४ या । ऐहोइ । महाहस्तीदक्षा २३ होइ । औहो । वाहो २३४ वा । णा दयिनो ६ हाइ ॥५॥

आतुनइन्द्रक्षुमाद्दन्ताम् । चित्रग्राभङ्संगृभाया । चित्रग्राभङ्सं । गृं २३ । ई २३ हा । भा २३४ या । ऐहोइ ॥ महाहस्तीदक्षा २३ होइ । औहो । वाहो २३४ वा । णा ४ इनो ६ हाइ ॥६॥

**सरलार्थः-** हे इन्द्र ! ऐश्वर्यं विशालहस्तेन अन्नादि धनं तथा ग्रहीतुं योग्यम् अद्‌भुतम् आश्चर्ययुक्तं ज्ञानं उत्तम-प्रकारकं ज्ञानम् उत्तम साधनैः संगृहाणं कारय ।

**साममंत्रः-** **मृज्यमानः सुहस्त्या समुद्रे वाचमिन्वसि । रयिं पिशङ्गं बहुलं पुरुस्पृह पवमानाभ्यर्षसि ॥**

**सामगानम्ः-** मृज्यमानाः । सुहेसित्या ३ । सामू ३ द्रायिवा । चेमिन्वसा ३ इ । राची ३म्पाशि

गवहुला३म्। पूरु रस्पृ २३४ हाम् । पवमा । ना । औ ३ हो । भियो २३४ वा । षा ५ सो ६ हाइ ॥७॥

**सरलार्थः-** हे शोभन अङ्गुलियुक्त! दशप्राणसाधनैः युक्तम् अज्ञान हर्तः ज्ञान-सम्पन्न-कर्तः सोम ! त्वं समुद्रः आनन्दरसस्य उत्पत्ति-स्थान-हृदयाकाशंःपवित्रं कुर्वन् । वेदवाणीं वदन्त सन्ति । हृदयात् पापहारि त्वम् । पीतसुवर्ण-समानान्ः कान्तियुक्तान्ः स्पृहणीयान् सुवर्णादि-सुन्दर-ऐश्वर्यविशेषान् प्रयच्छ ।

**साममंत्रः-** **आमन्द्रैरिन्द्र हरिभिर्याहि मयूररोमभिः । मात्वा केचिन्नियेमुरिन्नपाशिनोतिधन्वेव ताँ इहि ॥**

**सामगानम्ः-** आ मन्द्रैरा । द्रहरिभाइर्याहिमयूरा २ रोमाभा ३इः । मात्वाकाइचीत् । नियेम् २३४ रीत् । नपाशिनाः ।

अतिधान्वे २। वताङ् २३ । आ २ इहा २३४ औहोवा । वा २३४ याः ॥९॥

आमिन्द्रैरिन्द्रे । हा ५ रिभाइः । याहिमयूररोमभाइः । मोत्वाका २ ३ इचीत् ॥ नाइयेमुरित् । नपाशा २३ इनाः । अताइधा २३न्वे । वता ः २३ । आ २ इहा २३४ औहोवा । वयो३ भी २३४५ः ॥१०॥

आमन्द्रैरिन्द्र । हा ५ रिभीः । याहिमयूररोमभाउ । वा र । मात्वा २ । केचिन्नियेमुरिन्नपाशिनाउ । वा २ । आती २ । धन्वेवता ३ १ उवा २३ । ई २३४ हीं ॥११॥

**सरलार्थः-** हे मघवन् ! अत्यन्त प्रशंसायुक्त उत्तम हर्षदातः त्वं मयूररोमपुच्छसदृशः रोम-अनिल-विद्युत्-कान्तियुक्तः ज्ञानतन्तुयुक्तः ज्ञानसहितं त्वं शीघ्रम् आयाहि तथा जालसमानं बन्धनादि त्वां निरुद्धं न कुर्युः । तथा बाणविमान-अन्तरिक्ष-सदृशः गतियुक्तः भूत्वा त्वं समागच्छ ।

**साममंत्रः-** **आ नो विश्वासु हव्यमिन्द्रिं समत्सु भूषत । उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ॥**
**पू.तृ. अ. खंड २८ मंत्र २६९**

**सामगानम्:-** आनः । एविश्वा । सुहाव्या रम् । आइन्द्रसम । त्सुभू१ षाता । ऊ २३४ पा । हा ३ हाइ । ब्रह्माणिसवना । तिवृत्रहान् । परम २३ज्याः । आर्चा ३ हाइ । षमा । औ३होवा । हो५इ । डा ॥१२॥

आनाविश्वासुहाहाव्याम् । इंद्रङ्समत्सुभूषतो । पब्रा २३ ह्ना । णिसवना । निवृत्रहान् । परमा २३ ज्याः । ऋचीषा२३मा ३४३ । ओ २३४५ इ । डा ॥१३॥

आनोविश्वासु हाव्याम् । इंद्राम् । समत्सुभूषत । उपाब्रा २ ह्ना २ णिसवनानिवृत्रहन् । परामा २ ज्या २ :। ऋचीषा २३ मा ३४३ । ओ २३४५ इ । डा ॥१४॥

**सरलार्थः-** वयम् आनन्दपर्यन्तं स्तुतियोग्यं ईश्वरं प्रार्थयामः । हे विघ्ननिवारक ! अधिकबलयुक्त ! अरीणां नाशं कुरु। हे सर्वस्तुतिषु समानयुक्त ! ईश्वर ! मन्त्र-यज्ञादि-उपासनाकर्मणि जनाः त्वामेव अलङ्कुर्वन्ति ।

**साममंत्रः-** **प्रसेनानीः शरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना । भद्रान् कृण्वन्निन्द्रहवांत्सजिभ्य आ सोमो वस्त्रा रभसानिदत्ते ॥**

**पू.पं.अ. खंड ५५ मंत्र ५३३ ॥**

**सामगानम्:-** हो ४वा । उहुवा ३ । होवा । प्रसेनानाइः । शूरोआ ३ । ग्राइरथानाम् । गव्यन्नेताइ । हर्षता ३ इ। अस्यसेना । भद्रान्कृण्वान् । इन्द्रहा ३ । वान्तसखिभ्याः । आसोमोवा । स्त्रा ३रभ । सानिदत्ताइ । हो ४ वा । उहुवा ३ । होवा ६ । हाउवा ॥१५॥

औहो ३वा ३४५ । प्रसेनानाइः । शूरोआ ३ । ग्राइरथानाम् । गव्यन्तेताइ । हर्षता ३इ । अस्यसेना । भद्रान्कृण्वान् । इन्द्रहा ३ । वान्तखभ्याः । आसोमोवा । स्त्रा ३ रभ । सा ३४३ । नी ३दा ४त्ता ६५६इ ॥१६॥

ओहो ३ वा ३४५ । प्रसेनानाइः । शूरोआ ३ । ग्राइरथानाम् । गव्यन्नेताइ । इर्षता ३इ । अस्यसेना । भद्रान्कृण्वान् । इन्द्रहा ३ । वान्तसखिभ्याः । ओहो ३ वा ३४५ । आसोमोवा । स्त्रा ३२भ । सा ३४३ । नी ३ दा ४ । ता २३४इ ॥१७॥

**सरलार्थः-** यथा पृथ्वी अवनिं जेतुं सेनानायकः शूरवीरः बलवान्, रथारोहि सैनिकादिनाम् अग्रे चलति, एवं स्वमित्रेभ्यः नृपः सुखदायकः चाश्वयुक्तः उज्जवलवस्त्रं धारयति, तथैव आत्मा सोमइन्द्रिय-गणानां नयता रणयोग्यस्थाने मुख्यपदे आत्मभूम्याम् अग्रे चलति, तेन समस्त इन्द्रियगणः प्राणगणश्च प्रसन्नः भवति । साधकप्राणगणश्च सह आत्मा आवरणं दूरीकरोति तथा उज्जवलरूपं सः प्रयच्छति धारयति वा इति भावः ।

## शब्दार्थः

**तुविनृम्णः** - वसु,धनम्, **स्तुमसि** - स्तुतिं, **सुवितम्** - शोभनयुक्तम्, **त्वोताः** - त्वं, **तना** - वसु, द्रव्यम्, **रयिम्** - धनम्, **मघवन्** - इन्द्रः, **सहयामा** - लभेत, प्राययेत्, **क्षुमन्तम्** - अन्नादि, **ग्रामम्** - गृहितुं योग्यः, **दक्षिणेन**- दक्षिणहस्तेन, **सुहस्त्या** - शोभनअङ्गुलियुक्तः, **पिशङ्गम्** - पीतसुवर्णादि, **मयूररोमभिः** - मयुररोमपृच्छसदृशम्, **विश्वासु**- सर्वत्र, दिक्षु, **समत्सु** - पर्वसु, यज्ञेषु, **ब्रह्माणि** - स्तुतिं, **सेनानीः** - सेनानायकाः, **शूरः** - वीरः ।

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) चतुर्षु वेदेषु उपासनायुक्तः वेदः कः ?

(क) ऋग्वेदः (ख) यजुर्वेदः (ग) सामवेदः (घ) अथर्ववेदः

(२) सामवेदे कति अध्यायाः सन्ति ?

(क) २२ (ख) २७ (ग) २५ (घ) २६

(३) प्रथममन्त्रे कस्य देवस्य स्तुतिः अस्ति ?

(क) इन्द्रस्य (ख) विष्णोः (ग) रुद्रस्य (घ) अग्नेः

(४) शोभन-अङ्गुलियुक्तः देवः कः ?

(क) विष्णुः (ख) सोमः (ग) अग्निः (घ) रुद्रः

(५) 'मघवन्' शब्दस्य कोऽर्थः ?

(क) मयुरः (ख) इन्द्रः (ग) हर्षः (घ) विष्णुः

(६) पञ्चमे मन्त्रे कस्य देवस्य स्तुतिः वर्तते ?

(क) सोमस्य (ख) विष्णोः (ग) रुद्रस्य (घ) अग्नेः

(७) ''रयिम्'' शब्दस्य कोऽर्थः ?

(क) ऐश्वर्यम् (ख) धनम् (ग) समुद्रः (घ) आनन्दः

(८) सामवेदस्य अवशिष्टाः मन्त्राः कस्मिन् वेदे दृश्यन्ते ?

(क) ऋग्वेदे (ख) यजुर्वेदे (ग) सामवेदे (घ) अथर्ववेदे

(९) सामवेदे कति मन्त्राः सन्ति ?

(क) 1875 (ख) 1975 (ग) 1800 (घ) 2000

(१०) कति प्राणाः ?

(क) नव (ख) दश (ग) सप्त (घ) अष्ट

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) ''सहस्त्रवर्त्मा सामवेदः'' इति कः उक्तवान् ?

(२) साम्प्रतसमये सामवेदस्य कति शाखाः सन्ति ? के च ते ?

(३) सामवेदस्य पूर्वार्चिके कति काण्डानि सन्ति कानि च तानि ?

(४) वयं किं प्रापयामः ?

(५) इन्द्रः अस्मभ्यं किं संगृहाण कुरु ?

(६) इन्द्रः सुन्दरः किं प्रयच्छतु ?

(७) वयं कि भूत्वा समागच्छाम ?

(८) वयं किं प्रार्थयामः ?

(९) वयं त्वामेव किं अलङ्कुर्मः ?

(१०) पृथिवी कुत्र चलति ?

**३. निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) आ तू न इन्द्र ..................................... ।

(२) मृज्यमानः ............................................ ।

(३) आमन्द्रैरिन्द्रः .................................. ।

**४. निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) साममंत्रः ॐ सुय्वाणास इन्द्र स्तुमसि त्वा सनिष्यन्तश्चित्तुविनृम्ण वाजम् ।
आनो भर सुवित यस्य कोना तना त्मना सह्यामा त्वोताः ॥

(२) साममंत्रः आ नो विश्वासु हव्यमिन्द्रꣳ समत्सु भूषत ।
उप ब्रह्माणि सवनानि वृत्रहन् परमज्या ऋचीषम ॥

(३) साममंत्रः प्रसेनानीः शूरो अग्रे रथानां गव्यन्नेति हर्षते अस्य सेना ।
भद्रान् कृण्वन्निन्द्रहवांत्सजिभ्य आ सोमो वस्त्रा रभसानिदत्ते ॥

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) इन्द्रः | (६) वृत्रहन् |
| (२) यस्य | (७) सवनानि |
| (३) दक्षिणेन | (८) सखिभ्यः |
| (४) चित्रम् | (९) रथानाम् |
| (५) समुद्रे | (१०) सोमः |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

| | |
|---|---|
| (१) इन्वसि | (६) प्रयच्छ |
| (२) भवामः | (७) समागच्छ |
| (३) अर्षसि | (८) कुर्वन्ति |
| (४) हर्षते | (९) धारयति |
| (५) एति | (१०) सन्ति |

**७. सन्धिविच्छेदनं कुरुत ।**

| | |
|---|---|
| (१) सुहस्त्या | (६) धन्वेव |
| (२) वाचमिन्वसि | (७) कृण्वन्निन्द्रः |
| (३) पवमानाभ्यर्षसि | (८) उपस्थितोऽयम् |
| (४) आमन्द्रैरिन्द्रः | (९) युक्तोऽयम् |
| (५) चिन्निये | (१०) विख्याताश्च |

**८. सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) सनिष्यन्तः + चित् | (६) हव्यम् + इन्द्रम् |
| (२) त्वा + उताः | (७) गव्यम् + एति |
| (३) क्षुमन्तम् + चित्रम् | (८) उद्धृतः + अस्ति |
| (४) हरिभिः + पाहि | (९) स्वयम् + एव |
| (५) पाशिनः + अति | (१०) अभि + अर्षसि |

**छात्र-प्रवृत्तिः**

- सामवेदीय-मन्त्राणाम् उच्चारण-पद्धतिः ज्ञेया ।

**विशिष्टज्ञानम्**

- दुश्चरितात् बाधस्वामा सुचरिते भज ।

# १२ सामवेदीय-रुद्राभिषेकमन्त्राः भागः-२

**प्रस्तावना**

पृथिव्यां मनुष्यजन्म मुक्तिप्राप्त्यर्थं भवति । कैवल्यप्राप्त्यर्थं मनुष्यः नैकान् उपायान् करोति । यथा- पूजा, यज्ञ, ध्यानम् इत्यादयः तेषु एव, एकोपायः उपासना विद्यते सामवेदे उपासनायै नैकाः मन्त्राः सन्ति अस्मिन् पाठे सामवेदस्य आग्नेयकाण्डात् इन्द्रकाण्डात् पवमानकाण्डाच्च कतिपयमन्त्राः संगृहीताः सन्ति रुद्राभिषेकार्थमपि इमे मन्त्राः प्रयोज्यन्ते च। पाठेऽस्मिन् इन्द्रप्रार्थना पावकसोमप्रार्थना विश्वसृष्टेरुत्पत्तिः रुद्रस्य स्वरूपम् इत्यादि-विषयाः सन्ति ।

---

**साममंत्रः-** **पवित्रं ते विततं ब्रह्मणस्पते प्रभु र्गात्राणि पर्येषि विश्वतः । अतप्ततनून तदामो अश्नुते शृतास इद्वहन्तः सं तदाशत ॥ पू.पंचम अ. खंड ५७ मंत्र ५३५**

**सामगानम्-** पवित्रन्तेविततंब्रह्मणस्पते ३ । हुवे २३ । २ । हौवा ३ हा ३ । हाइ । प्रभुर्गात्राणिपरियेषिविश्वतो २३ः । हुवे २३ । २ । हौवा ३ हा ३ हाइ । अतप्ततनूर्नतदा २ मौ अश्रुते ३ । हुवे २३ । २ । हौवा ३ हा ३ हाइ । शृतासइद्वहन्तः संतदा २ शत । हुवे २३ । २ । हौवा ३ हा ३ । हा ३४ । औहोवा । अर्कोदेवाना रपरमेवियो २ मा २३४५ न् ॥१॥

पवित्रन्ते विततब्रह्मणस्पते ३ । हुवाइ । औहोवा २ । प्रभुगात्राणिपरियेषिविश्वता २३ः । हुवाइ । औहावा २ । अतप्ततनूर्नतदा २ मौ अश्रुते ३ । हुवाइ । औहोवा २ । शृतासइद्वहन्तः सन्तदा २ शत । हुवाइ । औहो २ । वा २३४ । औ होवा । अर्कस्वदेवाः परमेवियो २ मा २३४५ न् ॥२॥

**सरलार्थः-** हे ब्रह्मणस्पते ! त्वं ज्ञानरूपः ब्रह्म एवं महाब्रह्माण्डस्य स्वामी असि, तव पवित्रस्य ज्ञानस्य सामर्थस्य च प्रभावः सर्वत्र अस्ति । त्वं गात्रस्य अन्तः बहिः च असि । इदं शरीरं तपस्यया च तप्तं न करोति सः ज्ञानं न प्राप्नोति । तपोमयउपासनया परिपक्वमनुष्यः एव तव भक्त्यपि परमसुखं प्राप्नोति ।

**साममंत्रः-** **इदं विष्णुर्वि चक्रमे त्रेधा नि दधे पदम् । समूढमस्य पाँ सुले ॥ पू.अ. २३ खंड २२२**

**सामगानम्ः-** इदा ६ मे । विष्णू २ः। विचक्रा २३४ मोइ । त्रायिधानि । दधाइपा १ दा २ म् । समू २ हो १ । ढा २३ मौ ३ । स्यों २ पा २३४ औहोवा । ए ३ । सुले १ ॥३॥

**सरलार्थः-** देहादि-सर्वव्यापकः ईश्वरः जगत्यस्मिन् सर्वत्र गतियुक्तः अस्ति संचरति स्वकीयं शक्तिमंत्रषु लोकेषु प्रसायति स्थापयति अस्मिन् जगति प्रत्येक-परमाणुरूपं परमाणौ स्थितोऽस्ति संचरति च इति भावः ।

**साममंत्रः-** **प्रक्षस्य वृष्णो अरुषस्य न महः प्र नो वचो विदथा जातवेदसे । वैश्वानराय मतिर्नव्यसे शुचिः सोम इव पवते चारु-रग्नये ॥ पू. अ. खंड ६२ मंत्र ६०९**

**सामगानम्-** हाउ । ३ । ऊर २ ॥ २ ॥ ऊ २ । वा ३ । हाउवा ३ । हस्हहस् । अर्चिः शोचिस्तपोहरः । प्रक्षस्यवृष्णो- अरूषस्यनूमा २३हाः । प्रनोवचोविदथाजातवेदा २३ साइ । वैश्वानरायमतिर्नव्यसेशू २३चीः । सोमइवपवतेचारुरग्ना २३या ३ इ । हाउ । ३ । ऊं २ । २ । ऊ २। वा ३ । हाउवा ३ । ई २३४५ ॥४॥

**सरलार्थः-** सर्वव्यापकः सर्वान्तर्यामि सर्वेषाम् अन्तरसंपर्ककर्ता पदार्थ-सर्वज्ञ-परमेश्वरस्य अध्वरे यज्ञे नः वाणी उत्तमं वर्णनं कुर्यात् । स्तुतिः योग्यं नरेषु सा वाणी व्यापकज्ञानस्वरूपा परमात्मनि ज्ञानादि-ब्रह्मानन्दसमाना उत्तमरूपा प्रकटी भवतु ।

**साममंत्रः- प्र काव्यमुशनेव ब्रुवाणो देवो देवाना जनिमा विवक्ति । महि व्रतः शुचिबन्धुः पावकः पदा वराहो अभ्येतिरेभन् ॥ पू. पं. अ. खंड ५४ मंत्र ५२४**

**सामगानम्ः-** हाउहाउहुप् । प्रकाावियाम् । बशने । वब्रुवाणाः । देवोदेवा । ना ३ ञ्जनि । माविवक्ति । महिव्रताः । शुचिबा ३ । धुः पवाकाः । हाउहाउ हुप् । पदावरा । हो ३ अभि । आ ३४इ । ती ३ रा ५ इभा ६४६ न् ॥५॥

**सरलार्थः-** यथा विद्वान् मेधावी वेदज्ञानं उत्तमरित्या उपदिशति तथा वसु आदि एवम् इन्द्रिय-प्राणादीनां रहस्यं स्पष्टं करोति । एवं विशाल महत्वकर्मयुक्तः शुद्धतेजोयुक्तः सुमित्रसर्वपावनकर्ता ज्ञानोपदेशाय रहस्यात्तमः सुखप्रद-लोकान् प्राप्नोति ।

**साममंत्रः- सहस्रशीर्षाः पुरुषः सहस्राक्ष सहस्रपात् । स भूमिंसर्वतो वृत्वात्यतिष्ठद् दशांगुलम् ॥ पू. खंड ६४ मंत्र ६१७**

**सामगानम्ः-** उहुवाहाउ । ३ । सहस्रशीर्षाः पुरू २३ षाः । सहस्राक्षः सहस्र २३ पात् । सभूमिसर्वतोवा २३ त्त्वा । अत्यतष्ठिद्दशांगू २३लाम् । उहुवाहउ ।२। उहुवा ३ हाउ । वा ३ । इट्इडा २३४५ ॥६॥

**सरलार्थः-** सहस्रशिरोयुक्तः असंख्य-नेत्रधारी असंख्य-चरणयुक्तः सः विराटपुरुषः सर्वत्र सर्वव्यापकः ईश्वरः व्याप्तस्सन् भूमिम् आवृत्तः दशाङ्गुलं यावत् दूरोऽस्ति अर्थात् परमात्मा ब्रह्मसंसारे अन्तर्बहिश्च व्याप्तोऽस्ति तेषां ज्ञानं सत्पुरुषाणां हृदि विद्यते ।

**साममंत्रः- त्रिपादूर्ध्व उदैत्पुरुषः पादोऽस्येहा भवत्पुनः । तथा विष्वङ्व्यक्रामशनानशने अभि ॥ पू. खंड ६३ अ. ६ मंत्र ६१८**

**सामगानम्-** उहुवौहोवा २ । ३ । त्रिपादूर्ध्वउदैत्परू २३ षाः । पादोस्येहाभवत्पू २३ नाः । तथाविष्वङ्वियक्रा २३ मात् । अशनानानशनेओ २३ भी ॥ उहुवौहोवा २ । २ । उहुवौ । हो २ । वा २३४ । औहोवो । ई २३४ डा । उहुवौहोवा२।२ । उहुवौ । हो २ । वा २३४ । औहोवा । सू २३४ वाः । उहुवौहोवार । २उहुवौ । हो२ । वा २३४ औहोवा । ऊ २३४५ ॥७॥

**सरलार्थः-** ब्रह्माण्डेस्मिन् शयनकर्ता सर्वव्यापकः परमात्मा आनन्दस्वरूपोऽस्ति, तस्य ज्ञानं क्रियारूपं भूत्वा ब्रह्माण्डेस्मिन् सत्तारूपं धारयति, एवम् अस्य पुरुषस्य तृतीयः भागः उपरि अन्तरिक्षे चतुर्थभागः अस्मिन् ब्रह्माण्डे पृथिव्यादि-तत्त्वेषु परमाणुरुपःईश्वर अस्ति । परमात्मा पूर्णावस्थायां सर्वत्र जीवभोक्तृभावेन परिव्याप्तोस्ति ।

**साममंत्रः- पुरुष एवेदं सर्वं यद् भूतं यच्चं भाव्यम् । पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि ॥**

**सामगानम्:-** इयौहोवा २। ३ । पुरूषएवेदꣳसा २३ र्वाम् । यद्भूतयच्चभावा २३ याम् । पादोस्यसर्वाभूता २३ नी। त्रिपादस्यामृतंदा २३ इवी । इयौहोवा २ । २ । इयौ । हो २। वा २३४ । औहोवा । इ २३४ ज्यो २३४ तीः । इयौहोवा २ । २ । इयौ । हो २ । वा २३४ औहोवा । ई २३४५ ॥८॥

**सरलार्थः-** जगतः त्रिकालत्वं (भूत, भविष्य, वर्तमान) सः पुरुषः एव पुरुषस्य चतुर्थः अंशः इदं जगत् अस्य पुरषस्य विनाश विकार रहितं अंशत्रयं प्रकाश स्वरूपं ब्रह्माण्डे विद्यमानम् अस्ति ।

**साममंत्रः-** **तावानस्य महिमा ततो ज्यायाꣳश्च पुरुषः । उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥**

**सामगानम्:-** हाउ । ३ तावानस्य । महा २३ मा ३ । हाउ । ३ । ततोज्यायाङ्श्चपुरु २३ षा ३ः । हाउ । ३ । उतामृतत्वस्येशा २३ ना ३ः । हाउ । ३ । यदन्नेनातिरोहा २३ तौ ३ । हाउ ३। वा ३ । ट्इडा २३४५ ॥९॥

**सरलार्थः-** भूत - भविष्य - वर्तमान जगतः आधारः यावत् विद्यते तावत् अस्य विराट् पुरुषस्य महिमा वस्तुतः पुरुषः ततः महिम्नः अपि ज्यायान् वर्तते । यत् किञ्चित् अन्नेन जायते तत् सर्वम् अपि मोक्षस्य अधिष्ठाता विराट् पुरुषः परमात्मा एव विद्यते ।

**साममंत्रः-** **ततो विराडजायत विराजो अधि पुरुषः । स जातो अत्यरिच्यत पश्चाद्भूमि मथो पुरः ।।**

**सामगानम्:-** हाउऽ३ वा । ततोविराडजायत । हाउ ऽ३ वा । विराजोअधिपुरुषः । हाऽउ ३ । सजातोअत्यरिच्यत। हाउ ३ वा । पश्चाद्-भूमिमथोपुरः ॥ हाउ ३ वा । ई २३४५ ॥१०॥

**सरलार्थः-** तस्मात्पुरुषात् हिरण्यगर्भः नामक ब्रह्माण्डम् उत्पन्नम् अभवत् । तस्मात् विराट्-पुरुषात् जीवः प्रकटितः ततः सः एव भिन्न-भिन्न प्रकारैः जीवानां प्राणिनां च उत्पत्तिम् अकरोत् तथा प्राण्यादीनां निवासाय पृथिव्याः रचनां कृतवान् ।

**साममंत्रः-** **कयानश्चित्र आ भुव दूती सदा वृधः सखा । कया शचिष्ठया वृता ॥ पू. द्वि. अ. १८ खण्ड मंत्र १६९**

**सामगानम्:-** हाउ । ३ । अस्मिनस्मिन् । ३ । नृम्णाइनृम्णम् । ३ । निधाइमाहे । ३ । कायानश्चित्रा ओभू १ वा २ त् । ऊतीसदावृ ३ धाः सा १ खा २ । कायाशचिष्ठा ३ यावा १ त्ता २३ । हाउ । ३ । अस्मिनस्मिन् । ३ । नृम्णाइनृम्णम् । ३ । निधाइमाहे । २ । निधा २३इ । मा २ । हा २३४ औहोवा । दुवज्योती २३४५ः ॥११॥

**सरलार्थः-** सत्यबलेन वर्धमानः इन्द्रः प्रभूतज्ञानकर्तुयोग्यपूर्वसामर्थ्यज्ञानेन पूर्वसामर्थ्य ज्ञानाभ्याम् अति शक्तिसम्पन्नः बलयुक्तः बुद्धियुक्तश्च कर्मणा एवं व्यवहारेण अस्माकं मित्रं भवति । उत्तरं प्रज्ञावत्तमया ।

**साममंत्रः-** **आ वो राजानमध्वरस्य रुद्रꣳ होतारꣳ सत्ययजꣳरोदस्योः ।**

**अग्निं पुरा तनयित्नोरचित्ताद्धिरण्यरूपमवसे कृणुध्वम् ॥ प.प्रथम अ. खण्ड ७ मंत्र ६९**

**सामगानम्:-** आवोराजा । नमध्व । रस्यरूद्राम् । हो । ता । राम् । स । त्ययजा ३म् । रोदसीयोः । अग्निपु । रा । तनयि । त्नोरचित्तात् । हिरण्य । रू । पा ३ मव । सा ३४३इ । का ३ र्णुं ५ ध्वा ६५६ ॥ १२ ॥

**सरलार्थः-** हिंसारहित यज्ञाधिपतिः उत्कृष्टरूपेण गच्छन् दुष्टजनान् रोदयिता द्यौः एवम् पृथिव्याः सत्यबलेन दानकर्तुः आकाशः पृथिव्यां बल एवम् अन्नस्यदाता मनोहरः सुवर्णमनाः उज्ज्वलः तेजामयः सूर्यसमानः परमेश्वरः चेतना रहितः व्यापकः विद्युतः पूर्वविद्यमानः स्वरक्षार्थम् अस्ति ।

**साममंत्रः-** **तद्वो गाय सुते सचा पुरुहूताय सत्वने । शं यद्गवे न शाकिने ॥ पू. द्वि. २ १३ खण्ड मंत्र ११५**

**सामगानम्:-** तदोहोवा । गाया र। सुताइसा २३४ चो । पुरुहूता । यसात्वा १ना २ इ । शंयत् । हा औं ३ होइ। गा २३४ वाइ ॥ ना २ शा २३४ औहोवा । ए ३ । किने २३४५ ॥१३॥

तद्वोगाया । सुतइसचा ३ । परू २३ हूता ३४ । हाहो ३ । यासत्वा २३४ नाइ । शंयदूचदूगा २३ वै । नशौ २ । हौ २ । हुवो २३४ । वा । का ५ इनो ६ हाइ ॥१४॥

तद्वोगायसुतेसचा ६ ए । पुरुहूतायसत्वने । पुरुहूता । यासत्वा २३ ना ३४ इ । शंयत् । गौवाओ २३४ वा । ना २३ शा ३ । का ३४५ इनो ६ हाइ ॥१५॥

तद्वोगायसुतेसचा ६ ए । पुरुहूतायसत्वनाइ । शंयद्रा २३ वै । ऐ २ हो १ आ ३३ इही । नशा २३ । का २ इना २३३४ औहोवा । ई २३४५ ॥१६॥

**सरलार्थः-** हे मनुष्या! (ऋत्विजः) यूयम् वीर्यवान् सत्य स्वरूपः सदा विद्यमानः इन्द्रियगणादिपूजितं पृथ्वी-सूर्य- वेदवाणी तुल्यं शक्तिमान् कल्याणकारीणं तं इन्द्रं भजत्त । इन्द्राय स्तुतिं संभूय गायत ।

**साममंत्रः-** **मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आ जातमग्निम् ।**

**कविं सम्राजमतिथिं जनानामासन्नः पात्रं जनयन्त देवाः ।। पू. प्रथम अ. खण्ड ७ मंत्र ६७**

**सामगानम्** हाउ । ३ । ओज्येदोहम् । ३ । मूर्धानदाइ । वा ३ अर । तिपृथिव्याः । वैश्वानराम् । ऋतआ । जातमग्निम् । कविड्सम्रा । जा ३ मति । थिजनानाम् । आसन्नः पा । त्रो३ञ्जन । यतदेवाः । हाउ । ३ । ओज्दोहम् । २ । ओज्यदोहाउ । वा । ए । ओज्यदोहम् । २ । ए । ओज्यदोहो २३४५ म् ॥१७॥

हाउ । ३ । हुम् चिदोहम् । चिदोहम् ॥ २ । मूर्धानदाह । वा३ अर । तिपृथिव्याः । वैश्वानराम् ऋतआ । जातमग्निम् । कविड्सम्रा । जा ३ मति । थिजनानाम् । आसन्नः पा । त्रो३ञ्जन । यतदेवाः हाउ । ३ । हुम् चिदोहम् । चिदोहम् । चिदो३हाउ । वा ३ । ई २३४५ ॥१८॥

हाउ । ३ । च्योहम् । ३ । मूर्धानदाड् । वा ३ अर । तिपृथिव्याः । वैश्वानराम् । ऋतआ । जातमग्निम्

कविड्सम्रा । जा३मति थिजनानाम् । आसन्नः पा । त्रा३ज्जन । यंतदेवाः । हाउ । ३ । च्योहम् ।
२ च्यो ३ हाउ । वा । ए ३ । ऋतम् ॥१९॥

**सरलार्थः-** विद्वांसः स्तोतारः मुख्यरूपेण ब्रुवन्ति ज्ञानवान् तेजोमयः अग्निः एवं परमेश्वरः सा अग्निः भूलोकः शिरसमानः अधिष्ठाता च सः एव पृथिव्याः स्वामिः स एव सत्यः यज्ञः जगती प्रादूर्भूतः सः एव सर्वेषु व्यापकः वैश्वानरः सः एव ज्योतिर्युक्तः सम्राट् एवं मानवेषु अतिथि-तुल्यः एव अस्माकं पालकः पोषकश्च इति।

## साममंत्रः = स्तोभमंत्रपाठः

अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वः प । ताइ । धनपता२इ । ना रमोः
मन्युनावृत्रहासूर्येणस्वराड्यज्ञे नमधवादक्षिणास्य-प्रियातनूराज्ञाविशदाधार । वृषभस्त्वष्टा वृत्रेणशची-पतिरन्नेनगयः
पृथिव्यासृणिकोग्निनाविश्वंभूतम् । भद्भवो वायुनाविश्वाः प्रजाअभ्यपवथावषट्कारे णार्द्ध-भाकसोमेनसोमपाः
समित्यापरमेष्ठा । येदेवादेवाः । दिविषदः । स्थते भ्योवोदेवा देवे भ्यो नमः । ये देवादेवाः । अन्तरिक्षसदः।
स्थते भ्योवोदेवादेवे भ्यो नमः । ये देवादेवाः । पृथिवीषदः । स्थते भ्योवोदेवादे वेभ्योनमः । येदेवादेवाः।
अप्सुषदः । स्थते भ्योवोदेवादेवेभ्योनमः येदेवादेवाः । दिक्षुसदः । स्थते भ्योवोदेवादेवभ्यो नमः येदेवादेवाः।
आशासदः । स्थते भ्योवोदेवादेवेभ्योनमः । अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइहअस्मभ्यम् । इडा
२३ भा । यइदं विश्वंभूतम् । युयो ३ । आउ । वा २३ । ना २३४ माः ॥२०॥

आरण्यकगानेव्रतपर्व मंत्र सं. २१२

**सरलार्थः-** हे अधिपते ! हे मित्रपते ! हे स्वःपते ! हे धनपते ! परमात्मन् वयं सर्वे नमस्कारं कुर्मः । तव क्रोधेन अवरकशत्रुहन्ता असि । सूर्यरूपेणस्वराडसि । यज्ञरूपेण परोपकारी राज्ञः अस्ति । दक्षिणारुपेण सर्वाः प्रजाः दधातु । देदीप्यमानः तव अन्नेन जलेन वायुना विश्वस्य प्रजानां सर्वेषां रक्षयतु । ये, परमे दिवि, अन्तरिक्षे पृथिव्याम् अप्सु, दिक्षु, आशासु सर्वत्रः स्थिरमानः स्थिताः देवान् सर्वान् तेभ्यः अपि नमस्कारं कुर्मः । मरुस्थले रक्षकः इव क्रोधं अयनयन्तः एते देवाः अस्मान् रक्षन्तु । यत् इदं सर्वं जगत् एते देवाः एव रक्षन्तु । अतः तेभ्यः सर्वेभ्यः नमः अस्तु । इति भावः ।

## स्तोभमंत्रपाठः

**मन्त्रः-** अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वः प । ताइ । धनपता २इ । ना २ माः ।
नमउत्ततिभ्यश्चोत्तन्वाने भ्यश्च-नमो निषंगिभ्यश्चपवीतिभ्यशचनमोस्यदूभ्यश्चप्र । तदधाने भ्यश्चनमः
प्रविध्यभ्यश्चप्रव्याधिभ्यश्चनमः त्सरद्भ्यश्चत्सारिभ्यश्चनमश्रि ते भ्यश्चश्रायिभ्यश्चनमस्तिष्ठद्भ्यश्चो पतिष्ठद्भ्यश्चमनो
यतेचवियतेचनमः पथेचविपथायच । अवज्यामिवधन्वनोवितेमन्युन्नयामसिमृडतान्नइह । अस्मभ्यम् । इडा
२३ भा । यइदं विश्वंभूतम् । युयो ३ । आउ । वा २३ । ना २३४ माः ॥२१॥

**सरलार्थः-** हे अधिपते ! हे मित्रपते ! हे क्षत्रपते ! हे स्वपते ! हे धनयते ! परमात्मन् तेवां सर्वेः नमस्कारः कुर्मः । उत्पन्नकर्त्रे, स्वव्यापकाय, सर्वरक्षणकाय, परोपकाररूप, व्रतधारिणे, उत्पत्तिस्थिति-प्रलयकर्त्रे, छेदनकपट-रक्षण, आश्रयदात्रे कुमार्गाय, प्रेरकाय तुभ्यं नमः अस्तु । हे प्रभो त्वं स्तुति-प्रार्थना-कर्तृणां सर्वेषां रक्षां कुरु तान् सर्वान् सन्मार्गं प्रति नयतु इति भावः ।

**स्तोभमंत्रपाठः**

**मन्त्र-** अधिप । ताइ । मित्रप । ताइ । क्षत्रप । ताइ । स्वः प । ताइ । धनपता२इ । ना२माः । नमोन्नायनमो न्नपतयएकाऽक्षायचापतन्ना-दायपनमोनमः । रूद्रायती रसेदनमः स्थिरायस्थिरधन्वानेनमः प्रति-पदायचपटरिणेचनमस्त्रियंवकायचक । पद्दिनेचनमआश्राये भ्यश्चप्रत्याभाश्राये भ्यश्चनमः क्रव्येभ्यश्चविरिंके भ्यश्चनमः सवृते चविवृतेच । अवज्यामिवधन्वन्तनोविते मन्युन्नयामसि मृडतान्नइह अस्मभ्यम् । इडा २३ भा । यइदं विश्वं भूतम् । युयो ३ आउ । वा २३ । ना २३४ माः ॥२२॥

**सरलार्थः-** हे अधिपते ! हे क्षत्रपते ! हे स्वःपते ! हे धनपते ! परमात्मन् ते वयं नमस्कारं कुर्मः अन्नस्वरूपाय, जीवनदात्रे, दुष्टानां कृते उग्ररूपाय दुरितसंहारकाय, न्यायः न्यायोचितदण्डप्रदायकाय सर्वज्ञाय त्रिकालज्ञानदर्शिने ज्ञानतन्तुयुक्ताय आश्रयदात्रे, प्रत्याश्रयदात्रे, यज्ञरक्षणाय, आनन्दिताय तुभ्यं परमात्मन् वयं सर्वे नमस्कुर्मः इति भावः ।

**साममंत्रः- वसन्त इन्नु रन्त्यो ग्रीष्म इन्नु रन्त्यः । वर्षाण्यनु शरदो हेमन्तः शिशिर इन्नु रन्त्यः ॥ मंत्र-२१५**

**सामगानम्ः-** वा५सन्तः । ई ३ न्नू २ रन्तायाः । ग्रीष्मइन्नुरा१न्ती ३ याः । वर्षाण्यनुशा ३ हुम् । रा ३ दाः । हेमन्तः शिशिर-इन्नुरा टन्तीयाउ । वा ३४६ ॥२३॥

**सरलार्थः-** हे परमेश्वर चैत्र - वैशाख वसन्तः एव रमणीयः एवं ग्रीष्मोपि आनन्ददायकः लाभदायकश्च वर्षाकालान्तर-शरदः हेमन्तः शिशिरः जीवनानन्दः दिनानि, लाभकारकानिस्सन्ति अत्र ऋतूनां वर्णनमस्ति अन्ततोगत्वा ईश्वरः अस्मभ्यम् ऋतु माध्यमेन स्वास्थ्यमारोग्यं दीर्धमायुः सुखादि च प्रयच्छति ।

**साममंत्रः- कया नश्चित्र आ भुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥ पू. द्वि. अ. प्र. १ खण्ड ४ मंत्र ६८२**

**सामगानम्ः-** का ५ या । नश्चा ३ इत्रा ३ आभूवात् । ऊ । ती । सदावृधः स । खा । औ ३ होहाइ । कया २३ शचाइ । ष्ठयौहो ३ । हुम्मा २। वा २ त्तों ३४ हाइ ॥२४॥

**सरलार्थः-** सत्यबलेन वर्धमानः इन्द्रः प्रभूतज्ञानकर्तुं: योग्यः पूर्व सामर्थ्य ज्ञानेन पूर्व सामर्थ्य ज्ञानाभ्याम् अति शक्तिसम्पन्नः बलयुक्तः बुद्धियुक्तश्च कर्म उत्तरं प्रज्ञावर्धनाय ।

**साममंत्रः- कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृढा चिदारूजे वसु ।। उ. प्र. अ. ४ खंड मंत्रः ६८३**

**सामगानम्ः-** का ५ स्नत्वा । सत्यो ३मा ३ दानाम् । मा । हिष्ठोमात्सादन्धे । सा । औ २३ होहाइ । दृढा २३ चिदा । रूजौहो ३ । हुम्मा २ । वा २ सो ३४ होइ ॥२५॥

**सरलार्थः-** पूजनीयः सत्यः स्वरूपः हर्षआनन्दयोः मध्ये कः प्रकाशमयः कः अन्धकारमयः तथा कः जीवनधरता कः अन्धकार नाशयिता परमेश्वरोऽस्ति यः दृढवासः योग्यः दुर्गादि बन्धनानां त्यक्त्वा त्त्वं मोदयति उत्साहयति आनन्दः कारयति परमरसः इतिभावः ।

**साममंत्रः-** **अभीषुणः सखीनामविता जरितृणाम् । शतं भवास्यूतये** ॥ उ. प्र. ४ खंड ६८४

**सामगानम्ः-** औ ५ भीं । षुणा ३ः सो ३ तानोम् । आं । विताजराइतृं । णाम् । औ २३ होहाइ । शता २३ म्भवा । सियौहो ३ । हुम्मा २ । ता २ यो ३४ हाइ ॥२६॥

**सरलार्थः-** हे मधवन् इन्द्रः ! त्वम् अस्मभ्यं तथा अस्माकं मित्राणि तथा उपासकेभ्यः शतवर्षाणि यावत् अस्माकं रक्षणं कुरु अर्थात् रक्षको भव ।

**साममंत्रः-** **स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥२७॥**

उ. एकविंशति अ. मंत्र १८७५

**सरलार्थः-** शतक्रतुः महान् यशस्वी एवम् ज्ञानवान् इन्द्रः परमेश्वरः अस्माकं कल्याणं दधातु । सर्वज्ञः पुष्टिकारकः पूषन् अस्माकं कल्याणं करोतु । सः स्वयं कालरूपः महान् शासकश्च नैकोऽपि समर्थः तेषां नियमानां उलङ्घनम् कर्तुं। वेदवाण्याः रक्षकः वाक्स्वामीः पालकः प्रभुबृहस्पतिः अस्माकं सर्वेषां कल्याणं करोतु इति भावः ।

## शब्दार्थः

**भूमिम्** - धरां, **सहस्राक्षः** - सहस्रम् अक्षीणि यस्य सः, **विक्रमते** - व्याप्तः, **गात्राणि** - अङ्गानि, **इदम्** - एषः, **विष्णुः** - व्यापकः, **सहस्रः** - असंख्य इति अर्थः, **ऊर्ध्वः** - उपरि, **भूतं** - भूतकालः, **अजायत** - उत्पन्नः अभवत्, **होतारम्** - यज्ञकर्तारम्, **अरयः**- शत्रवः, **वैश्वानरः** - अग्निः, **वसु** - धनम्, **अमृतम्** - मरणरहितम्, **स्वस्ति** - कल्याणम्, **पुरुषः** - परमात्मा, **ईशानः** - रुद्रः देवः, **विराट्** - महान स्वरूपधारी, **दधातु** - ददातु, **शुचि** - पवित्रम्, **मति** - बुद्धिः, **मघवा** - इन्द्रः, **तार्क्ष्यः** - इन्द्रः, **यत् अन्नेन** - भोज्यान्नेन, **त्रिकालम्** - भूत- भविष्य-वर्तमान, **इदं सर्वम्** - इदं निखिलं जगत् ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) द्वितीये मन्त्रे कस्य देवस्य स्तुतिः विद्यते ?

(क) इन्द्रस्य (ख) विष्णोः (ग) अग्नेः (घ) रुद्रस्य

(२) पुरुषस्य कति पादाः उपरि भागे सन्ति ?

(क) त्रिपादाः (ख) चतुर्पादाः (ग) द्विपादाः (घ) पञ्चपादाः

(३) सहस्राक्षः कः ?

(क) इन्द्रः (ख) पुरुषः (ग) अग्निः (घ) रुद्रः

(४) ''कयानश्चित्र आबभूव'' अस्मिन् मन्त्रे वर्धमानः देवः कः ?

(क) अग्निः (ख) इन्द्रः (ग) रुद्रः (घ) पुरुषः

(५) रमणीयः ऋतुः कः ?

(क) ग्रीष्मः (ख) हेमन्तः (ग) वसन्तः (घ) शरदः

(६) मघवन् शब्दस्य कोऽर्थः ?

(क) अग्निः (ख) इन्द्रः (ग) सखा (घ) विष्णुः

(७) ''तद्वोगाय''-अस्मिन्मन्त्रे कस्य देवस्य स्तुतिः वर्तते ?

(क) अग्नेः (ख) रुद्रस्य (ग) इन्द्रस्य (घ) विष्णोः

(८) सामवेदस्य कति काण्डानि सन्ति ?

(क) ३ (ख) ४ (ग) ५ (घ) ६

(९) पञ्चममन्त्रे कस्य देवस्य स्तुतिः वर्तते ?

(क) पुरुषस्य (ख) इन्द्रस्य (ग) विष्णोः (घ) रुद्रस्य

(१०) तार्क्ष्यः शब्दस्य कोऽर्थः ?

(क) विष्णुः (ख) इन्द्रः (ग) पुरुषः (घ) रुद्रः

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) गतियुक्तः कः ?

(२) जगति परमाणुरूपः कः ?

(३) उत्तमरित्या वेदज्ञानं कः उपदिशति ?

(४) सः पुरुषः पृथिव्याः कियत् दूरेऽस्ति ?

(५) त्रिकालम् अर्थात् ?

(६) प्राणिनां निवासाय पुरुषः किं रचितवान् ?

(७) देवतानां दूतरुपः कः ?

(८) वसन्तऋतौ कयोः मासयोः गणना भवति ?

(९) अस्माकं पालकः पोषकः कः ?

(१०) पुरुषस्य पादत्रयं कुत्र तिष्ठति ?

**३. निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) इदं विष्णुर्वि ...................................... ।

(२) सहस्रशीर्षा पुरुषः ............................................. ।

(३) ततो विराडजायत ................................... ।

**४. निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) साममंत्रः पुरुष एवेद सर्वं यदू भूत यच्चं भाव्यम् ।
पादोऽस्य सर्वा भूतानि त्रिपादस्यामृत दिवि ॥

(२) साममंत्रः तद्वो गाय सुते सचा पुरुहूताय सत्वने ।
शं यद्गवे न शाकिने ॥

(३) साममंत्रः स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) गात्राणि | (६) सखा |
| (२) विष्णुः | (७) पृथिव्याम् |
| (३) प्रक्षस्य | (८) ग्रीष्मः |
| (४) देवानां | (९) देवाः |
| (५) पुरुषः | (१०) पूषा |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

| | |
|---|---|
| (१) श्रृतास | (६) गायत |
| (२) विवक्तिः | (७) प्रयच्छति |
| (३) प्राप्नोति | (८) कुर्वन्तु |
| (४) भवतु | (९) करोति |
| (५) विद्यते | (१०) दधातु |

**७. सन्धिविच्छेदनं कुरुत ।**

| | |
|---|---|
| (१) ब्रह्मणस्यते | (६) त्रिपादूर्ध्वः |
| (२) पाठेऽस्मिन् | (७) पादोऽस्य |
| (३) देवोऽयम् | (८) षदन्नेना |
| (४) विष्णुर्विचक्रमे | (९) कयानश्चित्र |
| (५) दशाङ्गुलम् | (१०) भवास्यूतये |

**८. सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) सहस्रः + अक्षः | (६) त्रिपात् + अस्य + अमृतम् |
| (२) सम् + उष्म् + अस्य | (७) यत् + अन्नेन |
| (३) चारुः + अग्नये | (८) पश्चात् + भूमिम् |
| (४) अभि + एति + रेभन् | (९) समं + राजम् + अतिथिम् |
| (५) परम् + आत्मा | (१०) भवासि + ऊतये |

**छात्र-प्रवृत्तिः**

- गुजरातराज्ये सामवेदीय पण्डितानां मेलनम् करणीयम् ।

**विशिष्टज्ञानम्**

- अग्ने नय सुपथा ।

•

| १३ | अथर्ववेदीय-रुद्राभिषेकीयमन्त्राः भागः-१ |
|---|---|

**प्रस्तावना**

वेदाः संस्कृत साहित्यस्य न अपि तु विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति । चत्वारो वेदाः यथा - ऋग्वेदः यजुर्वेदः सामवेदः अथर्ववेदः च । ऋग्वेदात् एव त्रयः वेदाः समुद्भूताः । अथर्ववेदे ज्ञानस्य प्राधान्यम् वर्तते । अथर्ववेदस्य विविधानि नामानि समुपलभ्यन्ते । किन्तु साम्प्रतकाले ''अथर्ववेद.'' इति नाम बहु प्रसिद्धमस्ति । आचार्य पतञ्जलिना उक्तम् च ''नवधा अथर्वणोवेदः'' इति । अथर्ववेदस्य प्राचीनकाले नव शाखा आसन्, किन्तु ताः शाखा लुप्ता इदानीं द्वे शाखे एव साम्प्रतकाले प्राप्यते । (१) शौनक शाखा (२) पैप्पलाद-शाखा अथर्ववेदीय शौनकशाखायां विंशतिः काण्डानि त्रिंशदधिकसप्तशतम् सूक्तानि षट्त्रिंशत् प्रपाठकाः सप्तसप्तति नवशतोत्तर-पञ्चसहस्रम् । (५९७७) मन्त्राः सन्ति। प्रस्तुतेऽस्मिन् पाठे अथर्ववेदीयरुद्राभिषेकीय-मन्त्राः पञ्चम-षष्ठकाण्डयोः केचन मन्त्राः संगृहीताः सन्ति ।

---

**मन्त्रः-** **पर्यू॒ षु प्र ध॑न्वा॒ वाज॑सातये॒ परि॑ वृ॒त्राणि॑ स॒क्षणि॑ः । द्वि॒षस्तदध्य॑र्ण॒वेने॑यसे सनिस्र॒सो नामा॑सि त्रयोद॒शो मास॒ इन्द्र॑स्य गृ॒हः ।** काण्ड-५ सू. ६ मं. ४

**पदपाठः-** परि॑ । ऊं॒ । इति॑ । सु प्र । ध॒न्व॒ । वाज॑ऽसातये । परि॑ । वृ॒त्राणि॑ । स॒क्षणि॑ः । द्वि॒षः । तत् । अधि॑ । अ॒र्ण॒वेन॑ । ई॒य॒से॒ । स॒नि॒स्र॒सः । नाम॑ । अ॒सि॒ । त्र॒यः॒ऽद॒शः । मास॑ः । इन्द्र॑स्य । गृ॒हः ।

**सरलार्थः-** हे परमेश्वर ! अन्नदान-हेतवे भवान् बाधकशत्रून् दूरीकरोतु । सर्वत्र त्यजतु । शत्रूणाम् उपरि त्वं समुद्रजलयुक्तेन प्रतियासि । अतः तस्मात् कारणात् सनिस्रस नाम असि सनिस्रस् अतिशयेन याति करोति इति कुशलः अतःत्रयोदश मासः वास्तविकरूपेण इन्द्रस्य आवास अस्ति ।

**मन्त्रः-** **न्वे॒३॒तेना॑रात्सीरसौ॒ स्वाहा॑ । ति॒ग्मायु॑धौ ति॒ग्महे॑ती सु॒शेवौ॒ सोमा॑रुद्रावि॒ह सु मृ॑डतं नः ।** काण्ड-५ सू. ६ मं. ५

**पदपाठः-** नु । ए॒तेन॑ । अ॒सौ॒ । अ॒रा॒त्सी॒ः । स्वाहा॑ । ति॒ग्म ऽआ॑युधौ । ति॒ग्महे॑ती॒ इति॑ ति॒ग्मडहे॑ती । सु॒ऽशेवौ॑। सोमा॑रुद्रौ । इ॒ह । सु । मृ॒ड॒त॒म् । न॒ः ।

**सरलार्थः-** हे परमेश्वर ! निश्चयेन अनया विधिना सफलता प्राप्तकृता । तेजोयुक्त-तीक्ष्ण-शस्त्र तीक्ष्ण-वज्रयुक्तौ तथा सेवा कर्तुं योग्यौ सोमरुद्रौ देवौ अस्मान् सर्वान् जनान् सुखी-कुरुताम् ।

**मन्त्रः-** **अवै॒तेना॑रात्सीरसौ॒ स्वाहा॑ । ति॒ग्मायु॑धौ ति॒ग्महे॑ती सु॒शेवौ॒ सोमा॑रुद्रावि॒ह सु मृ॑हतं नः ।** काण्ड-५ सू. ६ मं. ६

**पदपाठः-** ए॒तेन॑ । अ॒सौ॒ । अ॒व॒ । अ॒रा॒त्सी॒ः । स्वाहा॑ । ति॒ग्म ऽआ॑युधौ । ति॒ग्महे॑ती॒ इति॑ ति॒ग्मऽहे॑ती । सु॒ऽशेवौ॑। सोमा॑रुद्रौ । इ॒ह । सु । मृ॒ड॒त॒म् । न॒ः ।

**सरलार्थः-** हे परमेश्वर ! त्वया अतः सफलता प्राप्ता । अतः त्वया अधर्म आत्मानं सत्य कर्मणा निर्धनं कृतम् । हे तेजोयुक्त- तीक्ष्ण-शस्त्र तीक्ष्ण-वज्रयुक्तौ तथा सेवां कर्तुं योग्यौ सोमरुद्रौ देवौ अस्मान् सर्वान् जनान् सुखी-कुरुताम् ।

**मन्त्रः-** **अपै॒तेना॑रात्सीरसौ॒ स्वाहा॑ । ति॒ग्मायु॑धौ ति॒ग्महे॑ती सु॒शेवौ॒ सोमा॑रुद्रावि॒ह सु मृ॑डतं नः ।** काण्ड-५ सू. ६ मं. ७

**पदपाठः-** ए॒तेन॑ । अ॒सौ॒ । अ॒व॒ । अ॒रा॒त्सी॒ः । स्वाहा॑ । ति॒ग्म ऽआ॑युधौ । ति॒ग्महे॑ती॒ इति॑ ति॒ग्मऽहे॑ती । सु॒ऽशेवौ॑। सोमा॑रुद्रौ । इ॒ह । सु । मृ॒ड॒त॒म् । न॒ः ।

**सरलार्थः-** हे परमेश्वर ! त्वया स्वरीत्या दुष्ट आत्मानं सत्यकर्मणा दोषयुक्तं कृतम् । तेजोयुक्त तीक्ष्ण-शस्त्र तीक्ष्ण-वज्रयुक्तौ तथा सेवां कर्तुं योग्यौ सोमरुद्रौ देवौ अस्मान् सर्वान् जनान् सुखी-कुरुताम् ।

**मन्त्रः-** **मुमुक्तस्मान् दुरितादवद्याज्जुषेथां यज्ञममृतमस्मासु धत्तम् ।** काण्ड-५ सू. ६ मं. ८

**पदपाठः-** मुमुमक्तम् । अस्मान् । दुः ऽइतात् । अवद्यात् । जुषेथाम् । यज्ञम् । अमृतम् । अस्मासु । धत्तम्।

**सरलार्थः-** हे सोमरुद्रौ ! अस्माकं दुर्गुण-निन्दा-पापादि दुर्गुणान् दूरीकुरुतम् । अस्माकं कृते यज्ञ-सेवनं कुरुतम् । अस्मासु अमृतं धारयतम् ।

**मन्त्रः-** **चक्षुषो हेते मनसो हेते ब्रह्मणो हेते तपसश्च हेते । मेन्या मेनिरस्यमेनयस्ते सन्तु येऽस्मां अभ्यघायन्ति ।** काण्ड-५ सू. ६ मं. ९

**पदपाठः-** चक्षुषः । हेते । मनसः । हेते । ब्रह्मणः । हेते । तपसः । च । हेते । मेन्याः । मेनिः । असि। अमेनयः । ते । सन्तु । ये । अस्मान् । अभ्यघायन्ति । अभिऽ अघायन्ति ।

**सरलार्थः-** नेत्रात् आरभ्य तपस् पर्यन्तं सर्वाणि तत्त्वानि सर्वाधिक-प्रभावशालीनि विद्यन्ते । शस्त्रस्य भूमिकायाः निवार्हं करोति । ते अस्मान् उत्पीडितान् कुर्वन्ति । वज्रस्य ते अस्मान् सन्दर्भेण तेषां शस्त्राणि निष्फलानि जातानि शस्त्रस्य प्रभावेण निःशस्त्रं जातम् ।

**मन्त्रः-** **योऽस्मांश्चक्षुषा मनसा चित्त्याकूत्या च यो अघायुरभिदासात् । त्वं तानग्ने मेन्यामेनीन् कृणु स्वाहा ।** काण्ड-५ सू. ६ मं. १०

**पदपाठः-** यः । अस्मान् । चक्षुषा । मनसा । चित्त्या । आऽकूत्या । च । यः । अघऽयुः । अभिऽदासात्। त्वम् । तान् । अग्ने । मेन्या । अमेनीन् । कृणु । स्वाहा ।

**सरलार्थः-** हे अग्निस्वरुप परमात्मन् यः पापेच्छुः अस्मान् चक्षुषा, मनसा, चित्तेन, बुध्द्या, आकृत्या च ये दासरूपेण इच्छुकः अस्ति हे अग्निदेव ! त्वं तं शस्त्रेण शस्त्ररहितं कुरु । स्वाहा शब्दोच्चारणेन एषा हविः तुभ्यं समर्पयेत् ।

**मन्त्रः-** **इन्द्रस्य गृहोऽसि । तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेस्ति तेन ।।** काण्ड-५ सू. ६ मं. ११

**पदपाठः-** इन्द्रस्य । गृहः । असि । तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः । सर्वऽपुरुषः । सर्वडआत्मा । सर्वडतनूः । सह । यत् । मे । अस्ति । तेन ।

**सरलार्थः-** हे परमात्मन्, त्वं इन्द्रदेवस्य निवासोसि । अहं भवतः पार्श्वे आगच्छामि अहं सर्वत्र गमनसहितः अस्मि। सर्वेषां मनुष्याणां सहितः सर्वात्मा सर्वशरीर शक्तिः युक्तोऽस्मि । मम यत् किञ्चित् अस्ति तेन सह अहं त्वयि प्रवेशं करोमि ।

**मन्त्रः-** **इन्द्रस्य । शर्मासि । तं त्वा प्र पद्य ते त्वा प्र विशामि सर्वगुः सर्वपुरुषः सर्वात्मा सर्वतनूः सह यन्मेस्ति तेन ।।** काण्ड-५ सू. ६ मं. १२

**पदपाठः-** इन्द्रस्य । शर्म । असि । तम् । त्वा । प्र । पद्ये । तम् । त्वा । प्र । विशामि । सर्वऽगुः । सर्वऽपुरुषः । सर्वऽआत्मा । सर्वऽतनूः । सह । यत् । मे । अस्ति । तेन ।

**सरलार्थः-** हे परमात्मन् ! त्वं इन्द्रदेवस्य कल्याण-स्वरुपोस्ति । अहं भवतः पार्श्वे आगच्छामि अहं सर्वत्र गमनसहितः अस्मि । सर्वेषां मनुष्याणां सहितः सर्वात्मा सर्वशरीरशक्ति युक्तोऽस्मि । मम यत् किञ्चित् अस्ति तेन सह अहं त्वयि प्रवेशं करोमि ।

**मन्त्रः-** **इन्द्रस्य वर्मासि । तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह यन्मेस्ति तेन ।।** काण्ड-५ सू. ६ मं. १३

**पदपाठः-** इन्द्र॑स्य । वर्म॑ । अ॒सि॒ । तम् । त्वा॒ । प्र । प॒द्ये॑ । तम् । त्वा॒ । प्र । वि॒शा॒मि॒ । सर्व॑ऽगू । सर्व॑ऽपुरुषः । सर्व॑ऽआत्मा । सर्व॑ऽतनूः । स॒ह । यत् । मे॒ । अस्ति॑ । तेन॑ ।

**सरलार्थः-** हे परमात्मन् ? त्वं इन्द्रदेवस्य कवचोस्ति । अहं भवतः पार्श्वे आगच्छामि । अहं सर्वत्र गमनसहितः अस्मि सर्वेषां मनुष्याणां सहितः सर्वात्मा सर्वशरीर-शक्ति युक्तोअस्मि । मम यत् किञ्चित् अस्ति तेन सह अहं त्वयि प्रवेशं करोमि ।

**मन्त्रः-** **इन्द्र॑स्य॒ वरू॑थमसि । तं त्वा॒ प्र प॑द्ये तं त्वा॒ प्र वि॑शामि॒ सर्व॑गु॒ः सर्व॑पूरुषः सर्वा॑त्मा॒ सर्व॑तनूः स॒ह यन्मेस्ति॒ तेन॑** ।। काण्ड-५ सू. ६ मं. १४

**पदपाठः-** इन्द्र॑स्य॒ । वरू॑थम्। अ॒सि॒ । तम् । त्वा॒ । प्र । प॒द्ये॒ । तम् । त्वान । प्र । वि॒शा॒मि॒ । सर्व॑ऽगुः। सर्व॑ऽपुरुषः । सर्व॑ऽआत्मा । सर्व॑ऽतनूः । स॒ह । यत् । मे॒ । अस्ति॑ तेन॑ ।

**सरलार्थः-** हे परमात्मन्, त्वं इन्द्रदेवस्य संरक्षकोऽस्ति । अहं भवतः पार्श्वे आगच्छामि अहं सर्वत्र गमनसहितः अस्मि । सर्वेषां मनुष्याणां रहितः सर्वात्मा सर्वशरीर शक्ति युक्तोऽस्मि । मम यत् किञ्चित् अस्ति तेन सह अहं त्वयि प्रवेशं करोमि ।

**मन्त्रः-** **ग्रीष्मो हे॑म॒न्तः शिशि॑रो व॒स॒न्तः श॒रद् व॒र्षाः स्वि॒ते नो॑ दधात । आ नो॒ गोषु॒ भज॒ता प्र॒ जा॑या॑ निवा॒त इ॒द् वः॑ शर॒णे स्या॑म** ।। काण्ड-सू. ५५ मं. २

**पदपाठः-** ग्री॒ष्मः । हे॒म॒न्तः । शिशि॑रः । व॒स॒न्तः । श॒रत् । व॒र्षाः । सु॒ऽइ॒ते । न॒ः । द॒धा॒त॒ । आ । न॒ः । गोषु॑ । भज॑त । आ । प्र॒ऽजाया॑म् । नि॒ऽवा॒ते । इत् । य॒ः । श॒र॒णे । स्या॒म॒ ।

**सरलार्थः-** हे ग्रीष्माद्याः षड् ऋतवः प्रसिद्धाः देवाः ! हे ऋतवः ! यूयं नः अस्मान् गोषु भजत, आभक्तान् भागयुक्तान् कुरुत। प्रजायां पुत्रपौत्रादिरुपायामपि आ भजत । वायूपलक्षि समस्तदुःखकारणरहिते एव वः युष्माकं संबन्धिनि शरणे गृहे भवेम स्याम ।

**मन्त्रः-** **इ॒दा॒व॒त्स॒राय॑ परिवत्स॒राय॑ संवत्स॒राय॑ कृ॒णुता बृ॒हन्न॑मः । तेषां॑ व॒यं सुमतौ॒ य॒ज्ञिया॑ना॒मपि भ॒द्रे सौमन॒से स्या॑म** ।। काण्ड-सू. ५५ मं. ३

**पदपाठः-** इ॒दा॒व॒त्स॒राय॑ । प॒रि॒ऽव॒त्स॒राय॑ । स॒म्ऽव॒त्स॒राय॑ । कृ॒णु॒त॒ । बृ॒हत् । नम॑ः । तेषा॑म् । व॒यम् । य॒ज्ञिया॑नाम्। अपि॑ । भ॒द्रा सौ॒म॒न॒से । स्या॒म॒ ।

**सरलार्थः-** इदावत्सरः परिवत्सरः एवं संवत्सरः एवं संवत्सरः एते क्रमशः आगच्छन्ति । एते प्रथमः द्वितीयः एवं तृतीयः त्रयः वर्षः बृहत् नमः अन्नउत्पन्नं कुर्वन्तु । तेषाम् इदावत्सरारीनां यज्ञियानाम् यज्ञार्हाणाम् देवतानां सुमति अर्थात् सद्भावनायाः कल्याणभावनायाः एवं सौमनस्यपूर्णं सुखं स्यात् ।

**मन्त्रः-** **अ॒नु॒डु॒द्भ्यस्त्वं प्र॑थ॒मं धे॒नुभ्य॒स्त्वम॑रुन्धति । अधे॑नवे वयसे॒ शर्म॑ यच्छ॒ चतु॑ष्पदे** ।। काण्ड-६ सू. ५९ मं. १

**पदपाठः-** अ॒नु॒डु॒त् ऽभ्य॑ः । त्वम् । प्र॒थ॒मम् । धे॒नु॒ऽभ्य॑ः । त्वं अ॒रु॒न्ध॒ति॒ । अधे॑नवे । वय॑सो । शर्म॑ । य॒च्छ॒। चतु॑ःऽपदे ।

**सरलार्थः-** हे अरुन्धति, सहदेवी संज्ञके औषधे, त्वं प्रथमं पूर्वम् अनुडुद्भ्यः अनसः शकटस्य वाहकेभ्यो बलीवर्देभ्यः शर्म सुखं प्रयच्छ । तथा धेनुभ्यः दोग्ध्रीभ्यो गोभ्यः शर्म यच्छ । अधेनवे धेनुव्यतिरिक्ताय वयसे पञ्चवर्षाद् अर्वाचीनाय गवाश्वादिजातीयाय चतुष्पदे चतुष्पान्मात्राय शर्म सुखं प्रयच्छ इति भावः ।

**मन्त्रः-** **शर्म॑ यच्छ॒त्वोष॑धिः स॒ह दे॒वीर॑रु॒न्ध॒ती । कर॒त् पय॑स्वन्तं गो॒ष्ठम॑य॒क्ष्मां उ॒त पूरु॑षान्** ।। काण्ड-६ सू. ५९ मं. २

**पदपाठः-** शर्मं । यच्छतु । ओषधिः । सह । देवीः । अरुन्धती । करत् । पयस्वन्तम् । गोऽस्थम् । अयक्ष्मान्। उत् । पुरुषान् ।

**सरलार्थः-** हे अरुन्धति, रोगनिवारिणी सहदेवी नाम्नी औषधीः शर्म सुखं प्रयच्छतु । अस्मदीयं गोष्ठम् गोनिवासदेशं पयस्वन्तम् प्रभूतपयसा युक्तं करोतु । अपि च पुरुषान् पुत्रभृत्यादीन् अस्मदीयान् सर्वान् अयक्ष्मान् अरोगान् करोतु ।

## शब्दार्थः

**अघायुः** – पापेच्छुः, **सहदेवी** – रोगनिवारीणी औषधी, **गोष्ठम्** – गोनिवासदेशम्, **द्विषः** – शत्रून्, **अर्णवेन** – समुद्रजलयुक्तेन, **गृहः** – आवास, **तिग्मायुधौ** – तेजोयुक्ते, **तिग्महेती** – तीक्ष्णशस्त्र वज्रयुक्तो, **मृडतम्** – सुखीकुरु **दुरितात्** – दुर्गुण, निन्दावा **यज्ञम्** – देवतानां पूजनम्, **अमृतम्** – पीयुषं क्षुधा, **धत्तम्** – धारयतम्, **मेन्याः** – वज्र, **चित्त्या** – मत्त्या, **अभिदासात्** – दासरुपेण, **अमेनीन्** – शस्त्रं विहाय, **हविः** – धान्यं यज्ञस्य द्रव्यम्, **आकूत्या**– सङ्कल्पः, **तनूः** – शरीरम्, **गोषु** – गवादिपशु, **प्रजायाम्** – मानवानां, **निवातः** – दुःखकारणरहिते स्थाने, **शरणं** – रक्षणम्, **बृहत्** – महान्, **अन्नं** – धान्यम्, **कृणुत** – करोतु, **सौमनसे** – सुमनसा भावेन, **अरुन्धति** – रोगनिवारीणी सहदेवी नाम्री औषधी, **शकटः** – वृषभवाहनम् **अधेनवे** – दुग्धरहितः **अयक्ष्मान्** – अरोगान् ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) कस्मात् वेदात् त्रयः वेदाः समुद्भूता ?

(क) ऋग्वेदः (ख) यजुर्वेदः (ग) सामवेदः (घ) अथर्ववेदः

(२) अथर्ववेदस्य प्राचीनकाले कति शाखा आसन् ?

(क) सप्त (ख) अष्ट (ग) नव (घ) दश

(३) साम्प्रतकाले अथर्ववेदस्य कति शाखा प्राप्यते ?

(क) एका (ख) द्वे (ग) तिस्रः (घ) चतस्रः

(४) इन्द्रस्य आवासः कति मासेषु भवति ?

(क) एकादश (ख) द्वादश (ग) त्रयोदश (घ) चतुर्दश

(५) अघायुः शब्दस्य कोऽर्थः ?

(क) पापेच्छुः (ख) पुण्यम् (ग) अमृतम् (घ) इच्छुकः

(६) त्वं कस्य निवासोऽस्ति ?

(क) इन्द्रः (ख) विष्णुः (ग) परमात्मा (घ) रुद्रः

(७) कति ऋतवः सन्ति ?

(क) पञ्च (ख) षट् (ग) सप्त (घ) अष्ट

(८) सहदेवी शब्दस्य कोऽर्थः ?

(क) औषधीः (ख) देवी (ग) धेनुः (घ) वयसि

(९) अथर्ववेदीय शौनकशाखायां कति काण्डानि सन्ति ?

(क) अष्टादश (ख) द्वाविंशतिः (ग) विंशतिः (घ) एकविंशतिः

(१०) आचार्य पतञ्जलिना कति शाखाः उक्ताः ?

(क) अष्ट (ख) दश (ग) सप्त (घ) नव

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) शत्रूणां उपरि केन जलेन प्रतियामि ?

(२) स्वाहा शब्दोच्चारणेन किं भवति ?

(३) कौ देवो अस्मान् सर्वान् सुखीकुरु ताम् ?

(४) सेवाकर्तुं योग्य यौ कौ देवौ स्तः ?

(५) के अस्मान् दुर्गुण-निन्दा-पापेभ्यः त्रायेताम् ?

(६) अस्मासु कं धारयतु ?

(७) सर्वेषु तत्त्वेषु अधिकं किं विद्यते ?

(८) पापेच्छुः अस्मान् किं कर्तुम् इच्छति ?

(९) केन आरोगान् करोतु ?

(१०) आचार्य पतञ्जलिना किमुक्तम् ?

३. **निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) पर्युषु प्रधन्वा वाजसातये ............................ इन्द्रस्य गृहः ।

(२) चक्षुषो हेते मनसो ......................... अभ्यघायन्ति ।

(३) इन्द्रस्य गृहोसि .................................. सह यन्मेस्ति तेन ।

४. **निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) अपै॒तेना॑रात्सीरसौ॒ स्वाहा॑ ।

ति॒ग्मायु॑धौ ति॒ग्महे॑ती सु॒शेवौ॒ सोमा॑रुद्राव॒िह सु मृ॑डतं नः ।

(२) मु॒मु॒क्तस्मान् दु॑रिता॒द॑वद्याज्जु॒षेथां॑ य॒ज्ञम॒मृत॑म॒स्मासु॑ धत्तम् ।

(३) ग्री॒ष्मो हे॑म॒न्तः शिशि॑रो वस॒न्तः श॒रद् वर्षाः स्वि॒ते नो॑ दधात ।

आ नो॒ गोषु॒ भज॒ताप्र॒जा॑यां निवा॒त इ॒द् वः॑ श॒रणे स्या॑म ।

५. **अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) वृत्राणि
(२) इन्द्रस्य
(३) एतेन
(४) अस्मान्
(५) मनसा
(६) अस्मासु
(७) त्वम्
(८) प्रजायाम्
(९) वयम्
(१०) पूरुषान्

६. **अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) भजत
(२) कृणुत
(३) यच्छतु
(४) असि
(५) अघायुः
(६) स्यामः
(७) असौ
(८) हेते
(९) सन्तु
(१०) कृणु

७. **सन्धिविच्छेदनं कुरुत ।**

(१) वृत्राणि
(२) तेनारात्सीरसौ
(३) मुमुत्कमस्मान्
(४) यज्ञममृतम्
(५) तपसश्च
(६) नामासि
(७) दुरितादवद्या
(८) हेमन्तः
(९) बृहन्नमः
(१०) धेनुभ्स्त्वम्

८. **सन्धिसंयोजनं कुरुत ।**

(१) अनडुत् + भ्यः + त्वम्
(२) इन्द्रः + अस्य
(३) अघायुः + अभिदासात्
(४) यज्ञियानाम् + अपि
(५) यच्छतु + ओषधिः
(६) द्विषः + तद् + अर्ण + वेनयेसे
(७) गृहः + असि
(८) तः + अग्रे
(९) चतुःडपदे
(१०) देवीः + अरुन्धती

**छात्र-प्रवृत्तिः**

- गुजरातराज्ये प्रसिद्ध-अथर्ववेदीय-वैदीक-पण्डितानां-मेलनं करणीयम् । तथा परिचयः प्राप्तव्यः ।

**विशिष्टज्ञानम्**

- मागृधः कस्यस्विद् धनम् ।

# १४ अथर्ववेदीय रुद्राभिषेकीयमन्त्राः भागः-२

**प्रस्तावना**

**यस्य निःश्वसितं वेदाः यो वेदेभ्योऽखिलं जगत् ।**

**निर्ममे तमहं वन्दे विद्यातीर्थं महेश्वरम् ॥**

इति सायणवचनानुसारं परमात्मनः निश्वासः भूतोऽयं वेदः विश्वब्रह्माण्डस्य ज्ञानदीपकः वर्तते । ''वेदात् सर्वं प्रसिध्यति'' इति मनुऋषि वचनानुसारं यत् किमपि विश्वस्मिन् वर्तते तत् सर्वमेव वेदमूलकम् एवास्ति । विश्वस्य सृष्टिः स्थितिः विनाशः वेदेन एव सञ्जायते । चतुर्षु वेदेषु अथर्ववेदस्य महत्त्वं सर्वोपरि विद्यते ।

अथर्ववेदः इति शब्दस्य नैकाः अर्थाः भवन्ति किन्तु अत्र ''थर्वः अर्थात् गतिः'' अतः अथर्वशब्दस्य अर्थः भवति नास्ति गतिः यस्मिन् सः अथर्वः ।

वेदेस्मिन् महत्त्वपूर्णसूक्तेषु भैषजम्, आयुष्यम्, पृथ्वी, दुन्दुभिः, प्रायश्चित्तम्, मेधाजननं, राष्ट्रं, उच्छिष्टं, ब्रह्म, इत्यादीनि सूक्तानि महत्त्वपूर्णानि उपलभ्यन्ते ।

प्रस्तुतोऽयं पाठः अथर्ववेदस्य षष्ठ-सप्तम-एकादश काण्डात् अथर्ववेदीयरुद्राभिषेकीये कृते केचन मन्त्राः अत्र प्रतिपादिताः सन्ति ।

---

**मन्त्र :** **वि॒श्वरू॑पां सु॒भगा॑म॒च्छाव॑दामि जी॒वलाम् ।**

**सा नो॑ रु॒द्रस्या॒स्तां हे॒तिं दू॒रं न॑यतु॒ गोभ्यः॑ ।। काण्ड-६ सू. ५९ मं. ३**

**पदपाठः-** वि॒श्वऽरू॑पाम् । सु॒ऽभगा॑म् । अ॒च्छ॒ऽआव॑दामि । जी॒व॒लाम् । सा । नः॒ । रु॒द्रस्य॑ । अ॒स्ताम् । हे॒तिम्। दू॒रम् । न॒य॒तु । गोभ्यथः ।

**सरलार्थः-** अनेक-रुपवती शोभनकर्त्री अलङ्कारवती सा सौभाग्यप्रदात्री जीवला नाम्नी जीवनदायिनी औषध्याः अस्माकं सर्वेषां कृते रोग-निवारणार्थं निवेदनं कुर्वन्ति । रुद्रस्य आयुधेन उत्पन्नं रोगं अस्मान् सर्वान् तथा धेन्वादिपशूनां दूरं त्यजन्तु ।

**मन्त्रः-** **मह्य॒मापो॒ मधु॑म॒देर॑यन्तां॒ मह्यं॒ सूरो॑ अभर॒ज्ज्योति॑षे॒ कम् ।**

**मह्यं॑ दे॒वा उ॒त विश्वे॑ तपो॒जा मह्यं॑ दे॒वः स॑वि॒ता व्यचो॑ धात् ।। काण्ड-६ सू. ६१ मं. १**

**पदपाठः-** मह्य॑म । आप॑ः । मधु॑ऽमत् । आ ई॒र॒य॒न्ता॒म् । मह्य॑म् । सूर॑ः । अ॒भ॒र॒त् । ज्योति॑षे । कम् मह्य॑म्। दे॒वाः । उ॒त । विश्वे॑ । त॒पः॒ऽअजाः । मह्य॑म् । दे॒वः । स॒वि॒ता । व्यच॑ः । धा॒त् ।

**सरलार्थः-** मम कृते जलराशिः स्वस्य माधुर्यं प्रदानं करोतु । मम सुखार्थं सूर्येण स्वस्य किरणानि प्रसार्यते । विश्वेदेवादियते। समस्त-तपस्वी ऋषिमनु सवितादेवादि सर्वेषाम् कृते उदारतायाः सामर्थ्यं धारणं करोतु ।

**मन्त्रः-** **अ॒हं वि॑वेच पृथि॒वीमु॒त द्यामहमृतूँर॑जनयं स॒प्त सा॒कम् ।**

**अ॒हं स॒त्यमनृ॑तं यद् वदा॑म्य॒हं दैवीं॑ परि वाचं विशश्च ।। काण्ड-६ सू. ६१ मं. २**

**पदपाठः-** अ॒हम् । वि॒वे॒च । पृ॒थि॒वीम् । उ॒त । द्याम् । अ॒हम् । ऋ॒तून् । अ॒ज॒न॒य॒म् । स॒प्त । सा॒कम् । अ॒हम्। स॒त्यम् । अनृ॑तम् । यत् । वदा॑मि । अ॒हम् । दैवी॑म् । परि॑ । वाच॑म् । विश॑ः । च॒ ।

**सरलार्थः-** अहं परमेश्वरः भूमिं तथा द्युलोकं भिन्नं कृतवान् । अहं सप्त ऋतून् क्रमानुसारेण निर्मितवान् । सांसारिक

युगे यत् सत्यं वा असत्यम् विद्यमानमस्ति । तत् सर्वं अहमेव वक्ष्यामि । अहं दैवीं वाणीं सर्वान् मनुष्यान् परिवक्ष्यामि ।

**मन्त्रः-** **अहं जंजान पृथिवीमुत द्यामहमृतूंरंजनयं सप्त सिन्धून् ।**

**अहं सत्यमनृतं यद् वदामि यो अग्नीषोमावजुषे सखाया ।। काण्ड-६ सू. ६१ मं. ३**

**पदपाठः-** अहम् । जजान । पृथिवी । उत । द्याम् । अहम् । ऋतून् । अजनयम् । सप्त । सिन्धून् । अहम्। सत्यम् । अनृतम् । यत् । वदामि । यः । अग्नीषोमौ । अजुंष । सखाया ।

**सरलार्थः-** अहं परमेश्वरः धरां तथा द्युलोकम् उत्पन्नं कृतवान् । अहं षड् ऋतवः तथा सप्त सागरान् सप्तऋषीन् तथा नद्यादि सर्वम् अहम् एव उत्पन्नं कृतवान् । अहं यत् सत्यं वा असत्यम् अस्ति तत् सर्वम् अहमेव वक्ष्यामि । अहं अग्निसोमयोः च मैत्रीभावेन द्वयोः मेलनं करोमि ।

**मन्त्रः-** **वैश्वानरो रश्मिभिर्नः पुनातु वातः प्राणेनेषिरो नमोभिः ।**

**द्यावापृथिवी पयसा पयस्वती ऋतावरी यज्ञिये नःपुनीताम् ।। काण्ड-६ सू. ६२ मं. १**

**पदपाठः-** वैश्वानारः । रश्मिऽभिः । नः । पुनातु । वातः । प्राणेन । इषिरः । नमःऽअभिः । द्यावापृथिवी इति। पयसा । पयस्वती इति । ऋतवरी इत्यृतऽवरी । यज्ञिये इति यज्ञिये। नः । पुनीताम् ।

**सरलार्थः-** समस्त-मानवानां मध्ये विद्यमानः परमेश्वरअग्निं मह्यं स्वस्य ज्वालाकिरणैः पवित्रं करोतु । अन्तरिक्षे संचरण गमनशीलवायुः स्वस्य प्राणशक्त्या जलराशिमेघैः निरन्तरं यज्ञानुष्ठानार्थं उपर्युक्त पृथिवी द्युलोकं च अस्मान् सर्वान् पवित्रताप्रदानं करोतु ।

**मन्त्रः-** **वैश्वानरीं सूनृतामा रभध्वं यस्या आशास्तन्वो वीतपृष्ठाः ।**

**तया गृणन्तः सधमादेषु वयं स्याम पतयो रयीणाम् ।। काण्ड-६ सू. ६२ मं. २**

**पदपाठः-** वैश्वानरीम् । सूनृताम् । आ रभध्वम् । यस्याः । आशाः । तन्वः । वीतऽपृष्ठाः । तया । गृणन्तः। सधऽमादेषु । वयम् । स्याम । पतयः । रयीणाम् ।

**सरलार्थः-** हे सुकवयः, परमात्मनः सत्याम् एवं माधुर्यसमन्वितं सा वाङ्मयी वाणीद्वारा स्तुतेः प्रारम्भं करोतु । येषां तनूः पृष्ठभागः रहितः दिशास्ति । तेषां स्तुतिं कृत्वा वयम् उत्सवानाम् अवसरेषु मिलित्वा आनन्दिताः भवामः । विविधप्रकारासम्प्रदायानां स्वामिः भवेम ।

**मन्त्रः-** **वैश्वानरीं वर्चस आ रभध्वं शुद्धा भवन्तः शुचयः पावकाः ।**

**इहेडया सधमादं मदन्तो ज्योक् पश्येम सूर्यमुच्चरन्तम् ।। काण्ड-६ सू. ६२ मं. ३**

**पदपाठः-** वैश्वानरीम् । वर्चसे । आ । रभध्वम् । शुध्दाः । भवन्तः । शुचयः । पावकाः । इह। इडया । सधडमादम्। मदन्तः । ज्योक् । पश्येम । सूर्यम् । उत् डचरन्तम् ।

**सरलार्थः-** हे सुकवयः, ब्रह्मवर्चस् प्राप्त्यर्थं भवन्तः सर्वे शुद्धपवित्राचाराः पालयन्तु । पवित्रं भूत्वा वैश्वानरः परमात्मनः स्तुतेः प्रारम्भं कुर्वन्तु । संसारेस्मिन् अन्नादि प्राप्त्यर्थम् एव अस्माकं वाण्याः सर्वे मिलित्वा आनन्दस्यानुभूतिं कृत्वा सुदीर्घ-कालम् उदयमानस्य सूर्यस्य दर्शनम् अवलोकयन्तु ।

**मन्त्रः-** **यां ते रुद्र इषुमास्यदङ्गेभ्यो हृदयाय च ।**

**इदं तामद्य त्वद् वयं विषूचीं वि वृहामसि । काण्ड-६ सू. ९० मं. १**

**पदपाठः-** याम् । ते । रुद्रः। इषुम् । आस्यत् । अङ्गेभ्यः । हृदयाय । च । इदम् । ताम् । अद्य । त्वत्। वयम् । विषूचीम् । वि । वृहोमसि ।

**सरलार्थः-** हे ऋत्विजः । रुद्रेण परमेश्वरेण तस्य आयुधेन तव हृदयम् तथा अन्यानि अङ्गानि पीडितानि लक्षितानि कृत्वा दुखानि-त्यक्तानि । सः रुद्रः अद्य तव शरीरात् निष्कास्य दुःखं बहु-दूरे प्रक्षेपितः ।

**मन्त्रः-** **यास्ते॑ श॒तं ध॒मन॒योऽङ्गा॒न्यानु॒ विष्ठि॑ताः ।**

**तासां॑ ते॒ सर्वा॑सां व॒यं निर्वि॒षाणि॑ ह्वयामसि ।। काण्ड-६ सू. ९० मं. २**

**पदपाठः-** याः । ते॒ । श॒तम् । ध॒मन॑यः । अङ्गा॑नि । अनु॑ । विऽस्थि॑ताः । तासा॑म् । ते॒ । सर्वा॑साम् । व॒यम्। निः । वि॒षाणि॑ । ह्व॒या॒म॒सि॒ ।

**सरलार्थः-** हे ऋत्विक्, तव शरीरे विभिन्नानि अङ्गानि धमनीयाः विशेषेण स्थिरमानाः सन्ति । तव सर्वासां धमनीनां दुःखानि हानिकारकनि तत्वानि निर्गच्छेयुः इति वयं परमेश्वरं आह्वायामः ।

**मन्त्रः-** **नम॑स्ते रु॒द्रास्य॑ते नम॒ः प्रति॑हितायै ।**

**नमो॑ विसृ॒ज्यमा॑नायै नमो॒ निप॑तितायै ।। काण्ड-६ सू. ९० मं. ३**

**पदपाठः-** नम॑ः । ते॒ । रु॒द्र॒ । अस्य॑ते । नम॑ः । प्रति॑ऽहितायै । नम॑ः । वि॒ऽसृज्यमा॑नायै । नम॑ः । निऽप॑तितायै।

**सरलार्थः-** हे रुद्रपरमेश्वर ! ते क्षिपतेइषुं नमः अस्तु । तुभ्यं नमः अस्तु । त्यक्त इषुं नमः अस्तु । एवं लक्ष्यः अधः पतितइषवे नमः अस्तु ।

**मन्त्रः-** **य॒मो मृ॒त्युर॑घमा॒रो नि॑ऋ॒थो ब॒भ्रुः श॒र्वोऽस्ता॒ नील॑शिखण्डः ।**

**दे॒वज॒नाः सेन॑योत्तस्थि॒वांसस्ते अ॒स्माकं॒ परि॑ वृञ्जन्तु वी॒रान् ।। काण्ड-६ सू. ९३ मं. १**

**पदपाठः-** य॒मः । मृ॒त्युः । अ॒घ॒ऽमा॒रः । नि॒ःऽऋ॒थः । ब॒भ्रुः । श॒र्वः । अंस्ता॑ । नील॑ऽशिखण्डः । दे॒व॒ऽज॒नाः। सेन॑या । उ॒त॒स्थि॒ऽवांसः । ते । अ॒स्माक॑म् । परि॑ । वृ॒ञ्ज॒न्तु॒ । वी॒रान् ।

**सरलार्थः-** हे परमेश्वर ? यमराजमृत्युः पापस्य रुपेण मारयति । उत्पीडकपोषकहिंसकअस्त्र-प्रयोक्ता अस्ति । हरीतः ध्वजा युक्ताः सर्वे देवगणाः तथा सेनया पराक्रमकर्तुं ते सर्वे वीरान् अस्माकं वीर-पुत्रान् जनान् विघ्नात् रक्षयन्तु ।

**मन्त्रः-** **मन॑सा॒ होमै॒र्हर॑सा घृ॒तेन॑ शर्वा॒यास्त्र॑ उ॒त राज्ञे॑ भ॒वाय॑ ।**

**न॒म॒स्ये॒ऽभ्यो॒ नम॑ एभ्यः कृण्णोम्य॒न्यत्रास्मद॒घवि॑षा॒ नय॑न्तु ।। काण्ड-६ सू. ९३ मं. २**

**पदपाठः-** मन॑सा । होमै॑ः । हर॑सा । घृ॒तेन॑ । श॒र्वाय॑ । अस्ते॑ । उ॒त । राज्ञे॑ । भ॒वाय॑ । न॒म॒स्ये॒ऽभ्यः । नम॑ः। ए॒भ्यः । कृ॒णो॒मि॒ । अ॒न्यत्र॑ । अ॒स्मत् । अ॒घ॒ऽवि॑षाः । न॒य॒न्तु॒ ।

**सरलार्थः-** हे रुद्र ! अहं मनसा, एवं शक्त्या, अस्त्र-चालनार्थं हिंसया एवम् उन्नति-दिशायाः अग्रेसरः राज्ञः कृते तथा अन्य-सर्वान् नमस्कारयोग्यान् विदुषः नमनं करोमि । ये सर्वे पापरुपिणः विषयुक्ताः परिपूर्णाः ते अस्माकं अन्य दूरस्थात् स्थानात् अन्यस्मिन् नयन्तु ।

**मन्त्रः-** **त्राय॑ध्वं नो अ॒घवि॑षाभ्यो व॒धाद् विश्वे॑-दे॒वा म॒रुतो॒ वि॒श्ववे॑दसः ।**

**अ॒ग्नीषो॒मा वरु॑णः पू॒तद॒क्षा वाता॑पर्ज॒न्ययो॑ः सुम॒तौ स्या॑म । काण्ड-६ सू. ९३ मं. ३**

**पदपाठः-** त्राय॑ध्वम् । न॒ः । अ॒घ॒ऽवि॑षाभ्यः । व॒धात् । विश्वे । दे॒वाः म॒रु॒तः । वि॒श्व॒ऽवे॒दसः । अ॒ग्नीषोमा॑ । वरु॑णः । पू॒तऽद॑क्षाः । वा॒ता॒प॒र्ज॒न्ययोः । सु॒ऽम॒तौ । स्या॒म॒ ।

**सरलार्थः-** हे सकलविद्वांसः ! हे विश्वस्यवेत्तारः ! हे दोषनाशकाः ! दिव्यगुणयुक्ताः पुरुषाः । प्रथमम्अस्मान् पापरुपिविषयुक्तानाम् पीडानां हननात् प्रायध्वम्अग्निश्च चन्द्रश्च वरणीयः । सूर्यश्च ये पवित्रबलाः सन्ति तेषाम् अपि च वायुमेधयोः श्रेष्ठायां बुद्धौ वयं भवेम ।

**मन्त्रः-** **यो अ॒ग्नौ रु॒द्रो यो अ॒प्स्व१॒न्तर्य ओष॑धीर्वी॒रुध॑ आविवेश॑ ।**

**य इ॒मा विश्वा॒ भुव॑नानि चाक्लृ॒पे तस्मै॑ रु॒द्राय॒ नमो॑ अस्त्व॒ग्रये॑ ।। काण्ड-७ सू. ८७ मं. १**

**पदपाठः-** यः । अ॒ग्नौ । रु॒द्रः । यः । अ॒प्ऽसु । अन्तः । यः । ओष॑धीः । वी॒रुधः॑ । आ॒ऽवि॒वेश॑ । यः। इ॒मा । विश्वा॑ । भुव॑नानि । चा॒क्लृ॒पे । तस्मै॑ । रु॒द्राय॑ । नम॑ः । अ॒स्तु॒ । अग्रये॑ ।

**सरलार्थः-** हे परमेश्वर । रुद्रः अग्निषु स्थिरमानः अस्ति । जलेषु विद्यमानः वर्तते । तथा औषधीः एवं वृक्षादिलतालतासु प्रविष्टवान् अस्ति । इमानि सर्वानि भुवनानि निर्मितानि । तस्मै रुद्राय नमः तथा तस्मै अग्नये नमः ।

**मन्त्रः-** **भवा॑शर्वौ मृ॒डतं॒ माभि या॒तं॑ भूत॑पति॒ पशु॑पति॒ नमो॑ वाम् ।**

**प्रति॑हिता॒माय॑तां॒ मा वि स्रा॒ष्टं॑ मा नो॑ हिं॑सिष्टं॑ द्वि॒पदो॒ मा चतु॑ष्पदः ।। काण्ड-११ सू. २ मं. १**

**पदपाठः-** भवा॑शर्वौ । मृ॒डत॑म् । मा । अ॒मि । या॒त॒म् । भूत॑पति॒ इति॒ भूत॑ऽपति । पशु॑पति॒ इति॒ पशु॑ऽपति । नम॑ः । वा॒म् । प्रति॑ऽहिताम् । आ॒ऽय॑ताम् । मा । वि । स्रा॒ष्ट॒म् । मा । नः । हिं॒सि॒ष्ट॒म् । द्वि॒ऽपद॑ः। मा । चतु॑ःऽपदः ।

**सरलार्थः-** हे भवाशर्वौ । भवन्तौ अस्मान् सुखयताम् । अस्माकं रक्षणार्थम् अभिमुखं भवेताम् । भवन्तौ भूतादि तथा गवादिपशून् पालकोऽस्तः । त्वामहं प्रणमामि । स्वधनुषा शस्त्रात् अस्मान् सर्वान् उपरि न क्षिपतु। अस्माकं हिंसा नैव कुर्वन्तु ।

**मन्त्रः-** **शुने॑ क्रो॒ष्टे मा शरी॑राणि॒ कर्त॑म॒लिक्ल॑वेभ्यो॒ गृध्रे॑भ्यो॒ ये च॑ कृ॒ष्णा अ॑वि॒ष्यव॑ः ।**

**मक्षि॑कास्ते पशुपते॒ वयां॑सि ते विघ॒से मा वि॑दन्त ।।काण्ड-११ सू. २ मं. २**

**पदपाठः-** शुने॑ । क्रो॒ष्ट्रे । मा शरी॑राणि । कर्त॑म् । अ॒लिक्ल॑वेभ्य॑ः । गृध्रे॑भ्यः । ये । च॒ । कृ॒ष्णाः । अ॒वि॒ष्यव॑ः। मक्षि॑काः । ते॒ । प॒शु॒ऽप॒ते॒ । वयां॑सि । ते॒ । वि॒ऽघ॒से । मा । वि॒द॒न्त॒ ।

**सरलार्थः-** हे पशुपतिनाथ । अस्माकं शरीराणि श्वानाय अन्य पश्वादीनां कृते भोजनाय क्रोष्टाय मां त्यजतु । अन्ये भवन्तः कृष्णः हिंसकः भक्षणाय अस्माकं शरीरं न त्यजतु । अर्थात् रुद्रस्य कृपया अस्माकं शरीरस्य कष्टं न भवेत्, तथा अन्य पशुप्राणिनां आहारः भोजनं वयं न भवेम ।

**मन्त्रः-** **क्रन्दा॑य ते प्रा॒णाय॒ पार्श्व॑ ते भव॒ रोप॑यः ।**

**नम॑स्ते रुद्र कृष्मः सहस्रा॒क्षाया॑मर्त्य ।। काण्ड-११ सू. २ मं. ३**

**पदपाठः-** क्रन्दा॑य । ते॒ । प्रा॒णाय॑ । याः । च॒ । ते॒ । भ॒व॒ । रोप॑यः । नम॑ः । ते॒ । रु॒द्र॒ः । कृ॒ण्म॒ः । स॒ह॒स्र॒ऽअ॒क्षाय॑। अ॒म॒र्त्य॒ ।

**सरलार्थः-** हे अमर्त्य देव ! हे ! अमररुद्रदेव हे भव ! भवतः शब्द-स्वरूपस्य प्राणाय वयं नुमः । हे सहस्राक्षः रुद्रः तं वयं नुमः । हे रुद्र ! भवान् अस्माकं दुःखं निवारयतुं समर्थः । अन्य-प्रयोगानि मङ्गलानि कार्याणि अस्माकं सर्वान् उपरि मङ्गलरुपेण कुर्वन्तु अतः त्वां वयं प्रणमामः ।

**मन्त्रः-** **पु॒रस्ता॑त् ते॒ नम॑ः कृण्मः उत्त॒राद॑ध॒राद॒त ।**

**अ॒भी॒व॒र्गाद् दि॒वस्पर्यन्तरि॑क्षाय॒ ते नम॑ः ।। काण्ड-११ सू. २ मं. ४**

**पदपाठः-** पु॒रस्ता॑त् । ते॒ । नम॑ः । कृ॒ण्म॒ः । उ॒त्त॒रात् । अ॒ध॒रात् । उ॒त । अ॒भि॒ऽव॒र्गात् । दि॒वः । परि॑ । अ॒न्तरि॑क्षाय। ते॒ । नम॑ः ।

**सरलार्थः-** हे रुद्र, वयं भवन्तं पुरतः ऊर्ध्वतः अधस्तः सर्वतः भवन्तं नम्स्कारं कुर्मः । द्युलोके एवं अन्तरिक्षे भवन्तं या स्थितिः विद्यमानः अस्ति तस्मै वयं नमस्कारं कुर्मः ।

**मन्त्रः-** **मुखा॑य ते पशुपते॒ यानि॒ चक्षूं॑षि ते भव ।**

**त्व॒चे रू॒पाय॑ सं॒दृशे॑ प्रती॒चीना॑य ते॒ नमः॑ ।। काण्ड-११ सू. २ मं. ५**

**पदपाठः-** मुखा॑य । ते॒ । प॒शु॒ऽप॒ते॒ । यानि॑ । चक्षूं॑षि । ते॒ । भ॒व॒ । त्व॒चे । रू॒पाय॑ । स॒मऽदृशे॑ । प्र॒ती॒चीना॑य। ते॒ । नमः॑ ।

**सरलार्थः-** हे पशुपतिनाथ, हे भव भवतां मुखाय नमः अस्तु । भवतां नेत्राभ्यां नमः अस्तु । भवतां त्वचा सुदर्शनः एवं पृष्ठभागादि सर्वेभ्यः अङ्गेभ्यः इन्द्रियेभ्यः नमस्कारं कुर्मः ।

**मन्त्रः-** **अङ्गे॑भ्यस्त उ॒दरा॑य जि॒ह्वाया॑ आ॒स्याय॑ ते ।**

**द॒द्भयो ग॒न्धाय॑ ते॒ नमः॑ ।। काण्ड-११ सू. २ मं. ६**

**पदपाठः-** अङ्गे॑भ्यः । ते॒ । उ॒दरा॑य । जि॒ह्वायै॑ । आ॒स्याऽय । ते॒ । द॒तऽभ्यः । ग॒न्धाय॑ । ते॒ । नमः॑ ।

**सरलार्थः-** हे रुद्र ? भवतः वयं नुमः । उदराय एवं जिह्वायै मुखाय तथा दन्ताय अपि नमस्कारं कुर्मः । तव शरीरात् बहिः आगच्छति सः गन्धाय नमस्कारः क्रियते ।

**मन्त्रः-** **अस्त्रा॒ नील॑शिखण्डेन सहस्त्राक्षेण॑ वा॒जिना॑ ।**

**रु॒द्रेणा॑र्धकघा॒तिना॒ तेन॒ मा सम॑रामहि ।। काण्ड-११ सू. २ मं. ७**

**पदपाठः-** अस्त्रा॑ । नील॑ऽशिखण्डेन । स॒हस्त्र॒ऽ अ॒क्षेण॑ । वा॒जिना॑ । रु॒द्रेण॑ । अ॒र्ध॒क॒ऽघा॒तिना॑ । तेन॑ । मां । सम् । अ॒रा॒म॒हि ।

**सरलार्थः-** हे नीलशिखण्डिन् ? नीलवर्णः केशयुक्तः अन्नयुक्तः अथवा शक्तिशाली सहस्त्राक्षः अस्माकं समाजस्य सर्वान् जनान् तथा पापिनां संहारकः रुद्रः देवास्य वयं कदापि विरोधं न कूर्मः ।

## शब्दार्थः

**जीवलाम्** – जीवनप्रदायिनी औषधी, **अच्छावदामि** – सुचारुरुपेण वदामि **गोभ्यः** – धेनुवादिपशूः **आपः** – जलम्, **मधु** – माधुर्ययुक्त, **सूरः** – सूर्यः, **व्यचः** – बृहत्, **धातु** – धारयति, **सविता** – आदित्य-देवः, **पृथिवीम्** – धरां भूमिं, **अजनयम्** – निर्मितवान्, **दिवः** – द्युलोक, **सत्यम्** – नृतम्, **असत्यम्** – अनृतम्, **वायसः** – काकः, **वदामि** – वक्ष्यामि, **सखा** – मित्रम्, **अमर्त्यः** – अमरदेव, **वैश्वानरः** – अग्नि, **रश्मिः** – किरणम्, **पुनातु** – पवित्रं, **यज्ञ** – अनुष्ठानम्, **सूनृताम्** – सत्यवेदवाणीम्, **आरभध्वम्** – प्रारम्भम्, **आशाः** – बृहत्, **तन्वः** – शरीर, **रयीणाम्** – बहुसम्पदाम् वर्चसे – ब्रह्मवर्चस् प्राप्तिः, **शूचयः**-पवित्र, **इषुम्** – आयुधम्, **अङ्गानि** – शरीरस्येन्द्रियाणि, **अर्धकघातिना** – पापिनां संहारकः ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्त्वा उत्तरं ददतु ।**

(१) वेदात् सर्वं प्रसिध्यति इति कः ऋषिः उक्तवान् ?

(क) अङ्गिरा (ख) भारद्वाजः (ग) मनुऋषिः (घ) गर्गऋषिः

(२) जीवलां शब्दस्य कोऽर्थः ?

(क) जीवनं (ख) औषधिः (ग) रुद्रः (घ) गावः

(३) मह्यं कृते जलराशिः स्वस्य किं प्रदानं करोतु ?

(क) माधुर्यं (ख) सुखः (ग) देवाः (घ) सविता

(४) पृथ्वी शब्दस्य कोऽर्थः ?

(क) ऋतू (ख) भूमिं (ग) द्युलोकः (घ) वाणीम्

(५) मह्यं जलराशिः किं प्रददाति ?

(क) रुचिकरम् (ख) कटुकरम् (ग) माधुर्यम् (घ) तिक्तम्

(६) पृथ्वींद्युलोकं च भिन्नं कः कृतवान् ?

(क) मनुष्यः (ख) देवेन्द्रः (ग) सूर्यः (घ) परमेश्वरः

(७) शुद्धपवित्राचाराः किमर्थं पालनीयाः ?

(क) विद्यार्थम् (ख) ब्रह्मवर्चस्प्राप्त्यर्थम् (ग) धनार्थम् (घ) विजयार्थम्

(८) वयं केषां भोजनं न भवेम् ?

(क) पशुप्राणिनाम् (ख) जलचराणाम् (ग) देवानाम् (घ) राक्षसानाम्

(९) अस्माकं दुःखं निवारयितुं कः समर्थः ?

(क) गणेशः (ख) रुद्रः (ग) सूर्यः (घ) इन्द्रः

(१०) रुद्रः केषां संहारकः ?

(क) सज्जनानाम् (ख) पुण्यशालिनाम् (ग) पापिनाम् (घ) देवानाम्

**२. निम्नाङ्कित प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) सायणाचार्येण किमुक्तम् ?

(२) अथर्वशब्दस्य अर्थः को भवति ?

(३) अथर्ववेदस्य महत्त्व पूर्णानि सूक्तानि कानि सन्ति ?

(४) कौ अस्मान् सुखयताम् ?

(५) सांसारिक-युगे अहं किं वक्ष्यामि ?

(६) समस्त-मानवानां मध्ये विद्यमानः परमेश्वरः किं करोति ?

(७) उत्सवानां अवसरेषु किं भवति ?

(८) रुद्रः परमेश्वरः आयुधेन किं त्यक्तवान् ?

(९) यमराजमृत्युः विघ्नात् सर्वदा किं करोति ?

(१०) इमानि सर्वाणि भुवनानि केन निर्मितानि ?

**३. निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) अहं विवेच पृथिवी ...................................... वाचं विशश्च ।

(२) नमस्ते रुद्रास्यते ............................................ निपतितायै ।

(३) अङ्गेभ्यस्त ............................................... गन्धाय ते नमः ।

**४. निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) विश्वरूपां सुभगामच्छावदामि जीवलाम् ।
सा नो रुद्रस्यास्तां हेति दूरं नयतु गोभ्यः ।

(२) विश्वरूपां सुभगामच्छावदामि जीवलाम् ।
सा नो रुद्रस्यास्तां हेति दूरं नयतु गोभ्यः ।

(३) मुखाय ते पशुपते यानि चक्षूंषि ते भव ।
त्वचे रूपाय संदृशे प्रतीचीनाय ते नमः ।

**५.** **अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) रुद्रस्य (६) हृदयाय
(२) मह्यम् (७) अस्माकम्
(३) सखाय (८) अग्रये
(४) अहम् (९) कृष्णाः
(५) पयसा (१०) अङ्गेभ्यः

**६.** **अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) नयतु (६) विदन्त
(२) जजान (७) कृण्मः
(३) वर्चसे (८) पश्येमः
(४) आह्वयामि (९) अविष्यवः
(५) कृणोमि (१०) अस्तु

**७.** **सन्धिविच्छेदनं कुरुत ।**

(१) सुभगामच्छावदामि (६) प्रतिहितामायताम्
(२) मह्यमापो (७) मक्षिकास्ते
(३) रश्मिभिर्नः (८) याश्चते
(४) सूर्यमुच्चरन्तम् (९) अङ्गेभ्यस्त
(५) तामद्य (१०) रुद्रेणार्धक

**८.** **सन्धिसंयोजनं कुरुत ।**

(१) रुद्रस्य + अस्ताम् (६) अस्तु + अग्रये
(२) सत्यम् + अनृतम् (७) उत्तरात् + अधरात्
(३) इह + इडया (८) दिवः + परि + अन्तरिक्षाय
(४) नमः + ते (९) दत् + भ्यः
(५) कृणोमि + अन्यत्र (१०) सम् + अमरामहि

**छात्र-प्रवृत्तिः**

- प्रसिद्धानाम् अथर्ववैदीकपण्डितानां मेलनं करणीयम् । तैः सह सस्वरं वेद-मन्त्राणां पठनं करणीयम्

**विशिष्टज्ञानम्**

- सूर्य्यऽआत्माजगतस्तस्थुषश्च ।

# १५ | चतुर्वेदीयाशीर्वादपुण्याहवाचनम् - भागः-१

**प्रस्तावना**

यस्मिन् दिने वेदविद्विप्राः यज्ञयागादिशुभकर्मणि निमन्त्रिताः भवन्ति, तस्मिन् दिने ते वेदविद्विप्राः पुण्याहवाचनप्रयोगे यजमानस्यायुरारोग्यवृद्ध्यर्थं चतुर्वेदीयाशीर्वादमन्त्रान् पठन्ति । एतेषां वेदविद्विप्राणां चतुर्वेदीयाशीर्वादमन्त्रोच्चारैः यजमानगृहे सुखसमृद्धिकल्याणस्थिरलक्ष्म्यादीनां वृद्धिर्भवति । इति उक्तं च ''प्रयोक्तुः कर्मणामादावन्ते चोदयसिद्धये'' अनेन वचनेन यजमानेभ्यः सम्पूर्णकर्मफलप्राप्तिर्भवतुं, एतदर्थं कर्मारंभे, कर्ममध्ये, कर्मान्ते च पुण्याहवाचनं भवति, तेषु पुण्याहवाचनेषु चतुर्वेदीयाशीर्वादमन्त्राणां वेदविद्विप्राः सानन्देन उच्चारणं कुर्वन्ति ।

---



**ऋग्वेदमन्त्रः-** **द्र॒वि॒णो॒दा द्रवि॑णसस्तु॒रस्य॑ द्रविणो॒दाः सन॑रस्य॒ प्रयं॑सत् ।**

**द्र॒वि॒णो॒दा वी॒रव॑ती॒मिषं॑ नो द्रविणो॒दारा॑सत्ते दी॒र्घमायुः॑ ॥ (ऋग्वेदः-१ मं. सू. ९६)**

**सरलार्थः-** धनदाताग्निदेवः अस्माकं कृते वृध्दियोग्यधनं यच्छतु । सोऽग्निदेवः अस्मभ्यं वीरतायुक्तधनं, पुत्रादिकम्, अन्नादिकम् आयुरारोग्यादिकं प्रयच्छतु ।

**यजुर्वेदमन्त्रः-** द्र॒वि॒णो॒दाः पिपी॑षति जु॒होत॒ प्र च॑ तिष्ठत । ने॒ष्ट्राद्ऋ॒तुभि॑रिष्यत ॥

**सरलार्थः-** हे अग्निदेव ! त्वं धनदाता अस्ति । अस्मभ्यं धनं प्रयच्छ । त्वं सोमरसपानम् इच्छसि । सर्वेभ्यः देवेभ्यः सोमरसदानं त्वम् इच्छसि । अतः वयं ऋत्विजः सोमरसस्याहुतिदानं कुर्मः । तत् सम्बन्धिकर्मणि वयं संलग्नाः भवामः । किं बहुना यथा काले देवैः सह धिष्ण्यानेष्टुभ्यां सह सोमरसपानं हे अग्निदेव ! त्वं कुरु ।

**सामवेदमन्त्रः**-देवो ३ वो ३ द्रविणोदाः । पूर्णां विवष्ट्वा सिचम् । उदू । १ सिंचा २ । ध्वमुपवापृणध्वं । औदिद्वोदे २ । वऔहते । ईडा २ ३ भा ३ ८ ३ । औ २ ३ ८ ५ ई । डा ।

**सरलार्थः**- धनदात्रीग्निदेवता युष्माकं कृते हविःपूर्णा भूत्वा स्रुवेणाऽसमन्तात् सोमपात्राणां सिञ्चनं कुर्यात् । होतॄणां चमसपात्राणि सोमरसेन पूर्णं कुर्यात् । अर्थात् अग्निनिमित्तीकृत्य सोमार्पणम् करोतु । तत्-पश्चात् अग्निदेवता त्वं इन्द्रं प्रति आहुतिंसंप्रेष्य मनोरथान् पूर्णान् करिष्यति ।

**अथर्ववेदमन्त्रः**- ॐ धाता रातिः सवितेदं जुषतां प्रजापतिर्निधिपतिर्नो अग्निः । त्वष्टा विष्णुः प्रजया स रराणो यजमानाय द्रविणं दधातु ॥

**सरलार्थः**- धातादेवता अर्यमादेवता सवितृदेवता इत्यादि-देवताः अस्य राष्ट्रस्य सेवां कुर्वन्तु । राष्ट्रेऽस्मिन् तिष्ठन्तु । निवसन्तु इन्द्रत्वष्टाविश्वकर्मादिदेवाः अस्माकं वचने आदरं स्थापयन्तु । वयम् सर्वे ज्ञातिबन्धुजनानां मध्ये सुखपूर्वकं निवासं कुर्मः । देवी अदितिः माम् आह्वाहयेत् । अदितेः पुत्राः शूरवीराः सन्ति । सा अदितिः मां रक्षतु ।

**ऋग्वेदमन्त्रः**- ॐ सविता पश्चात्तात् सविता पुरस्तात् सवितोत्तरात्ता-त् सविता धरात्तात् । सविता नः सुवतु सर्वतातिं सविता नो रासतां दीर्घमायुः ॥

**सरलार्थः**- सविता (सूर्यः) देवता अस्माकम् अग्रे तिष्ठतु । सविता देवता अस्माकं पृष्ठे तिष्ठतु । सविता सूर्यदेवता अस्माकं दक्षिणे, वामे च तिष्ठतु । उर्ध्वम् अधश्च तिष्ठतु । चतुर्दिक्षु सवितादेवता अष्माकं श्रीसम्पदायाः वृद्धिं करोतु । अस्मान् दीर्घमायुर्यच्छतु ।

**यजुर्वेदमन्त्रः**-सविता त्त्वा सवानाᳪं सुवतामग्निर्गृहपतीनाᳪं सोमो वनस्पतीनाम् । बृहस्पतिर्व्वाचऽइन्द्रो ज्यैष्ठयाय रुद्रः पशुभ्यो मित्र सत्यो व्वरुणो धर्म्मपतीनाम् ॥

**सरलार्थः**- हे यजमान, सवितादेवता तुभ्यम् अनुशासनस्य आधिपत्ये प्रेरितं करोतु, अर्थात् अनुशासनस्य अधिपतिं कारयतु। अग्निदेवता तुभ्यं गृहस्थस्य आधिपत्ये प्रेरितं करोतु । राजा सोमः तुभ्यं वनवृक्षादि - आधिपत्ये प्रेरितं करोतु । बृहस्पतिः तुभ्यं वाण्याः आधिपत्ये प्रेरितं करोतु । इन्द्रः तुभ्यं ज्येष्ठत्व आधिपत्ये प्रेरितं करोतु। मित्रावरुणौ तुभ्यं धर्माधिपत्ये प्रेरितं कुरुताम् । विविधपदार्थानामाधिपत्ये एते अष्टदेवाः तुभ्यं सिञ्चनं कुर्वन्तु ।

**सामवेदमन्त्रः**-ॐ ऊर्ध्व उषुणा ३ ऊता २३८ योई । तिष्ठा देवोन सविता । ऊर्ध्वो वा २३ जो । स्योसनिता । योदंजिभीः २ः । वाधोदिभ २ः । वीवी २ । हवेयामा २३ हो ३८३ ई । उं २३४५

**सरलार्थः**- हे यूपस्थिताग्निदेव ! अस्माकं रक्षाणिमित्तम् उन्नतो भूत्वा सुन्दररीत्या प्रतिष्ठितो भव । त्वं सूर्यसमानम् उन्नतपदे स्थिता अन्नदाताऽसि । यज्ञिययूपम् अञ्जितं कृत्वा ऋत्विग्भिः सह यज्ञसमाप्त्यर्थं हे अग्निदेव! तव वयम् आह्वाहनं कुर्मः । यूयम् अस्मभ्यम् अन्नदानं यच्छत ।

**अथर्ववेदमन्त्रः**- ॐ अभयं द्यावापृथिवी इहास्तु नोऽभयं सोमः सविता नः कृणोतु । अभयन्नोऽस्तूर्वा१ऽन्तरिक्षं सप्तऋषीणां च हविषाभयं नो अस्तु ॥

**सरलार्थः**- अस्मिन् संसारे स्थितेभ्यः जनेभ्यः इयं पृथ्वी द्यूलोकश्च अभयं ददातु (यच्छतु) । सोमसूर्यौ देवते अस्मान् अभयं कुरुताम् । विस्तृतान्तरिक्षं सप्तऋषयश्च हविर्दानेन अस्माकम् अभयं कुर्वन्तु ।

## शब्दार्थः

**वेदविद्विप्राः** - वेदपण्डिताः, ब्राह्मणाः, **यजमानस्य** - यज्ञकर्तुः, **द्रविणम्** - धनम्, **आयुः** - जीवनम्, **नः** - अस्माकम्, **जुहोत** - यजत, **नेष्ट्रा** - सोमयागऋत्विक्, **द्रतुभिः** - द्रुतगामीभिः, **विष्णुः** - नारायणः (भगवान् स्वयं), **प्रजापतिः** - ब्रह्मा, **सविता** - सूर्यः, **अग्रे** - पुरतः, **ऊर्ध्वम्** - उपरिभागे, **अधः** - नीचभागे, **व्वनस्पतीनाम्** - वनवृक्षादि औषधीनाम्, **ज्यैष्ठाय** - श्रेष्ठाय, (श्रेष्ठस्थानाय), **मित्रम्** - सखा, **पशुभ्यः** - प्राणिभ्यः, **बृहस्पतिः** - देवगुरुः, **रुद्रः** - शिवः, **धर्मपतीनाम्** - धर्मस्वामिनाम्, **गृहपतीनाम्** - गृहस्वामिनाम्, **मित्रावरुणौ** - मित्रवरुणनामानौ द्वौ देवौ, **आह्वयामः** - निमन्त्रयामः, **अभयं** - भयरहितम् ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) चतुर्वेदीयाशीर्वादपुण्याहवाचनप्रयोगः कुत्र भवति ?

(क) समरांगणे (ख) यज्ञे (ग) अग्नौ (घ) जले

(२) वेदविद्विप्राः कुत्र निमन्त्रिताः भवन्ति ?

(क) भोजनकर्मणि (ख) जयकर्मणि

(ग) यज्ञयागादि-शुभकर्मणि (घ) श्राद्धकर्मणि

(३) चतुर्वेदीयाशीर्वादमन्त्रान् वेदविप्राः किमर्थं वदन्ति ?

(क) वृष्टिवर्धनार्थम् (ख) धान्यवर्धनार्थम् (ग) औषधिवर्धनार्थम् (घ) आयुरारोग्यवर्धनार्थम्

(४) चतुर्वेदाशीर्वादमन्त्रोच्चारैः कस्य वृद्धिर्भवति?

(क) स्थिरसरस्वतीनाम् (ख) स्थिरलक्ष्म्यादीनाम्

(ग) स्थिरसमुद्रादीनाम् (घ) स्थिरनदीनाम्

(५) पुण्याहवाचनं कुत्र कुत्र भवति ?

(क) नान्दीश्राद्धे च (ख) कर्मारंभे मध्ये अन्ते च

(ग) पूर्णाहुतिसमये (घ) वसोर्धारासमये

(६) वेदमन्त्राणाम् उच्चारणं विप्राः कथं कुर्वन्ति ?

(क) सानन्देन (ख) दुःखितेन (ग) अश्रुपातेन (घ) रोदनेन

(७) अग्निः किं यच्छति ?

(क) औषधम् (ख) रत्नम् (ग) धनम् (घ) धान्यम्

(८) अग्निदेवः कस्य रसस्य पानं करोति ?

(क) इक्षुरसस्य (ख) सोमरसस्य (ग) आम्ररसस्य (घ) द्राक्षरसस्य

(९) होतृणां चमसपात्राणि केन पूरितानि भवन्ति ?

(क) मधुना (ख) दध्ना (ग) घृतेन (घ) सोमरसेन

(१०) अदितेः पुत्राः कीदृशाः सन्ति ?

(क) भयभीताः (ख) शूरवीराः (ग) कातराः (घ) कापुरुषाः

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) यज्ञयागादिशुभकर्मणि वेदविद्विप्राः किंः कुवन्ति ?

(२) किमर्थं क्रियते पुण्याहवाचनम् ?

(३) पुण्याहवाचनेन यजमानस्य गृहे कस्य वृद्धिर्भवति ?

(४) शुभकर्मणि कुत्र कुत्र पुण्याहवाचनम् भवति ?

(५) वेदविद्विप्राः नाम किं ?

(६) विप्रशब्दस्य कोऽर्थः ?

(७) अग्निः अस्मभ्यं किं किं यच्छति ?

(८) अग्निः कस्य पानम् इच्छति ?

(९) ऋत्विक्ः कस्याहुतिदानं करोति ?

(१०) राष्ट्रस्य सेवां कः करोति ?

३. **निम्नलिखित-मन्त्राणां भावार्थं लिखन्तु ।**

(१) ॐ स॒वि॒ता त्वा॑ स॒वाना॑ꣳ सुवताम॒ग्निर्गृ॒हपतिना॒ꣳ सोमो॒ वन॒स्पतीनाम् ।

बृह॒स्पति॒र्वा॒चऽइन्द्रो॒ ज्यैष्ठ्या॒यरु॒द्रः प॒शुभ्यो॑ मि॒त्रः स॒त्यो व्वरु॑णो॒ धर्मपतीनाम् ॥

(२) ॐ अभ॑यं द्यावापृथिवी इ॒हास्तु नोऽभ॑यं॒ सोमः॑ सवि॒ता नः॑ कृणोतु ।

अभयन्नोऽस्तू॒र्वा१॑ऽन्तरिक्षं सप्त ऋषी॒णां चे ह॒विषाभ॑यं नो अस्तु ॥

(३) द्र॒वि॒णोदा द्रवि॑णसस्तु॒रस्य॑ द्रविणो॒दा सन॑रस्य॒ प्रय॑सत् ।

द्र॒वि॒णो॒ वी॒रव॑ती॒मिषं॑ नो द्रविणो॒दारा॑सते दी॒र्धमायुः ॥

४. **निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) ॐ स॒वि॒तात्वा॑ स॒वाना॑ ............................ धर्मंपतीनाम् ॥

(२) ॐ द्र॒वि॒णो॒द्रा पिपीषति ............................ रष्यत ॥

(३) ॐ सवितापश्चातात् ........................ दीर्घमायुः ॥

५. **अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) नः | (६) गृहपतीनाम् |
| (२) द्रविणम् | (७) ज्यैष्ठ्याय |
| (३) दीर्घमायुः | (८) पशुभ्यः |
| (४) यजमानाय | (९) वाच |
| (५) सविता | (१०) अभयम् |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) अस्तु
(२) कृणोतु
(३) दधातु
(४) सुवतु
(५) ओहते
(६) अष्यत
(७) यच्छतु
(८) कुर्वन्ति
(९) पठन्ति
(१०) कुरु

**७. सन्धिविच्छेदनं कुरुत ।**

(१) इहास्तु
(२) नोऽभयं
(३) अभयन्नोऽस्तु
(४) दीर्घमायुः
(५) सवितेदं
(६) विस्तृतान्तरिक्षम्
(७) सवितोत्तरातात्
(८) सस्तुरस्य
(९) द्रविणोदाः
(१०) नेष्ट्रा

**८. सन्धिसंयोजनं कुरुत ।**

(१) सप्त + ऋषिः
(२) द्युलोकः + च
(३) वयम् + आहवयामि
(४) अग्निः + गृहपतिः
(५) चतुः + दिक्षु
(६) अधः + च
(७) अस्माकम् + अग्रे
(८) राष्ट्रे + अस्मिन्
(९) विश्वकर्म + आदि
(१०) सोमरसस्य + आहुतिः

**छात्र-प्रवृत्तिः**

- महायज्ञे चतुर्वेदीयपुण्याहवाचनार्थं गच्छतु ।

**विशिष्टज्ञानम्**

- ज्योक्चसूर्य्यन्दृशे

●

| १६ | चतुर्वेदीयाशीर्वादपुण्याहवाचनम् - भागः-२ |
|---|---|

**प्रस्तावना**

पुण्याहवाचनप्रयोगः सर्वासुवेदशाखासु भवति । पुण्याहवाचने एकस्य ताम्रकलशस्योपरि नारिकेलं निधाय पञ्चपल्लवैः कलशम् अलङ्कृत्य धान्यपुञ्जोपरिसंस्थाप्य पुष्पमाल्यादिभिः समर्च्य शुद्धजलं प्रपूर्य यजमानस्याभ्युदयार्थं, वेदविद्विप्राः पुण्याहवाचनं यज्ञयागादि-कर्माणि कारयन्ति । मंत्रोच्चार-पुरस्सरं कलशे विविधद्रव्याणां प्रक्षेपः भवति । तेषु प्रक्षेपेषु अन्ते पञ्च रत्नानां हिरण्यानामपि प्रक्षेपो भवति, कलशे वरुणदेवतायाः आहवाहनादिपूजां कृत्वा अभिमन्त्रितकलशस्य धारणं यजमानः करोति, वेदविद्विप्राणां पूजनमपि भवति, विप्राणां हस्ते सुप्रोक्षितादि-करणं भवति । ततः ते विप्राः चतुर्वेदीयाशीर्वादमन्त्रोच्चारं कुर्वन्ति । यजमानेभ्यः आशीर्वादं वेदविद्विप्राः यच्छन्ति ।

---

**ऋग्वेदमन्त्रः**:- नवोंनवो भवति जायमानोऽह्ना केतुरुषसामेत्यग्रम् ।
भागं देवेभ्योविदधात्यायन् प्रचन्द्रमास्तिरते दीर्घमायुः ॥

**सरलार्थः**:- दिवसस्य वा दिनस्य सूचनाप्रदाता सूर्यदेवता नित्यं प्रातःकाले नवीना भूत्वा उदिता भवति । तस्य सूर्यस्यागमनेन देवयागस्य अस्माभिः याचना क्रियते । तथैव चन्द्रमाअपि अस्मान् दीर्घमायुः करोतु ।

**यजुर्वेदमन्त्रः**:-ॐ न तद्रक्षा थ्ठंसि न पिशाचास्तरन्ति देवानामोजःप्रथमज६ँ ह्येतत् । जो बिभर्ति दाक्षायण६ँ हिरण्य६ँ स देवेषु कृणुते दीर्घमायु६ँ स मनुष्येषु कृणुते दीर्घमायु ÷ ।

**सरलार्थः**:- राक्षसाः (रक्षांसि) पिशाचाश्च तत् सुर्वणं (हिरण्यं) न हिंसन्ति । तत् सुवर्णं वा हिरण्यं देवानां प्रथममोजः। प्रथमोत्पन्नं देवानां तेजः इदं हिरण्यमस्ति । अत एव हिरण्यम् अलंकारत्वेन सर्वे जनाः देवाः धारयन्ति। ते सर्वे हिरण्यं धारियत्वा अस्मिन् लोकेषु देवलोकेषु दीर्घमायुः प्राप्नुवन्ति । देवलोके चिरं वसन्तीत्यर्थः । ते देवाः मानवाः स्वं स्वं लोकेषु स्वमार्युदीर्घं लभन्ते ।

**सामवेन्दमन्त्रः**:-चन्द्रमा आज्वा। प्सुवान्ताराउवा । सुपर्णो घाउवा । वर्तेदिवि नवोहिराउवा । ण्यनाइमायाउवा । पदं विंदाउवा। तिविद्युताः । वितंमा आउवा । स्परोदा २३ सा ३८३ ई । औं २ ३ ४ ५ ई डा ॥

**सरलार्थः**:- हे चन्द्रमः ! त्वं सुषुम्णानामकसूर्यकिरणयुक्तः सन् अन्तरिक्षे जलमयमण्डले प्रवेशं करोसि । द्युलोकात् पृथ्वीलोकं तव तीव्रगतियुक्तं किरणमागच्छति । ते सर्वे किरणाः सुवर्णयुक्ताः सन्ति । अतिप्रकाशिताः ते किरणाः चन्द्रमस्सम्बन्धिनः सन्ति । शीध्रगतियुक्ताः ते किरणाः सन्ति । ते किरणाः मां प्रति न आगच्छन्ति, कारणम् अहं संसारकूपे पतितोऽस्मि, अस्मात् संसारकूपात् हे समस्तदेवताः मां निष्कायन्तु, अत एव अहं स्तवनं (स्तोत्रं) करोमि गायामि ।

**अथवर्वेदमन्त्रः**:- नैनं रक्षांसि न पिशाचाः सहन्ते देवानामोजः । प्रथमथ्ठंह्येतत् । यो बिभर्ति दाक्षायण हिरण्यं सजीवेषु कृणुते दीर्घमायु ॥

**सरलार्थः**:- इदम् ओजः, सामर्थ्यं देवतासम्बन्धितहरिण्यगर्भात् समुत्पन्नमस्ति । एतत् ओजः ये धारयन्ति ते जनाः वीरपुरुषाः भवन्ति । तेभ्यः वीरपुरुषेभ्यः न केपि राक्षसाः अवरोधयन्ति । पीडामपि न यच्छन्ति । ये जनाः दाक्षायणं हिरण्यरूपमणिं धारयन्ति, ते स्वायुः दीर्घकालपर्यन्तं वर्धयन्ति ।

**ऋग्वेदमन्त्रः**:- ॐ उच्चादिवि दक्षिणावन्तोऽअस्थुर्येऽअश्वदाः सहते सूर्येण । हिरण्यदाऽअमृतत्वं भजन्ते वासोदाः सोम प्रतिरन्तऽआयुः ॥

**सरलार्थः-** दक्षिणादाता यजमानः स्वर्गस्य श्रेष्ठस्थाने निवसति । अश्वस्य दानदाता सूर्येण सह सम्मिलितो भवति । वस्त्रदान-दाता सोमेन सह गमनं करोति । सुवर्णदानदाता श्रेष्ठाऽमृतस्य प्राप्तिं करोति ।

**यजुर्वेदमन्त्रः-** उ॒च्चाते॑ जा॒तमन्ध॑सो दि॒विसद्भूम्याद॑दे ।

उ॒ग्रꣳ शर्म्म॒ म॒हिश्रव॑ः ॥

**सरलार्थः-** हे सोम ! भवतः रसस्य यदंशः उर्ध्वम् गत्वा (आहुतिद्वारा) तद् रसस्य यदंशः द्युलोके प्रतिष्ठितः अभवत् । पुनः स एवरसः कीर्तियुक्तः सुखस्वरूपः उग्ररूपः वृष्टिरूपेण अस्यां भूमेरुपरि आगच्छति । भूमिः तमेव रसं जलरूपेण ग्रहणं करोति ।

**सामवेदमन्त्रः-** उच्चा५ता२ २ ईजा४तम२न्ध५साः । दिवा१ई१ । सा१ १ द्भूर मि१या २३ ददा२ई । उग्रा१ ꣳ शम्मा२१ । महा २३ ईश्रवा२उ । वा२ ३ । स्तो२र३षे१ २१ ३१ ४१ ५ ॥

**सरलार्थः-** हे सोम ! तव रसस्य, श्रेष्ठ-जन्म द्युलाके बलं यच्छति । पृथ्वीलोके समस्तसुखं यच्छति । भूतलवासि-जनेभ्यः यजमानेभ्यः त्वम् अत्यधिकमन्नं यच्छति तेनान्नेन जनाः सुखरूपाः भवन्ति ।

**अथर्ववेदमन्त्रः-** उ॒च्चापत॑न्तम॒रुणं सु॑प॒र्णं मध्ये॑ दि॒वस्त॒रदणिं॒ भ्राज॑मनम् । पश्या॑मत्वा सवि॒तारं॒ यमा॒हुरजेस्रं॒ ज्योति॒र्यदवि॑न्द॒दत्रिः॑ ॥

**सरलार्थः-** आदित्यरूपसूर्यः खगस्वरूपेण उच्चस्थानात् उदयं भूत्वा अयं द्यूलोकं प्रकाशयति । ऋषयः ये सन्ति ते सर्वे सूर्यज्योतिः अजस्रमिति रूपेण वर्णयन्ति । वयमति सवितृरूपेण तव दर्शनं कुर्मः । अत्रिमुनिना ग्रहणसमये यथा भवतः (सूर्यस्य) दर्शनं कृतमासीत् । तथैव वयमपि तव दर्शनं कुर्मः ।

## शब्दार्थः

**कलशः** - कुम्भः, **नारिकेलम्** - श्रीफलम्, **धान्यपुञ्जः** - धान्यचयः, **प्रक्षेपः** - निक्षेपः, **जलम्** - उदकम्, **चन्द्रमाः** - निशाकरः, **यजमानः** - यज्ञकर्ता, **नवः** - नूतनः, **रक्षांसि** - राक्षसाः, **ओजः** - तेजः, **हिरण्यम्** - सुवर्णम्, **दाक्षायणः** - देवता, **बिभर्ति** - धारयति, **किरणाः** - रश्मयः, **स्तवनं** - स्तोत्रम्, स्तुतिर्वा, **द्यवि** - स्वर्गे, द्युलोके वा, **अश्वदा** - हयदा, (अश्वं ददातीति- अश्वदा) **अमृततत्वम्** - जलतत्वम्, **विद्युता** - द्योतता, (विशेषेण द्योतते), **मानवाः** - मनुष्याः, **न हिंसन्ति** - न मारयन्ति, **न कृणुते** - न चक्रतुः (हिंसायाम् न हिंसा चक्रतु) **सुपर्णं** - सूर्यम्, **ज्योतिः** - प्रकाशः, **अत्रिः** - अत्रिऋषिः, **भ्राजमानम्** - शोभमानम्, (प्रकाशमानम्), **अन्नम्** - धान्यम् ।

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्त्वा उत्तरं ददतु ।**

(१) सर्वासु वेदशाखासु किं भवति ?

(क) तन्त्रवाचनम् (ख) कथावाचनम् (ग) पुण्याहवाचनम् (घ) यन्त्रवाचनम्

(२) पुण्याहवाचने ताम्रकलशस्योऽपरि किं स्थापनीयम् ?

(क) पूगीफलम् (ख) आम्रफलम् (ग) दाडिमफलम् (घ) श्रीफलम् (नारिकेलं)

(३) कलशालंकरणार्थं कलशे किं स्थापनीयम् ?

(क) पञ्चपल्लवम् (ख) पञ्चपुष्पम् (ग) पञ्चमूलम् (घ) पञ्चामृतम्

(४) पुण्याहवाचनेन यजमानस्य किं भवति ?

(क) पापोदय: (ख) अभ्युदय: (ग) अधोपतनम् (घ) नरकपतनम्

(५) पुण्याहवाचन कलशे कस्य प्रक्षेपो भवति ?

(क) विविध-पाषाणानाम् (ख) विविध-वालुकानाम्

(ग) विविध-जन्तूनाम् (घ) विविध-द्रव्याणाम्

(६) पुण्याहवाचनकलशे अन्ते किं प्रक्षिप्यते ?

(क) हिरण्यम् (ख) लोहम् (ग) ताम्रम् (घ) रजतम्

(७) पुण्याहवाचनकलशे कस्य देवस्याह्वाहनं भवति ?

(क) हनुमत: (ख) गणेशस्य (ग) वरुणस्य (घ) कुबेरस्य

(८) अभिमन्त्रितपुण्याहवाचनकलशं क: धारयति ?

(क) भ्रममाण: (ख) यजमान: (ग) शोभमान: (घ) पवमान:

(९) विप्राणां हस्ते किं भवति ?

(क) सुशिक्षितादिकरणं (ख) अशिक्षितादिकरणम्

(ग) बुभुक्षितादिकरणम् (घ) सुप्रोक्षितादिकरणं

(१०) यजमाना: वेदविदविप्रेभ्य: किं यच्छन्ति ?

(क) भक्ष्यभोज्यपदार्था न्(ख) आशीर्वादान् (ग) खाद्यपदार्थान् (घ) पेयपदार्थान्

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) दिनस्य सूचनां क: यच्छति ?

(२) सविता कीदृशो भूत्वा उदितो भवति ?

(३) सूर्यदेवस्यागमनेन अस्माभि: कस्य याचना क्रियते ?

(४) अस्मभ्यं चन्द्रमा: किं यच्छति ?

(५) राक्षसा: किं न हिंसन्ति ?

(६) देवानां प्रथमम् ओज: किमस्ति ?

(७) हिरण्यं धारयित्वा देवा: मानवा: किं प्राप्नुवन्ति ?

(८) चन्द्रमा: कस्मिन् मण्डले प्रवशं करोति ?

(९) चन्द्रमस: किरणा: कीदृशा: सन्ति ?

(१०) अहं कुत्र पतितोऽस्मि ?

**३. निम्नलिखित मन्त्राणां भावार्थ: लिखन्तु ।**

(१) नवोंनवो भवति जायमानोऽह्मां केतुरुषसामेत्यग्रम् ।

भागं देवेभ्यो विदधात्यायन् प्रचन्द्रमास्तिरते दीर्धमायु: ॥

(२) उच्चाते जातमन्धसो दिविसद्भूम्याददे ।

उग्रꣳ शर्म्ममहिश्रव॑: ॥

(३) उच्चापतन्तमरुणं सुपर्णं मध्ये दिवस्तरणिं भ्राजमानम् ।

पश्यामत्वा सवितारं यमाहुरनेसम ज्योतिर्यदविन्ददत्रि: ॥

**४. निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) ॐ नतद्रक्षां ........................ कृणुते दीर्धमायुः ॥

(२) नवों नवों भवति ........................... दीर्धमायुः ॥

(३) ॐ उच्चादिवि दक्षिणा ........................ प्रतिरन्तऽआयुः ॥

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) देवेभ्यः
(२) चन्द्रमाः
(३) भागम्
(४) आयुः
(५) पिशाचाः
(६) देवानाम्
(७) ओजः
(८) देवेषु
(९) सूर्येण
(१०) दक्षिणावन्तः

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) विदधाति
(२) भवति
(३) तिरते
(४) स्तरन्ति
(५) बिभर्ति
(६) कृणुते
(७) सहते
(८) प्रतिरन्तः
(९) भजन्ते
(१०) ददे

**७. सन्धिविच्छेदनं कुरुत ।**

(१) मेत्यग्रम्
(२) विदधात्यायन्
(३) चन्द्रमस्तिरते
(४) देवानामोजः
(५) ह्येतत्
(६) दीर्धमायुः
(७) नैनम्
(८) जातमन्धसो
(९) यमाहुः
(१०) पतन्तमरुणं

**प्रश्नः८ सन्धिसंयोजनं कुरुत ।**

(१) दिवः + तरणिं
(२) विन्दत् + अत्रिः
(३) ईजातम् + अन्धसाः
(४) पिशाचाः + तरन्ति
(५) प्रथमम् + अजम्
(६) हि + एतत्
(७) पुञ्ज + उपरि
(८) यजमानस्य + अभ्युदयार्थम्
(९) पूजनम् + अपि
(१०) मन्त्र + उच्चारः

**छात्र-प्रवृत्तिः**

- विद्यालयस्य धार्मिकोऽत्सवे पुण्याहवाचनाशीर्वादमन्त्रान्- छात्राः पठेयुः ।

**विशिष्टज्ञानम्**

- सुमित्रियानऽआप ओपधयः सन्तु ।

●

# १७ | चतुर्वेदपुण्याहवाचनमन्त्राः - भागः-१

**प्रस्तावना**

''यज्ञो वै श्रेष्ठतमं कर्म'' अस्मिन् संसारे बहूनि कर्माणि सन्ति । यथा नित्यकर्म, नैमित्तिककर्म, काम्यकर्म, निष्कामकर्म, प्रायश्चित-कर्म, एतानि सर्वाणि कर्माणि शास्त्रे प्रतिपादितानि सन्ति । कानिचन कर्माणि निषिद्धानि कर्माणि अपि सन्ति । शास्त्रे यानि निषिद्धानि कर्माणि प्रतिपादितानि सन्ति, तानि कर्माणि अस्माभिः अवश्यमेव त्याज्यानि भवन्ति । तदा एव अस्माकं मानवजीवनं सुरम्यं सुगन्धितं समाजानुकुलम् अनुकरणशीलं भवष्यति । उक्तं च - ''यज्ञो वै विष्णुः'' यज्ञस्य स्वरूपं विष्णुमयं (वर्तत्ते) यज्ञे ये निमन्त्रिताः वेदपारगाः विप्रा अपि विष्णुरूपाः सन्ति । यज्ञे (यज्ञकर्मणि) ते विप्राः यज्ञकर्तृणां यजमानानां वा समग्र संसारस्य कल्याणार्थं चतुर्वेदमन्त्रोच्चारपूर्वकं क्रमशः पुण्यं, कल्याणं, ऋद्धिं, स्वस्ति ''श्रीः'' इत्यादीनां वृद्धिर्भवेत् एतदर्थम् आशीर्वादाँश्च यच्छन्ति । उक्तं च -

**संपूज्य गन्धमाल्याद्यैः ब्राह्मणान् स्वस्ति वाचयेत् ।**
**धर्मकर्मणि मांगल्ये संग्रामेऽद्भूतदर्शनैः ।**
**पुण्याहवाचनं देवैः ब्राह्मणस्य विधीयते ।**
**एतदेव निरोंकारं कुर्यात् क्षत्रियवैश्ययोः ॥**

तदनन्तरं संपूर्णपुण्यफलप्राप्त्यर्थं पञ्चधाऽशीर्वचनाय यजमानः वेदविद्विप्रं प्रार्थयते ।

**ब्राह्मं पुण्यं महद्यच्च सृष्ट्युत्पादनकारकम् ।**
**वेदवृक्षोद्भवं नित्यं तत् पुण्याहं ब्रुवन्तु नः ॥**

---

## । अथपुण्यम् ।

**ऋग्वेदमन्त्रः**:- ॐ उद्गातेव शकुने साम गायसि ब्रह्मपुत्रऽइव सवनेषु शंससि । वृषेव वाजी शिशुमतीरपीत्या सर्वतो नः शकुने भद्रमावद विश्वतो नः शकुने पुण्यमावद ॥

**सरलार्थः**:- सोमयागस्य उद्गाता सोमपानं करोति, तथैव हे शकुने ! (हे खगविशेष) त्वमपि सुन्दरगानं यज्ञे ऋत्विग्गणाः मन्त्रोच्चारशब्दं कुर्वन्ति, तथैव त्वमपि मधुरशब्दं कुरु । त्वम् आसमन्तात् अस्माकं कृते पुण्यवृद्ध्यर्थं कल्याणस्य सूचनाप्राप्तं करोसि ।

**यजुर्वेदमन्त्रः**:- ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।
पुनन्तु विश्वा भूतानि जातवेदः पुनीहिमा ॥

**सरलार्थः**:- देवजनाः मां पवित्रं कुर्वन्तु । ते देवजनाः मनसा मम बुद्धिं पवित्रां कुर्वन्तु । सर्वे पवित्रप्राणिनः सर्वभूतानि मां पवित्रं कुर्वन्तु । हे अग्निदेवते । समुत्पन्नेभ्यः प्राणिभ्यः ये ज्ञानिनः ज्ञाताः ते मां पवित्रं कुर्वन्तु ।

**सामवेदगानमन्त्रः**:- ॐ पुनानः सोमाऽधाराऽ२३४ या ।
आपावसानो अर्येस्यारत्नधायोनिमृस्यसाऽरइदसाइ । ओहाऽ३उवा । उत्सोदेवोहिराऽ२३ । हाई ।
ओहाऽ३उवा । व्यया । औड । ३ होड५ई डा वा । होड ५ ई ॥

**सरलार्थः**:- हे सोम ! तव स्वरूपम् अति-निर्मलं पवित्रमस्ति । तव धारया जलस्याच्छादनं कृत्वा त्वं सोमपात्रं प्रति गच्छसि । यज्ञियसोमपात्रं गत्वा त्वं रमणीयधनं, प्रकाशितसुर्वणम् अस्मान् प्रयच्छ । सत्यस्वरूपयज्ञियस्थले त्वं विराजमानो भव ।

**अथर्ववेदमन्त्रः**- ॐ पुनन्तु मा देवजनाः पुनन्तु मनवो धिया ।

पुनन्तु विश्वा भूतानि पवमानः पुनातु मा ॥

**सरलार्थः**- दैवीजीवाः, दैवीजनाः मां पवित्रं कुर्वन्तु । सर्वेपि मानवाः स्व बुद्धया मां पवित्रं कुर्वन्तु । सर्वे जनाः सद्गुणिनः मां पवित्रं कुर्वन्तु ।

## । अथ कल्याणम् ।

**ऋग्वेदमन्त्रः**- ॐ अपाः सोमस्तमिन्द्र प्रयाहि कल्याणीर्जाया सुरणं गृहेते । यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावतः ॥

**सरलार्थः**- हे इन्द्र ! त्वम् मधुरवाण्य वदन् सोमपानं कुरु । सोमरसपानं कृत्वा गृहगमनं कुरु । तव गृहे सौभाग्यवती सुरमणीया स्त्री विद्यते । त्वं गृहगमनार्थं रथे आरूढो भव । गृहे गत्वा अश्वानाम् तत्र मोचनं त्वं कुरु ।

**यजुर्वेदमन्त्रः**-ॐ यथेमां व्वाचङ्कल्याणी मा व्वदानि जनेभ्यः । ब्रह्मराजन्या भ्याᳪ शूद्राय चार्ज्जाय च स्वायचारणाय च । प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृध्य तामुप मादो नमतु ॥

**सरलार्थः**- अहम् इदं कल्याणयुक्तावेदवाणी-समुच्चारं करोमि । सा वेदवाणी ब्राह्मणक्षत्रिय-वैश्यशूद्राणां सर्वेषां जनानां कृते स्वभक्तानां कृते, अहम् अस्याः वेदवाण्याः समुच्चारणं करोमि दक्षिणादानार्थं अहं समुद्यतोऽस्मि, अतः देवानां प्रियोऽस्मि । मदीयोऽयं मनोरथः पूर्णो भवतु । या वेदवाणी मया उच्चते । सा वेदवाणी मम कृते आत्मसमर्पणं करोतु ।

**सामवेदगानमन्त्रः**-ॐ काऽ५ या । न श्चा३इत्रा३आभूवात् । उं । तीं सदा वृधस्सं । खा । औ३हाेहाइ । कया २३शचा । स्ठयौ हो ३ । हुंम्मावा१२ र्तो ३५ होइ ।

**सरलार्थः**- सदा वृद्धियुक्तः, विचित्रपराक्रमयुक्तः, मित्ररूपः तादृशः इन्द्रः अस्माकं समीपे समुपस्थितो भवतु । अस्माभिः तेभ्यः इन्द्रेभ्यः तृप्तिकारकः पदार्थः प्रदत्तोऽस्ति । अस्माभिः कृतं प्रज्ञासहिताऽनुष्ठानं तस्मिन् अनुष्ठाने अयमिन्द्रः समुपस्थितो भवतु । तम् इन्द्रं वयं प्रार्थयामः ।

**अथर्ववेदमन्त्रः**- ॐ विश्वजित् कल्याण्यैमा परिदेहि ।

कल्याणि द्विपाच्च सर्वन्नो रक्ष चतुष्पाद्यच्च नः स्वम् ॥

**सरलार्थः**- हे कल्याणीदेवि ! सर्वविद्पुरुषेभ्यः त्वं मां यच्छ । हे सर्वविद्पुरुषाः अस्माकं गृहस्थानां पुत्रपरिवाराणां सर्वेषां रक्षां यूयं कुरुत ।

## शब्दार्थः

**शकुनेः** - स्वर्गः, **साम** - सामवेदः, **सवनेषु** - यज्ञेषु, **भद्रम्** - कल्याणम् , **पुनन्तु** - पवित्रं कुर्वन्तु, धियः बुद्धयः, **जातवेदाः** - अग्निदेवता, **भूतानि** - प्राणिनः, **कल्याणी** - कल्याणकारिणी, **जाया** - भार्या, **गृहे** - भवने, **ते** - तव, **अपाः** - परिनिष्ठिता वाणी, **मोचनं** - मुक्तम् (बन्धनरहितम्), **सरणम्** - सुरमणीया, देवाङ्गना, **वाचं कल्याणी** - कल्याणयुक्ता वाणी, **ब्रह्मराजाभ्यां** - ब्राह्मणक्षत्रियवर्णाभ्यां, **शूद्राय** - शूद्रवर्णाय, **विश्वजित्** - विश्वविजेता (सर्वविद्कल्याणकारकः पुरुषः) **सर्वन्नो रक्ष** - आसमन्तात् सर्वतः अस्मान् रक्ष

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्त्वा उत्तरं ददतु ।**

(१) श्रेष्ठतमं कर्म किमस्ति ?

(क) यज्ञः (ख) कीर्तनम् (ग) कथा (घ) भजनम्

(२) अस्मिन् संसारे बहूनि कानि सन्ति ?

(क) चर्माणि (ख) धर्माणि (ग) वर्माणि (घ) कर्माणि

(३) अस्माभिः कानि कर्माणि त्याज्यानि ?

(क) प्रायश्चितानि (ख) निषिद्धानि (ग) विहितानि (घ) काम्यानि

(४) अस्माकं जीवनं कीदृशं भवेत् ?

(क) सुगम्यं (ख) सुरम्यं (ग) सुभव्यम् (घ) सुकव्यम्

(५) यज्ञस्य स्वरूपं कीदृशम् ?

(क) ब्रह्म (ख) विष्णुः (ग) रुद्रः (घ) गणेशः

(६) वेदपारगाः विप्राः कीदृशाः ?

(क) गणेशरूपाः (ख) ब्रह्मरूपाः (ग) शिवरूपाः (घ) विष्णुरूपाः

(७) पुण्याहवाचने पुण्यवाक्यं कतिविधम् अस्ति ?

(क) षड्विधं (ख) पञ्चविधं (ग) अष्टविधं (घ) दशविधम्

(८) सोमयागे गायकस्य गानकर्तुः नाम किम् ?

(क) उद्कर्ता (ख) उद्भ्राता (ग) उद्गाता (घ) उद्भूता

(९) जातवेदः (अग्निः) कं पवित्रं करोतु ?

(क) प्राणिभ्यः (ख) गजेभ्यः (ग) अश्वेभ्यः (घ) गोभ्यः

(१०) सोमस्य स्वरूपं कीदृशमस्ति ?

(क) अमांगल्यम् (ख) अस्वच्छम् (ग) अपवित्रम् (घ) पवित्रम्

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) मां पवित्रं के कुर्वन्ति ?

(२) खगविशेषः किं करोति ?

(३) यज्ञे ऋत्विग्गणाः किं कुर्वन्ति ?

(४) सोमः कुत्र गच्छति ?

(५) इन्द्रः मधुरवाणीं वदन् किं करोति ?

(६) वेदवाणी कस्य जनस्य कृते वर्तते ?

(७) विचित्रपराक्रमयुक्तः इन्द्रः कीदृशो वर्तते ?

(८) अस्माकम् अनुष्ठाने कः समुपस्थितो भवति ?

(९) इन्द्र गृहगमनार्थं कुत्र आरुढो भवति ?

(१०) इन्द्रस्य गृहे कीदृशी स्त्री विद्यते ?

**३. निम्नलिखित-मन्त्राणां भावार्थं लिखन्तु ।**

(१) ॐ पुनन्तु मा देवजनाः पुनन्तु मनसा धियः ।

पुनन्तु विश्वाभूतानि जातवेदः पुनीहिमा ॥

(२) ॐ अपाः सोमस्तमिन्द्र प्रयाहि कल्याणीर्जाया सुरणं गृहेते ।

यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणा वता ॥

(३) ॐ विश्वजित् कल्याण्यैमा परिदेहि ।

कल्याणि द्विपाच्च सर्वन्नो रक्ष चतुष्पाद्यच्च नः स्वम् ॥

**४. निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) ॐ उदगायतेव .............................. शकुने पुण्यमावद ॥

(२) ॐ यथेमां व्वाचङ्कल्याणी ......................... मादो नमतु ॥

(३) ॐ पुनन्तु मा देवजनाः .......................... पुनातु मा ।। अथर्व

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) इमाम्

(२) वाचम्

(३) जनेभ्यः

(४) दक्षिणायै

(५) देवानाम्

(६) मनसा

(७) धियः

(८) सवनेषु

(९) रथस्य

(१०) देवजनाः

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) ब्रुवन्तु

(२) कुर्यात्

(३) विधीयते

(४) गायसि

(५) वद

(६) पुनन्तु

(७) प्रयाहि

(८) देहि

(९) रक्ष

(१०) कुरुत

**७. सन्धिविच्छेदनं कुरुत ।**

(१) कल्याणीर्जाया

(२) द्विपाच्च

(३) पुण्यमावद

(४) सोमस्त्वमिन्द्रः

(५) यथेमां

(६) दात्तुरिह

(७) भद्रमावद

(८) समृदयतामुप

(९) सृष्ट्युत्पादन

(१०) भूयासमयम्मे ।

**८. सन्धिसंयोजनं कुरुत ।**

(१) कर्माणि + एतानि

(२) चतुः + वेदः

(३) एतत् + एव

(४) प्राप्तिः + अर्थः

(५) महत् + अच्च

(६) वेदवृक्षः + उद्भवं

(७) मन्त्रः + उच्चारः

(८) जलस्य + आच्छादनम्

(९) पवित्रम् + अस्ति

(१०) सम् + उत्पन्न + अन्नेन

**छात्र-प्रवृत्तिः**

- छात्रैः देवालये देवसन्निधौ पुण्याहवाचनमन्त्राणामुच्चारणं करणीयम् ।

**विशिष्टज्ञानम्**

- सुखं मेषायमेष्यै ।

●

# चतुर्वेदपुण्याहवाचनमन्त्राः - भागः-२

**प्रस्तावना**

पुण्याहवाचने मुख्यरूपेण किं कर्तव्यं ! कथं करणीयं ! इति प्रश्ने जाते सति, तस्योत्तरम् इदमेव यत् पुण्याहवाचने मुख्यरूपेण कलशस्य संस्थापनविधिः वर्तते । कारणं याज्ञिक-कर्मणि उपयुक्ताः यावन्तः कलशाः आवश्यकाः सन्ति, तावन्ताः कलशाः विधिपूर्वकसाधनीयाः पुण्याहवाचनप्रयोगद्वारा ते साधनीयाः आराधनीयाः, कलशाः गणेशादिमध्यस्थापन प्रधानस्थापनादिषु पीठोपरि संस्थापनीयाः भवन्ति, तेन पुनः पुनः कलशानाम् साधनस्य आवश्यकता न भवेत् । ऋग्वेदः, कृष्ण यजुर्वेदः, सामवेदः, अथर्ववेदे पुण्यम्, ऋद्धिः, स्वस्ति, प्रैषत्रय-मेव पुण्याहवाचने भवति, केवलं शुक्लयजुर्वेदे पञ्चप्रैषात्मक-पुण्याहवाचनम् भवति यथा - पुण्यम्, कल्याणं, ऋद्धिं, स्वस्ति, श्रीरस्तु, इति शुकलयजुर्वेदे पुण्याहवाचने कलशमेकं गृह्यते अन्यासु शारवासु कलशद्वयं पुण्याहवाचने संगृह्यते । वस्तुतस्तु आशीर्वादग्रहणप्रधानप्रयोगः पुण्याहवाचनम् अस्ति अत एव चतुर्वेदवादिविप्राः चतुर्वेदोच्चारमन्त्रैः कल्याणं कुर्वन्ति ।

---

**। अथ ऋद्धिः ।**

**ऋग्वेदमन्त्रः-** ॐ ऋ॒दध्या॑म् स्तोम॑ सनु॒याम॑ वाज॒मानो॒ मंत्रे॑ स॒रथे॑ होप॑ यातं । यशो॒ न प॒क्वं मधु॒ गोष्वं॒तरा । भूतांशौ अ॒श्विनो॒ काम॑मप्राः ।

**सरलार्थः-** वयं स्तुतिं गानं कुर्वन् हविरान्नस्य विभाजनं कुर्मः । यूयं द्वौ (अश्विनीकुमारौ) रथारूढौ भूत्वा यज्ञस्थले आगच्छतः । युवाभ्यां कृते गोस्तने मधुरदुग्धम् अस्माभिः स्थापितमस्ति । भूतार्शऋषिणा स्तोत्रोच्चारणं कृत्वा अश्विनीकुमाराणां कामना पूर्तिः कृता वर्तते ।

**यजुर्वेदमन्त्रः-ॐ स॒त्रस्य॑ऽऋद्धि॒र॑स्य ग॑न्नम॒ज्योति॑रमृ॒ताऽअभूम । दिव॑म्पृ॒थिव्याऽअध्यारु॑हा॒मा वि॑दाम दे॒वान्त्स्व॒र्ज्योतिः॑ ॥**

**सरलार्थः-** हे सोमदेवते ! त्वं साक्षात् यज्ञे समृद्धिदानं करोषि । वयं यज्ञोऽपासनया आदित्यतेजः प्राप्नुमः । आदित्यतेजः सम्प्राप्य वयम् अमरणधर्माः सञ्जाताः स्मः । पृथ्वीतः समुत्थिता संभूतिः सा संभूतिं गृहीत्वा वयं स्वर्गे आरूढाः भवामः । सम्भूत्या इन्द्रादि-देवानां ज्ञानम् अस्माभिः प्राप्तम् । परब्रह्मणः अवलोकनमपि-अस्माभिः कृतम् । इति ।

**सामवेदमन्त्रः-**ॐ औं हों वो औं हों वा औंहो ३ वा । अंगन्मज्योंतिः । अंगन्मज्योंतिः । अंग्न्मज्योंतिः । अमृतां अंभूमं । अंमृता अंभूमं अंमृता अंभूमं तंरिक्षंपृथिव्यें । अध्यारुं हां मां । तंरिक्षांपृथिंव्योंअध्योंरूंहांमां । तंरिक्षेंपृथिंव्यों अध्योंरुं हों मों । दिंवमंन्तिक्षोंदंध्योंरुं हों मों । दिंवमंन्तंरक्षोंदंध्योंरुं हों मों । दिंवेमंन्तरिक्षोंदंध्यों हों मां । अंविदांमदेंवांन् । अंविदांमं देंवांन् । अंविदांमं देंवांन् । संमुंदें वै रगन्मेंहिं । संमुंदें वै दगन्मेंहिं । संमुंदें वै रगन्मेंहिं । औं हां वां । औं हों वा । औं हो ३ वां सुवर्ज्यों-तीः २ ३ ४ ५ ।

**सरलार्थः-** सूर्यस्य ज्योतिः बहुप्रकाशिताऽस्ति, तत्र न कोऽपि गच्छति, किन्तु अस्माभिः सोमयज्ञरूपा अमृतरूपा-ज्योतिः प्राप्ताऽस्ति । सा अमृताज्योतिः अस्मिन् अरण्ये प्रकाशिता भवति, पृथ्व्युपरि सोमरससरूपम् अमृतम् प्रसारितं भवति । तत् अमृतम् पृथ्वीलोके, अन्तरिक्षलोके, द्युलोके च प्रसरितम् अस्ति । अर्थात् त्रिषुलोकेषु सोमरसामृतम् प्रसरितम् अस्ति । अस्मै अमृताय देवाः अपि भागग्रहणार्थम् आगच्छन्ति । तेऽपि इदं सोमरससरूपि अमृतम् इच्छन्ति । तादृशी श्रेष्ठा अमृतरूपा सोमरससरूपा सूर्यस्य ज्योतिः समस्तब्रह्माण्डे प्रकाशिताऽस्ति।

**अथर्ववेदमन्त्रः**- ॐ ऋधंङमन्त्रो योनिं य आबभूवामृता सुवर्धमानः सुजन्मा । अदब्धासुभाजमानोऽहेवत्रितो धर्ता दाधारा त्रीणि ।।

**सरलार्थः**- हे सुजन्मा इन्द्र ! वयं सर्वे तव स्तुतिं कुर्मः । अस्माकं यज्ञे त्वम् आगच्छ, अमृततुल्य यज्ञस्य वृद्धिं त्वम् कुरु, अर्थात् अस्माकं यज्ञः प्रकाशितं त्वं कुरु । यज्ञनैव लोकत्रयं सुरक्षितम् अस्ति । प्रकाशितम् अस्ति । धारितम् अस्ति ।

## । अथ स्वस्ति ।

**ऋग्वेदमन्त्रः**- **ॐ स्वस्तिरिद्धि प्रपथे श्रेष्ठारेक्णं स्वत्यभियावाममेति**

**सनोऽअमासो ऽअरणे निपातु स्वावेशा भवतु देवगोपा ॥**

**सरलार्थः**- या पृथ्वी मंगलमयपथयुक्ताऽसि, श्रेष्ठधनयुक्ता या पूरिता (पृथ्वी) अस्ति । वरणीया पृथ्वीयज्ञस्थानस्य योग्याऽस्ति । सा पृथ्वी अस्माकं गृहे, कानने सर्वत्र कल्याणकर्त्री भवतु । देवगणाः सदैव अस्याः पृथ्व्याः भरणपोषणं कुर्वन्ति । वयं तादृशी-पृथ्व्योऽपरि सुखपूर्वकं निवासं कुर्मः ।

**यजुर्वेदमन्त्रः**-ॐ स्वस्तिनऽइन्द्रो व्वृद्धश्रवाः स्वस्तिनः पूषा विश्ववेदाः - । स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥

**सरलार्थः**- चिरन्तनकीर्तियुक्तः इन्द्रः अस्माकं कल्याणं करोतु । सर्वधनस्य स्वामी पूषादेवता (सूर्यदेवता) अस्माकं कल्याणं करोतु । यस्य सङ्कटनाशकचक्रम् न कोऽपि अवरोद्धुं शक्यते, तादृशः अनुपहतगतियुक्तगरुडदेवः तस्या-धिपति-नारायणः अस्माकं कल्याणं करोतु । बृहस्पतिर्देवताऽपि अस्माकं कल्याणं करोतु ।

**सामवेदमन्त्रः**-ॐ त्रातारमिन्द्रं मविता । रमि२३न्द्रोम् । हवेहवे सुहवशूरमी२३न्द्रोम् । हुवारनुशक्रं पुरुहूत । मी२३न्द्राम् । इ दं ह । वाईः । म घं वा । वा ३८३ इ । तू ३ वा ५ इन्द्रा ६५६ः ॥

**सरलार्थः**- वयं शत्रुरक्षाकृतः इन्द्रस्य आह्वाहनं कुर्मः । मनोरथतृप्तकृतः इन्द्रस्य आह्वाहनं कुर्मः । सकलसंग्रामे शूरः, सकलकार्यकरणे समर्थः, रक्षाकरणे समर्थः तादृशस्यइन्द्रस्य वयम् आह्वाहनं कुर्मः । धनवान् इन्द्रः अत्र समागत्य हविर्भक्षणं करोतु ।

**अथर्ववेदमन्त्रः**- **ॐ स्वस्ति मात्र उत पित्रेणो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः ।**

**विश्वं सुभूत सुविदत्रन्नो अस्तु ज्योगेव दृशेम सूर्यम् ॥**

**सरलार्थः**- माता पृथ्वी, द्युलोकः पिता, अस्माकं वर्तते, तस्मात् कारणात् कल्याणं भविष्यति । जगति विद्यमानानां गौइत्यादिप्राणिनां समस्तजनानां समस्तजीवानां स्वस्तिर्भवतु । सर्वेभ्यः जनेभ्यः लाभैश्वर्यादिवस्तुनां प्राप्तिर्भवतु। वयम् उदितसूर्यदर्शनं प्रतिदिनं दिर्घकाल-पर्यन्तम् कुर्मः । वयं दीर्घजीविनो भवामः । अयमेवार्थः ।

## । अथ श्रीः ।

**ऋग्वेदमन्त्रः**- श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति । श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिथा मितद्रौ ॥

**सरलार्थः**- धनवृद्ध्यर्थम्, समृद्धिनिमित्तं च सोमस्य (सोमदेवस्य) स्तवनं भवति । सः सोमः स्तोतृणाम् अन्नम्, आयुः यच्छति । सम्पतिदानार्थम् अयं सोमदेवता स्व किरणेषु प्रकटितो भवति । सोमदेवस्य प्रभावेण युद्धे जयः अवश्यमेव अस्माभिः प्राप्यते । सोमदेवात् धनं प्राप्य स्तवनकर्तृभिः जनैः स्वजीवने स्थिरता प्राप्यते ।

**यजुर्वेदमन्त्रः**-**ॐ श्रीश्चं ते लक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम् ।**

**इष्णन्निषाणामुम्मइषाणा सर्वलोकम्मऽइषाण ॥**

**सरलार्थः-** हे परमपुरुषनारायण ! श्रीः च लक्ष्मीः तव द्वौ पत्न्यौ स्तः । अहोरात्रे द्वौ पक्षौ तव स्तः । तव सर्वाणि रूपाणि नक्षत्राणि सन्ति । विस्तृतमुखं तव अश्विनौ स्तः । स्वेच्छया हे भगवन् ! मम स्वीकारं कुरु, अस्य लोकस्य परलोकस्य च कृते मम इच्छां कुरु । सर्व लोकस्य कृते त्वं मम इच्छां कुरु ।

**सामवेदमन्त्रः-** ॐ श्रायन्तइवसूऽ५४रोयां । विश्वाऽ५२इदिन्द्राऽ५२ । स्यभा ५ रक्षाता । वासू निजातो ज निमा । नियोजा १ साऽ २ । प्रति भागंनदी २ धियः । प्राधा २३त्ती भागानाइदा । हुं । धिमा ३ः । ओ २३४ वा । है २३४५ ॥

**सरलार्थः-** हे अस्माकं सत्पुरुषाः ! यथा सूर्यस्याऽश्रयणेन किरणाः सेवनं कुवन्ति । तथैव यूयमपि इन्द्रस्य सकलधनस्य सेवनं कुरुत । इन्द्रः स्व-बलेन तेजसा धनस्योद्पादनं करोति, इन्द्रोत्त्पादितधनेषु यूयं पुत्रवत् भागग्रहणं कुरुत।

**अथर्ववेदमन्त्रः-** ॐ एह यांतु वरुंणः सोमों अग्निर्बृहस्पतिवस्तुं भिरेहयांतु । अस्य श्रियंमुपसंयांत् सर्वे उग्रस्यं चेतुः संमंनसः सजाताः ॥

**सरलार्थः-** बृहस्पतिसोमवरुणादिदेवाः अत्रागच्छन्तु । ते सर्वे देवाः एकाकिनः न आयान्तु, वस्तुभिः सह ते आगच्छन्तु । हे उत्तमकुलोत्पन्नपुरुषाः । सर्वे एकत्रिताः भवन्तु । पवित्रचेतनां ते देवाः यच्छन्तु । अस्य यज्ञस्य शोभावृद्धिं कुर्वन्तु ।

## शब्दार्थः

**स्तोम** - स्तुतिः, **ऋद्धिः** - स्मृद्धिः, **देवास्वर्ज्योतिः** - सूर्य-तेजः, **अश्विनौ** - द्वौ अश्विनीकुमारौ, **सत्रस्य** - यज्ञस्य **दिवमन्तरिक्षपृथिवायुन्** - त्रिषुलोकेषु (स्वागान्तरिक्षेपृथ्व्यादिषु) **स्वस्तिनः** - अस्माकं कल्याणम्, **इन्द्रः** - मघवाः, **तार्क्ष्यः** - गरुडः (खगविशेषः) **अरिष्टनेमिः** - संकटनाशकचक्रम्, **बृहस्पतिः** - देवगुरुः, **त्रातारमिन्द्रः** - रक्षाकर्ता इन्द्रदेवः, **पित्रेण** - जनकेन, **गोभ्यः** - धेनुभ्यः, **पुरुषेभ्यः** - मनुष्येभ्यः, **सूर्यम्** - आदित्यम्, **पत्न्या** - भार्यया, **लक्ष्मीः** - कमला, पद्मजा (लक्ष्मीदेवी) **अहोरात्रे** - दिननिशे, **सोमः** - चन्द्रः, **वरुणः** - जलदेवता वरुणदेवः, **अग्निः** - अनलः, **संमनसः** - एकत्रीभूताः, **धियः** - बुद्धिः, **व्यात्तम्** - विवृतम्, **नक्षत्राणि** - तारकानि (तारापुञ्जः) **संमनसः** - एकरूपस्य, (एकत्रितस्थ) **जगते** - लोकाय, **ज्योतिः** - दीप्तिः, (दिव्यतेजोयुक्ता ज्योतिः) कान्तिः ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्त्वा उत्तरं ददतु ।**

(१) पुण्याहवाचने मुख्य कः विधिः ?

(क) स्थालिस्थापनम् (ख) कलशस्थापनम् (ग) चषकस्थापनम् (घ) पंचपात्रस्थापनम्

(२) याज्ञिककर्मणि के उपयुक्ताः ?

(क) काष्ठानि (ख) आसनानि (ग) कलशाः (घ) स्थाल्यः

(३) शुक्लयजुर्वेदे पुण्याहवाचनानि कति ?

(क) सप्त (ख) षड् (ग) पञ्च (घ) चतुर्थ

(४) पैषत्रयं कस्मिन् वेदे वदनीयम् ?

(क) ऋग्वेदे (ख) यजुर्वेदे (ग) सामवेदे (घ) अथर्ववेदे

(५) यजुर्वेदपुण्याहवाचने पुण्याहवाचनार्थं कलशस्य संख्या का ?

(क) त्रयः (ख) द्वौ (ग) एकः (घ) पञ्च

(६) अन्यवेदेषु कलशस्य पुण्याहवाचने का संख्या ?

(क) दश (ख) पंचदश (ग) विंशतिः (घ) द्वौ

(७) रथस्योपरि कौ द्वौ देवौ आगच्छतः ?

(क) गणेशाम्बिकौ (ख) शंकरपार्वत्यौ (ग) अश्विनीकुमारौ (घ) ग्रहरुदौ

(८) अश्विनीकुमारयोः कामनायाः केन ऋषिणा पूर्तिः कृता ?

(क) भूतार्शऋषिणा (ख) विश्वामित्रऋषिणा (ग) वशिष्ठऋषिणा (घ) गौत्तमऋषिणा

(९) यज्ञे समृद्धिज्ञानं कः करोति?

(क) सूर्यः (ख) शिवः (ग) सोमः (घ) वरुणः

(१०) यज्ञोपासनया वयं किं प्राप्नुमः ?

(क) धनम् (ख) धान्यम् (ग) जलम् (घ) आदित्यतेजः

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) संभूतिं गृहीत्वा वयं कुत्रारूढाः भवामः ?

(२) संभूत्या अस्माभिः किं प्राप्तम् ?

(३) सूर्यस्य ज्योतिः कीदृशी वर्तते ?

(४) कस्मिन् यज्ञे अमृतज्योतिः समुत्पन्ना ?

(५) सोमरसः पृथ्व्योपरि केन रूपेण प्रस्तरितो भवति ?

(६) लोकत्रयं सुरक्षितं केन भवति ?

(७) मंगलपथयुक्ता काऽस्ति ?

(८) पूषादेवता कस्य स्वामि वर्तते ?

(९) गरुडदेवस्याधिपतिः कः अस्ति ?

(१०) इन्द्रस्याहवाहनं वयं किमर्थं कुर्मः ?

**३. निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) ॐ ऋदध्याम् स्तोम सनुयाम् वाजमानो मन्त्रे सरथे होप यातम् ।
यशो न पक्वं मधुगोश्वन्तरा । भूतांशोऽअश्विनोः काममप्राः ।

(२) ॐ स्वस्तिरिद्धि प्रपथे श्रेष्ठारेक्णं स्वत्यभियावाममेति
सनोऽअमासो ऽअरणे निपातु स्वावेशा भवतु देवगोपा ॥

(३) श्रिये जातः श्रिय आनिरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन् भवंति सत्या समिथा मितदौ ॥

**४. निम्नाङ्कितमन्त्राणां पूर्तिः विधेया ।**

(१) ॐ सत्रस्यऽऋद्धिर्दस्य ............................. स्वर्ज्योतिः ॥

(२) ॐ स्वस्तिनऽइन्द्रो ........................... बृहस्पतिर्दधातु ॥

(३) ॐ श्रीश्च ते लक्ष्मीश्च ......................... मंडइषाण ॥

५. **अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) स्वस्ति | (६) जगते |
| (२) लक्ष्मीः | (७) देवान् |
| (३) त्रातारः | (८) सत्रस्य |
| (४) पित्रेण | (९) दिवं |
| (५) गोभ्यः | (१०) देवान् |

६. **अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

| | |
|---|---|
| (१) अभूम | (६) अस्तु |
| (२) विदाम् | (७) दधाति |
| (३) आबभूव | (८) निपातु |
| (४) भवतु | (९) भवन्ति |
| (५) दधातु | (१०) कुर्मः |

७. **सन्धिविच्छेदनं कुरुत ।**

| | |
|---|---|
| (१) भूतांशौ | (६) बृहस्पतिर्दधातु |
| (२) काममप्राः | (७) श्रीश्चते |
| (३) ज्योतिस्मृता | (८) दिवमन्तरिक्षाद् |
| (४) ऋद्धिरस्य | (९) लक्ष्मीश्चते |
| (५) अध्यारुहामा | (१०) रूपमिश्वनौ |

८. **सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) अमृतत्वम् + आयन् | (६) त्वम् + आगच्छ |
| (२) निषाण + अमुमभ् | (७) योग्यः + अस्ति |
| (३) वि+ आत्तम् | (८) सदा + एव |
| (४) त्रातारम् + इन्द्रः | (९) पृथिवी + उपरि |
| (५) अदब्ध + आसु | (१०) कः + अपि |

**छात्र-प्रवृत्तिः**

- छात्रैः स्वपरिवारस्य जन्मदिने पुण्याहवाचनं करणीयम् ।

**विशिष्टज्ञानम्**

- पश्येम शरदः शतं जीवेम् शरदः ।

●

# १९ शुक्लयजुर्वेदीयराष्ट्रसूक्तम्

**प्रस्तावना**

राजते इति राष्ट्रम् । राजृ दिप्तौ धातोः ''सर्वधातुभ्यः ष्ट्रन्'' इति ''ष्ट्रन्'' प्रत्यये ''षःप्रत्ययस्य'' इति षलोपे ''हलन्त्यम्'' इति नलोपे ''व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छ शांषः'' इति जकारस्य षकारे प्रातिपदिकत्वात् 'सु' प्रत्यये सोरमि पूर्वरुपे राष्ट्रम् इति सिद्ध्यति ।

ऋग्वेदादिषु चतुर्षु वेदेषु राष्ट्रसूक्तम् उपलभ्यते । प्रस्तुतेऽस्मिन् प्रकरणे शुक्लयजुर्वेदीय राष्ट्रसूक्तं प्रतिपादितमस्ति। अस्मिन् राष्ट्रसूक्ते राष्ट्रभावना राष्ट्रैकता च निरूपिता वर्तते । अस्मिन् राष्ट्रे ब्राह्मणाः, क्षत्रियाः, वैश्याः, शूद्राश्च कीदृशाः भवेयुः इति विस्तारेण वर्णितमस्ति ॥

---

**मन्त्रः-** **रुचन्नौ धेहि ब्राह्मणेषु रुचꣳ राजसु नस्कृधि । रुचँव्विश्श्येषु शूद्रेषु मयि धेहि रुचा रुचम् ॥४८॥ ॥शु.य.अ.१८. क. ४८॥**

**पदपाठः-** रुचम् । नः । धेहि । ब्राह्मणेषु । राजस्वितिराज सु । नः । कृधि ॥ विश्श्येषु । शूद्रेषु । मयि । धेहि । रुचा रुचम् ॥४४॥

**सरलार्थः-** हे अग्ने ! अस्माकं ब्राह्मणेषु अस्मत्संबन्धिविप्रेषु दीप्तिम् आरोपय । अस्माकं राजसु क्षत्रियेषु दीप्तिं कुरु । वैश्येषु शूद्रेषु च आस्माकीनेषु रूचं कुरु । किं च मयि विषये रूचा सह रुचं धेहि । अविच्छिन्नां रुचं धेहि इति ॥

**मन्त्रः-** **इमन्देवाऽअसपत्नꣳ सुवद्ध्वम्महते क्षत्राय महतेज्ज्यैष्ठ्यायमहते जानराज्ज्यायेन्द्रस्येन्द्रियाय । इममुमुष्ष्य पुत्रममुष्ष्यै पुत्रमस्यै व्विशऽएष वोमी राजा सोमोस्माकम्ब्राह्मणानाꣳ राजा ॥४०॥**

**पदपाठः-** इमम् । देवाः । असपत्नम् । सुवद्ध्वम् । महते । क्षत्राय । ज्ज्यैष्ठ्याय । जानराज्ज्यायतिजान राज्ज्याय इन्द्रस्य इन्द्रियाय । इमम् । अमुष्ष्य । पुत्रम् । अमुष्ष्यै । पुत्रम् । अस्यै । व्विशे । एषः । व्वः। अमीऽइत्यमी । राजा । सोम ः । अस्माकम् । ब्राह्मणानाम् । राजा ॥४०॥

**सरलार्थः-** हे देवाः सवित्रादयः ! इमम् अमुकसंज्ञं यजमानं सपत्नरहितं कृत्वा प्रेरयध्वम् । किमर्थं । महत्यै क्षत्रपदव्यै, ज्येष्ठभावाय, महते जानराज्याय, इन्द्रस्यात्मने, इन्द्रियाय वीर्याय, आत्मज्ञानसामर्थ्याय इमे यजमानं सुवध्वम्। हे कुरवःपाञ्चालाः ! युष्माकम् एष खदिरवर्मा राजास्तु । अस्माकं ब्राह्मणानां तु सोमः वल्लीरूपः राजा प्रभुरस्तु ॥

**मन्त्रः-** **आ ब्ब्रह्मन्ब्राह्मणो ब्रह्मवर्च्चसी जायतामा राष्ट्रे राजन्न्युः शूरऽइषव्व्योतिव्व्याधीमहारथोजायतान्दोग्ग्ध्री धेनुर्व्वोढानड्ड्वानाशुः सप्प्तिः पुरन्धिर्य्योषा जिष्णूरथेष्ठाः सभेयो युवास्य यजमानस्य व्वीरो जायतान्निकामेनिकामे नः पर्ज्जन्न्यो व्वर्षतु फलवत्त्यो नऽओषधयः पच्च्यन्ताँय्योगक्क्षेमो नः कल्प्पताम्॥२२॥**

॥शु.य.अ.२२ क. २२॥

**पदपाठः-** आ । ब्रह्मन् । ब्राह्मणः । ब्रह्मवर्च्चसीतिब्ब्रह्मम । व्वर्च्चसी । जायताम् । आ । राष्ट्रे । राजन्न्यः। शूर ः । इषव्व्यः । अतिव्व्याधीत्यति व्याधी। महारथऽइतिमहा रथः । जायताम् । दोग्ग्ध्री । धेनु। व्वोढा । अनड्वान् । आशुः । सप्प्तिः । पुरन्धिरितिपुरम् धिः । यांषा । जिष्णुः । रथेष्ठा । रथेस्थाः। रथेस्त्थाऽइतिरथे स्था । सभेयः । युवा । आ । अस्य । यजमानस्य । व्वीरः । जायताम् । निकामेनिकामइतिनिकामे निकामे । नः । पर्ज्जन्यः । व्वर्षतु । फलवत्त्यऽइतिफल व्वत्त्यः । नः । ओषधयः । पच्च्यन्ताम् । योगक्क्षेमऽइतियोग क्क्षेमः । नः । कल्प्पताम् ॥२०॥

**सरलार्थः-** हे ब्रह्मन्, अस्मिन् देशे ब्रह्मवर्चसी यज्ञाध्ययनशीलो ब्राह्मणः उत्पद्यताम् । क्षत्रियः पराक्रमी इषौकुशलः (इषव्यः) शत्रुभेदनशीलः महारथः उत्पद्यताम् । दुग्धपूरयित्री धेनुः अजायताम् । वृषभः वहनशीलो जायताम्। अश्वशीध्रगामी जायताम् । स्त्री शरीरं सर्वगुणसम्पन्नं दधाति । रथे स्थितः युयुत्सुः नरः जयनशीलः जायताम्। सभायो योग्यः अस्य यजमानस्य वीरः पुत्रो जायताम् । अस्माकं राष्ट्रे पर्जन्यः नितरां कामनायां सत्यां वर्षतु । अस्माकं यवाद्याः औषधयः फलयुक्ताः स्वयमेवपक्वा भवन्तु । अस्माकं योगक्षेमः सक्लृप्तो भवतु। अलब्धलाभो योगः । लब्धस्य परिपालनं क्षेमः ॥

**मन्त्रः-** **व्वृष्ण्णंऽऊर्म्मिरंसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा व्वृष्ण्णंऽऊर्म्मिरंसि राष्ट्रदा राष्ट्रममुष्मै देहि व्वृषसेनोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहा व्वृषसेनोऽसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥२॥ ॥ शु. य. अ. १० क. २ ॥**

**पादपाठः-** व्वृष्ण्णः । ऊर्म्मिः । असि । राष्ट्रदाऽइतिराष्ट्र दा । राष्ट्रम । मे । देहि । स्वाहा । अमुष्मै। व्वृषसेनऽइतिवृष सेनः ॥२॥

**सरलार्थः-** जुहोत्युत्तरासु चतुर्गृहीतं वृष्ण ऊर्म्यादिभिः स्वाहाकारान्तैः पूर्वैः पूर्वैः प्रतिमन्त्रमुत्तरैरुत्तरैर्गह्णाति । हे कल्लोल। त्वं वृष्णो वर्षितुः सेक्तुः पशोर्नरस्य वा ऊर्मिः कल्लोलः असि । ''राष्ट्रदाः'' राष्ट्रं जनपदं ददातीति । राष्ट्रदाः स्वभावत एव देशप्रदः भवसि, अतः राष्ट्रं मह्यं ददातु (देहि) हविर्दत्तमस्तु । अमुष्मै यजमानाय राष्ट्रं जनपदं ददातु । सेना जलाराशिरूपा यस्य स वृषसेनः ॥

**मन्त्रः-** **अर्त्थेतंस्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहार्त्थेतंस्थराष्ट्रदाराष्ट्रममुष्मैदत्तौजंस्वतीस्थराष्ट्रदाराष्ट्रम्मेदत्त स्वाहौजंस्वतीस्थराष्ट्रदाराष्ट्रममुष्मैदत्तापःपरिवाहिणीं स्थराष्ट्रदाराष्ट्रम्मेदत्तस्वाहापः परिवाहिणीं स्थराष्ट्रदाराष्ट्रमुमुष्मैदत्तापाम्पतिंरसिराष्ट्रदाराष्ट्रम्मेदेहिस्वाहापाम्पतिंरसिराष्ट्रदाराष्ट्रममुष्मै देह्यपाङ्गर्भोसि राष्ट्रदा राष्ट्रम्मे देहि स्वाहापाङ्गर्भोसि राष्ट्रदा राष्ट्रममुष्मै देहि ॥३॥ ॥शु. य. अ. १० क. ३॥**

**पदपाठः-** अर्त्थेतऽइत्यर्त्थ इतः । स्थ । दत्त । ओजंस्वतीः । आपः । परिवाहिणीः । परिवाहिनीरितिपरि व्वाहिनीः। अपाम् । पतिः । अपाम् । गर्भः ॥३॥

**सरलार्थः-** हे आपः ! यूयम् ओजस्वतीः ओजसा बलेन युक्ता भवथ । हे आपः ! यूयं परिवाहिणीः स्थ परिसर्वतो वहन्तीति परिवाहिण्यः सर्वतोवहनशीला भवथ । समुद्रस्यापां होमदाने, अपां जलानां पतिः स्वामी पालकः असि । हेजलभ्रम । त्वमपां गर्भो मध्यवर्ती भवसि ॥

**मन्त्रः-** **सोमꣳ राजानमवंसेग्ग्निमन्वारंभामहे ।**

**आदित्यान्व्विष्ण्णुꣳ सूर्य्यम्ब्रह्माणंञ्च बृहस्पतिꣳ स्वाहा ॥२६॥ ॥ शु. य. अ. ९ क. २६ ॥**

**पदपाठः-** सोमम् । राजानम् । अवसे । अग्गिनम् । अन्वारंभामहऽइत्यनु आरंभामहे ॥ आदित्यान् । व्विष्णुम्। सूर्य्यम् । ब्रह्ममाणम् । च । बृहस्पतिम् । स्वाहा ॥२५॥

**सरलार्थः-** रक्षणार्थं तर्पणाय वा सोमं राजानम् अग्निम् आदित्यान् द्वादश विष्णुं सूर्यं ब्रह्माणम् बृहस्पतिं च अन्वारभामहे। सुहुतमस्तु ॥

**मन्त्रः-** **व्वाजस्य नु प्प्रसवऽआबंभूवेमा च व्विश्श्वा भुवंनानि सर्व्वतः ।**

**सनेमि राजा परियाति व्विद्वान्प्रजाम्पुष्टिंव्वर्द्धयमानेऽअस्म्मे स्वाहा ॥२६॥॥ शु. य. अ. ९ क. २५॥**

**पदपाठः-** व्वाजस्य । नु । प्रसवऽइतिप्र सवः । आ । वभूव । इमा । च । व्विश्श्वा । भुवंनानि । सर्व्वतः। सनेमि । राजा । परि । याति । व्विद्द्वान् । प्रजामितिप्र जाम् । पुष्टिम् । व्वर्द्धयमानः । अस्म्मेऽइत्यस्म्मे। स्वाहा ॥२४॥

**सरलार्थः-** वाजस्य प्रसवः प्रजापतिः इमानि विश्वानि सर्वाणि भुवनानि सर्वतः अवस्थितानि हरिण्यगर्भादिस्तम्ब-पर्यन्तानि संभावितवान् । चिरंतनो राजा दीप्तः सन् सर्वतः स्वेच्छया गच्छति । तथा अस्मासु पुत्रादिसन्ततिं धनपोषं च वर्धयमानः सुहुतमस्तु ॥

**मन्त्रः-** **व्वाजस्येमम्प्रसवः सुषुवेग्ग्रे सोमꣳ राजानमोषधीष्व्वप्प्सु ।**

**ताऽअस्मभ्यम्मधुमतीर्ब्भवन्तु व्वयꣳ राष्ट्रे जागृयाम पुरोहिताः स्वाहा ॥२३॥ ॥ शु. य. अ. ९ मं. २३॥**

**पदपाठः** वाजस्य । इमम् । प्रसवऽइतिप्र सवः । सुषुवे । सुसुवऽइतिसुसुवे । अग्रे । सोमम् । राजानम् । ओषधीषु । अप्स्वित्यप् सु ॥ ताः । अस्मभ्यम् । मधुमतीरितिमधु मतीः । भवन्तु । व्वयम् । राष्ट्रे । जागृयाम । पुरोहिताऽइतिपुरः हिताः । स्वाहा ॥२२॥

**सरलार्थः-** प्रसूतेऽसौ प्रसवः पचादित्वादच् वाजस्यान्नस्य प्रसव उत्पादकः प्रजापतिः अग्रे सृष्टयादौ ओषधीषु अप्सु च वर्तमानमिमं सोमं वल्लीरूपं राजानं दीप्तिमन्तं पदार्थं सुषुवे उत्पादयामास । वयं च ताभिरभिषिक्ता राष्ट्रे स्वकीये देशे जागृयाम अप्रमत्ताभवामः। पुरोहिताः यागानुष्ठानादौ पुरोगामिनः प्रधानाः सुहुतमस्तु ॥

## शब्दार्थाः

**अन्वारभामहे** - आह्वानं कुर्महे, **स्वाहा** - सुहुतमस्तु, **वाजस्य** - अन्नस्य, **जागृयाम** - अप्रमत्ताः स्याम, **पुरोहिताः** - पुरोगामिनः **असपत्नम्** - सपत्नरहितम्, **सुवध्वम्** - प्रेरयध्वम्, **रुचम्** - दीप्तिम्, **धेहि** - आरोपय, **कृधि** - कुरु, **शूरः** - पराक्रमी, **राजन्य** - क्षत्रियः, **ब्रह्मवर्चसी** - यज्ञाध्ययनशीलो ब्राह्मणः, **दोग्ध्री** - दुग्धपूरयित्री धेनुः ॥

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) अस्मिन् राष्ट्रे ब्राह्मणः कीदृशः अजायताम् ?

(क) तेजोयुक्तः (ख) तेजोरहितः (ग) शूद्रः (घ) ब्रह्मवर्चसी

(२) अस्मिन् देशे क्षत्रियः कीदृशः उत्पद्यताम् ?

(क) पराक्रमी (ख) वीरः (ग) मूर्खः (घ) एतेषु किमपि न

(३) अस्मिन् राष्ट्रे धेनुः कीदृशी उत्पद्यताम् ?

(क) दुग्धविहीना (ख) दुग्धपूरयित्री (ग) दुग्धसहिता (घ) दुग्धरहिता

(४) अस्मिन् देशे वृषभः कीदृशः उत्पद्यताम् ?

(क) वहनशीलः (ख) स्थूलः (ग) कृशः (घ) बलवान्

(५) ''वाजः'' इतिशब्दस्य कोऽर्थः ?

(क) दुग्धम् (ख) पयः (ग) अन्नम् (घ) आज्यम्

(६) ''योगः'' इति पदस्य कः अर्थः ?

(क) अलब्धलाभः (ख) लब्धस्य परिपालनम्

(ग) ज्ञानम् (घ) यजमानः

(७) ''क्षेमः'' इत्यस्य कः अर्थः ?

(क) ज्ञानम् (ख) शान्तिः (ग) लब्धस्य परिपालनम् (घ) क्षमा

(८) ''इमन्देवाऽअसपत्नम्'' इति कण्डिका कस्मिन् अध्याये वर्तते ?

(क) नवमे (ख) द्वादशे (ग) पञ्चदशे (घ) विंशे

(९) ''रुचन्नो धेहि'' इति कण्डिका कस्मिन्नध्याये विद्यते ?

(क) पञ्चदशे (ख) विंशतितमे (ग) चत्वारिंशत्तमे (घ) अष्टादशे

(१०) अन्नस्य उत्पादकः कः अस्ति ?

(क) विष्णुः (ख) इन्द्रः (ग) शिवः (घ) प्रजापतिः

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) ''वाजस्येमम्प्रसवः'' इयं कण्डिका कस्मिन्नध्याये विद्यते ?

(२) ''आब्रह्मन्ब्राह्मणः'' इयं कण्डिका कस्मिन्नध्याये वर्तते ?

(३) वल्लीरूपं कः अस्ति ?

(४) ''क्षेमः'' इति पदस्य कोऽर्थः ?

(५) अस्मिन् देशे ''अश्वः'' कीदृशः जायताम् ?

(६) वीरः पुत्रः कस्य जायताम् ?

(७) रथे स्थितः युयुत्सुः नरः कीदृशः जायताम् ?

(८) यजमानस्य पुत्रः कीदृशः जायताम् ?

(९) अस्मिन् देशे ''ब्रह्मवर्चसी'' कः उत्पद्यताम् ?

(१०) ''राष्ट्र'' इति शब्देऽस्मिन् कः धातुः ?

३. **निम्नलिखित मन्त्राणां भावार्थः लिखन्तु ।**

(१) सोमꣳ राजा॑नमव॑सेग्निमन्वार॑भामहे । आदित्त्याव्विष्णुꣳ सूर्य्यम्ब्रह्ममाणञ्चबृहस्पतिꣳ स्वाहा॑ ॥

(२) व्वाज॑स्येमम्प्र॑सव सुषुवेग्ग्रेसोम राजा॑नमोष॑धीष्व्वप्सु । ताऽअस्म्मभ्य्यम्मधु॑मतीर्भवन्तुव्वयꣳ राष्ट्रे जा॑गृयाम पुरोहि॑ताꣳ स्वाहा॑ ॥

(३) रुच॑न्नोधेहिब्ब्राह्मणेषुरुचꣳ राज॑सुनस्कृधि । रुच॑व्विश्श्ये॑षु शूद्रेषु मयि॑ धेहिरुचारुच॑म्॥

४. **अधोलिखितानां कण्डिकानां पूर्तिः विधेया ।**

(१) आब्रह्मन्

(२) इमन्देवाः ।

(३) व्वृष्णऽऊर्म्मि ।

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | | | |
|---|---|---|---|
| (१) | सोमम् | (६) | अस्मभ्यम् |
| (२) | देशे | (७) | ताभि: |
| (३) | वयम् | (८) | अस्मिन् |
| (४) | ओषधीषु | (९) | धेनु: |
| (५) | अन्नस्य | (१०) | ब्राह्मण: |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

| | | | |
|---|---|---|---|
| (१) | भवाम: | (६) | जुहोति |
| (२) | उत्पादयामास | (७) | जागृयाम |
| (३) | भवन्तु | (८) | सिद्ध्यति |
| (४) | जायताम् | (९) | लभ्यते |
| (५) | उत्पद्यताम् | (१०) | धेहि |

**७. सन्धिविच्छेदनं कुरुत ।**

| | | | |
|---|---|---|---|
| (१) | आब्रह्मन् | (६) | इमन्देवा: |
| (२) | ब्राह्मणञ्च | (७) | ऊर्म्मिरसि |
| (३) | अवसेग्निम् | (८) | रुचन्न |
| (४) | वाजस्येमम् | (९) | क्षत्रङ्क्षत्रियाय |
| (५) | वृष्णऽऊर्म्मि: | (१०) | अपाङ्गर्भ: |

**८. सन्धिसंयोजनं कुरुत ।**

| | | | |
|---|---|---|---|
| (१) | आदित्यान् + विष्णुम् | (६) | वृषसेन: + असि |
| (२) | ता: + अस्मभ्यम् | (७) | स्वाहा + अपाम् |
| (३) | राजानम् + ओषधीषु | (८) | ओषधीषु + अप्सु |
| (४) | एष: + व: | (९) | इषव्य: + अतिव्याधी |
| (५) | इन्द्रस्य + इन्द्रियाय | (१०) | जायताम् + आ |

**छात्र-प्रवृत्ति:**

- सर्वेषां मन्त्राणां सस्वरं सामूहिकं गानं कुर्वन्तु ॥

**विशिष्टज्ञानम्**

- तन्मे मन: शिवसङ्कल्पमस्तु ॥

| २० | अग्निसूक्तम् ( ऋग्वेदीयम् ) |
|---|---|

**प्रस्तावना**

जगतः सर्वप्रथमः ग्रन्थः ऋग्वेदः अस्ति । ऋग्वेदेन सर्वेषां वेदानां प्रादुर्भावः जातः । ऋग्वेदः अस्माकं देशस्य संस्कृतिः तथा ऋषीणाम् संशोधन-स्थिरतां द्योतयति । ऋग्वेदे आहत्य अष्टाविंशत्यधिक सहस्राणि (१०२८) सूक्तानि सन्ति। दशसहस्र-पञ्चशतान्येकोन-नवनिश्च (१०५८९) मन्त्राः सन्ति । एते मन्त्राः (ऋचः) देवतायाः स्तुतेरुपरि ग्रथिताः सन्ति। सूक्तेषु इन्द्रादिनां त्रयस्त्रिंशद् (३३) देवतानां स्तुतिर्दरीदृश्यते तासु देवतासु अग्निदेवता अन्यतमः वेदे प्रथमस्थानीय श्वनीयश्च वरीवर्ति ।

सायणभाष्ये तथा सूत्रकारेण भरद्वाजेन ऋषिणा अपि कथितम् अस्ति यत् ''शोकात् मुक्तिः प्राप्त्यर्थम् अग्निसूक्तस्य पाठं कुर्वन्तु'' इति ।

यजुर्वेदेऽपि सप्तविंशतितमे अध्याये अग्निसूक्तम् वर्तते । प्रस्तुतपाठोऽयम् ऋग्वेदस्य आदिमं सूक्तम् अस्ति । अस्य सूक्तस्य ऋषिः मधुच्छन्दा-वैश्वामित्रः, देवता अग्निः तथा छन्दः गायत्री वर्तते । अस्मिन् सूक्ते अग्निशब्देन परमार्थस्य व्यवहार विद्यायाश्च सिद्धये परमेश्वरभौतिकौ द्वौ अर्थौ (द्वावर्थौ) गृह्येते ।



**मन्त्रः-** **अ॒ग्निमी॑ळेपु॒रोहि॑तंय॒ज्ञस्य॑दे॒वमृ॒त्विज॑म् । होता॑रंरत्न॒धात॑मम् ॥१॥**

**पदपाठः-** अ॒ग्निम् । ई॒ळे॒ । पु॒रःऽहि॑तम् । य॒ज्ञस्य॑ । दे॒वम् । ऋ॒त्विज॑म् । होता॑रम् । र॒त्न॒ऽधात॑मम् ॥१॥

**सरलार्थः-** अहं यज्ञस्य देवं, ऋत्विजं, पुरोहितं, होतारं, रत्नानां श्रेष्ठदातारम् अग्निं स्तोमि ।

**मन्त्रः-** **अ॒ग्निःपूर्वे॑भि॒र्ऋषि॑भि॒रीड्यो॒नूत॑नैरु॒त । सदे॒वाँएहव॑क्षति ॥२ ॥**

**पदपाठः-** अ॒ग्निः । पूर्वे॑भिः । ऋषि॑ऽभिः । ईड्यः॑ । नूत॑नैः । उ॒त । सः । दे॒वान् । आ । इ॒ह । व॒क्ष॒ति॒ ॥२॥

**सरलार्थः-** प्राचीनैः नूतनैः च ऋषिभिः एषः अग्निः स्तुत्यः अस्ति । सः (अग्निः अन्यान्) देवान् अत्र (यज्ञशालायाम्) आवहतु [आनयतु]

**मन्त्रः-** **अ॒ग्निना॑र॒यिम॑श्नव॒त्पोष॑मे॒वदि॒वेदि॑वे । य॒शसं॑वी॒रव॑त्तमम् ॥३॥**

**पदपाठः-** अ॒ग्निना॑ । र॒यिम् । अ॒श्न॒व॒त् । पोष॑म् । ए॒व । दि॒वेऽदि॑वे । य॒शस॑म् । वी॒रव॑त्ऽतमम् ॥३॥

**सरलार्थः-** सः यजमानः अग्निना प्रतिदिनं वर्धमानमेव, (न तु कदाचिदपि क्षीयमाणम्) यशोयुक्तम् - अतिशयेन पुत्रभृत्यादिवीरपुरुषोपेतं धनं प्राप्नोतु ।

**मन्त्रः-** **अग्ने॒यंय॒ज्ञम॑ध्व॒रंवि॒श्वतः॑परि॒भूरसि॑ । सइद्दे॒वेषु॑गच्छति ॥४॥**

**पदपाठः-** अग्ने॑ । यम् । य॒ज्ञम् । अ॒ध्व॒रम् । वि॒श्वतः॑ । प॒रि॒ऽभूः । असि॑ । सः । इत् । दे॒वेषु॑ । ग॒च्छ॒ति॒ ॥४॥

**सरलार्थः-** हे अग्ने ! त्वं (भवान्) यं यज्ञम् अध्वरं च सर्वासु दिक्षु परितः प्राप्तवान् असि, स एव यज्ञो देवेषु तृप्तिं प्रणेतुं स्वर्गे गच्छति ।

**मन्त्रः-** **अ॒ग्निर्होता॑क॒विक्र॑तुःस॒त्यश्चि॒त्रश्र॑वस्तमः । दे॒वोदे॒वेभि॒राग॑मत् ॥५॥**

**पदपाठः-** अ॒ग्निः । होता॑ । क॒विऽक्र॑तुः । स॒त्यः । चि॒त्रश्र॑वःऽतमः । दे॒वः । दे॒वेभिः॑ । आ । ग॒म॒त् ॥५॥

**सरलार्थः-** होमनिष्पादकः, कान्तवचनेन युक्तः (कवेः ज्ञानेन युक्तः), अनृतरहितः वैविध्ययुक्तः, अतीव कीर्तिमान् अग्निदेवः (अन्यैः) देवैः सह अत्र आगच्छतु ।

**मन्त्रः-** **यद॒ङ्गदा॒शुषे॒त्वमग्ने॑भ॒द्रंक॑रि॒ष्यसि॑ । तवेत्तत्स॒त्यम॑ङ्गिरः ॥६॥**

**पदपाठः** यत् । अ॒ङ्ग । दा॒शुषे॑ । त्वम् । अग्ने॑ । भ॒द्रम् । क॒रि॒ष्यसि॑ । तव॑ । इत् । तत् । सत्यम् । अङ्गिरः ॥६॥

**सरलार्थः-** भोः अग्ने ! भवान् हविर्दत्तवते यजमानाय वित्तगृहप्रजापशुरूपं कल्याणं करिष्यसि । हे अङ्गिरः भवतः एव सत्यम् अस्ति ।

**मन्त्रः-** **उप॑त्वाग्नेदि॒वेदि॑वे॒दोषा॑वस्तर्धि॒यावयम् । नमो॒भर॑न्त॒एम॑सि ॥७॥**

**पदपाठः-** उप॑ । त्वा॒ । अ॒ग्ने॒ । दि॒वेऽदि॑वे । दोषा॑ऽवस्तः । धि॒या । व॒यम् । नमः॑ । भर॑न्तः । आ । इ॒म॒सि॒ ॥७॥

**सरलार्थः-** हे रात्रेः प्रकाशक ! हे अग्ने ! वयम् अनुष्ठातारः प्रतिदिनं प्रार्थनया नमस्कारं कुर्वन्तः भवतः समीपम् आगच्छामः ।

**मन्त्रः-** **राज॑न्तमध्व॒राणां॑गो॒पामृ॒तस्य॒दीदि॑विम् । वर्ध॑मानं॒स्वेदमे॑ ॥८॥**

**पदपाठः-** राज॑न्तम् । अ॒ध्व॒राणा॑म् । गो॒पाम् । ऋ॒तस्य॑ । दीदि॑विम् । वर्ध॑मानम् । स्वे । दमे॑ ॥८॥

**सरलार्थः-** दीप्यमानम्, अध्वराणां (हिंसा रहितानां यज्ञानाम्), रक्षकस्य, सत्यस्य प्रकाशकस्य एवं स्वगृहे यज्ञशालायां हविर्भिः वर्धमानस्य अग्नेः समीपं वयं गच्छामः ।

**मन्त्रः-** **सनः पितेवसूनवेग्नेसूपायनोभव । सचस्वानःस्वस्तये ॥९॥**

**पदपाठः-** सः । नः । पितोऽइव । सूनवे । अग्ने । सुऽउपायनः । भव । सचस्व । नः । स्वस्तये ॥९॥

**सरलार्थः-** यथा पिता पुत्रस्य तथा हे अग्ने ! भवान् अपि अस्माकं सुगमः भवतु । अस्माकं कल्याणाय भवतः सामीप्यं भवतु ।

## शब्दार्थः

**अग्निम्** - भौतिकं वह्निम्, **यज्ञस्य** - परोपकारयुक्तकर्मणः, **देवम्** - दानादिगुणयुक्तम्, **ऋत्विजम्** - ऋतौ काले याजयति इति ऋत्विक् तम्, **रत्नधातमम्** - यागफलरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषायितारं वा, **उत** - अपि च, **इह** - अस्मिन् संसारे, **रियम्** - विद्यासुवार्णाद्युत्तमं धनम्, **अश्वत्** - प्राप्नोति 'अश्' लेटलकार त्री.पु.ए.व., **यशसम्** - कीतिवर्धकम्, **पोषम्** - वर्धमानम्, **अध्वरम्** - हिंसारहितम्, **विश्वतः** - सर्वतः, **स इत्** - स एव, **गच्छति** - प्राप्नोति, **होता** - देवानामाह्वाता, **कविक्रतुः** - क्रान्तप्रज्ञः, **सत्यः** - ऋतम्, **दाशुषे** - सर्वस्वं दत्तवते, **भद्रम्** - कल्याणम्, **अङ्गिरः** - हे परमेश्वर ! हे अग्ने !, **दोषावस्तः** - अहर्निशम्, **राजन्तम्** - दीव्यन्तम्, **अध्वराणाम्** - हिंसारहितानाम् यज्ञानाम्, **गोपाम्** - रक्षकम्, **ऋतस्य** - सत्यस्य, **दीदिविम्** - पौनःपुन्येन द्योतकम्, **स्वंदमे** - स्वकीये परमानन्दे पदे, **नः** - अस्माकम्, **स्वस्तये** - कल्याणाय, **सूनवे** - पुत्राय, **सूयायनः** - शोभनप्राप्तियुक्तः, **सचस्व** - सामीप्यं भ्वा । सच लोट्लकार म. पु.ए.व.

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्त्वा उत्तरं ददतु ।**

(१) जगतः सर्वप्रथमः ग्रन्थः कः अस्ति ?

(क) रामायणः (ख) ऋग्वेदः (ग) यजुर्वेदः (घ) सामवेदः

(२) ऋग्वेदे कति सूक्तानि सन्ति ?

(क) १०२८ (ख) ११२८ (ग) १०५८ (घ) १०८२

(३) अग्नि सूक्तस्य ऋषेः नाम किम् ?

(क) विश्वामित्रः (ख) वशिष्ठः (ग) अग्निः (घ) मधुच्छन्दावैश्वामित्रः

(४) ऋग्वेदे इन्द्रादीनां देवतानां किम् दरीदृश्यते ?

(क) स्थानम् (ख) वाहनम् (ग) स्तुतिः (घ) कथा

(५) अहं किं-नामकं देवं स्तौमि ?

(क) इन्द्रम् (ख) अग्निम् (ग) पुरोहितम् (घ) ऋत्विजम्

(६) अयम् अग्निः कैः ईडयः ?

(क) दैवेः (ख) अस्माभिः (ग) ऋषिभिः (घ) युष्माभिः

(७) यजमानः कीदृशम् धनम् प्राप्नोति ?

(क) मयिं (ख) रयिं (ग) अग्निं (घ) दिवं

(८) 'कविः' शब्दस्य कोऽर्थः ?

(क) कान्तवचनः (ख) मेधाविनः (ग) विद्यासः (घ) क्रतुः

(९) अध्वरम् शब्दस्य समानार्थी शब्दः कः ?

(क) कल्याणम् (ख) अहर्निशम् (ग) रक्षकम् (घ) हिंसारहितम्

(१०) अग्निः अस्माकं कल्याणाय कीदृशो भवति ?

(क) प्राप्तियुक्तः (ख) सुलभः (ग) समवेतः (घ) समानः

२. **निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) अहं कीदृशम् अग्निम् इळे ?

(२) अग्निः कस्मै कल्याणं करिष्यति ?

(३) अग्निः कैः सह आगच्छतु ?

(४) 'रात्रेःप्रकाशकः' कः अस्ति ?

(५) यजमानोऽग्निना कीदृशं धनं प्राप्नोतु ?

(६) दीप्यमानम् कस्य विशेषणम् अस्ति ?

(७) 'कविक्रतुः' अर्थात् किम् ?

(८) पुत्राय कः सुलभो भवति ?

(९) अग्निः देवान् कुत्र आनयतु ?

(१०) अग्निः कैः स्तुत्यः अस्ति ?

३. **निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) यद॒ङ्ग दा॒शुषे॒ त्वमग्ने॑ भ॒द्रं क॑रि॒ष्यसि॑ । तवेत्तत्स॒त्यम॑ङ्गिरः ॥

(२) अ॒ग्निना॑ र॒यिम॑श्नवत् पोष॑मे॒व दि॒वेदि॑वे । य॒शस॑ वी॒रव॑त्तमम् ॥

(३) उप॑त्वाग्ने दि॒वेदि॑वे॒ दोषा॑वस्तर्धि॒या व॒यम् । नमो॒ भर॑न्त एम॑सि ॥

४. **निम्नलिखित मन्त्राणां पूर्तिः विधेया ।**

(१) अग्नि मीळे ....................... रत्नधातमम् ॥

(२) स नः पितेव ...................... स्वस्तये ॥

(३) अग्निर्होता ....................... गमत् ॥

५. **अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

| | |
|---|---|
| (१) वयम् | (६) अयम् |
| (२) देवान् | (७) ऋषिभिः |
| (३) अग्निना | (८) यज्ञस्य |
| (४) नः | (९) अग्ने |
| (५) देवेभिः | (१०) स्वस्तये |

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) करिष्यसि

(२) उवक्षति

(३) भव

(४) अश्वनत्

(५) सचस्व

(६) असि

(७) गच्छति

(८) सन्ति

(९) आवक्षति

(१०) प्राप्नुमः

**७. सन्धिविच्छेदनं कुरुत ।**

(१) अग्निर्होता

(२) ऋषिभिरीडयः

(३) अथाग्निता

(४) स्थानीयश्च

(५) रयिमश्ववत्

(६) पितेव

(७) सूपायनो भव

(८) यजुर्वेदेऽपि

(९) त्वमग्ने

(१०) परमानन्दे

**८. सन्धिसंयोजनं कुरुत ।**

(१) नूतनैः + उत

(२) दैवम् + ऋत्विजम्

(३) सः + इत + देवेषु

(४) कीदृशः + अग्निः

(५) सत्यः + चित्रश्रवः

(६) यशः + उकतम्

(७) स्तुत्यः + अग्निः

(८) यत् + अङ्ग

(९) नमः + भरन्तः

(१०) विसंवादः + अस्ति

**छात्र-प्रवृत्तिः**

- अग्नेः महत्त्वं ज्ञात्वा प्रतिदिनं अग्निहोत्रं कुर्वन्तु ।

**विशिष्टज्ञानम्**

- विद्ययामृतमश्नुते ।

●

# २१ पवमानसूक्तम् ( सामवेदीयम् )

**प्रस्तावना**

चतुर्वेदेषु सामवेदस्य महत्त्वम् अस्ति । सामवेदः गानप्रधान-वेदोऽस्ति । सामवेदस्योपवेदः गान्धर्ववेदो विद्यते । ''सहस्रवर्त्मा साम'' अर्थात् प्राग् सामवेदस्य सहस्रपरिमिताः शाखाः आसन् । श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन उक्तं यत् ''वेदानां सामवेदोऽस्मि'' भगवतः श्रीकृष्णस्य स्वरूपभूतोऽयं सामवेदः अस्ति ।

प्रस्तुतपाठे सामवेदस्याति-प्रसिद्धपवमानसूक्तम् प्रदत्तमस्ति, सूक्ते भगवतः सोम परमात्मनः विस्तृत वर्णनं कृतमस्ति। अमृततुल्यो भगवान् परमात्मा सोमः कथं साधकानां कल्याणं करोति, कथं मोक्षपथे नयति तस्य विस्तृतवर्णनं कृतमस्ति। परमात्मा सोमः अस्मिन् जगति व्याप्तोऽस्ति, विविधोदाहरणेन कथं सोऽयं परमात्मा साधकानां कल्याणं करोति । एतद् सर्वं विशदं वर्णितमस्ति ।

प्रस्तुतसूक्तं पवमानसूक्तं सामवेदाद् उद्धृतम् अस्ति । पञ्चमोऽध्यायः पवनमानपर्व वा काण्डः कथ्यते । सूक्तमिदं दीर्घम् अस्ति, अत्र प्रथमतः विंशति-मन्त्राः संगृहीताः सन्ति । प्रदत्ताश्च सन्ति ।



**मन्त्रः-** **उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे । उग्रं शर्म महि श्रवः ॥ १ ॥**

**पदपाठः-** उच्चा – उत् – वा – ते – जातम् – अन्धसः । दिवि – सत् भूमि – आ – ददे ॥ उग्रम् – शर्म – महि – श्रवः ॥१॥

**सरलार्थः-** उपासनीयपवमानसोमः अर्थात् आनन्दधारायाम् अस्माकं मनसि आगतशान्तपरमात्मनः स्वरूपं श्रेष्ठमस्ति । परमात्मानंतत् स्वरूपं अमृतमयमोक्षधाम्नी वयं गत्वा प्राप्तं कुर्मः । तदेव प्रशंसनीयकार्यं श्रेष्ठकार्यम् अस्ति ।

**मन्त्रः-** **स्वादिष्ठया मदिष्ठया पवस्व सोम धारया । इन्द्राय पातवे सुतः ॥२॥**

**पदपाठः-** स्वादिष्ठया – मदिष्ठया । पवस्व – सोम – धारया ॥ इन्द्राय – पातवे – सुतः ॥ २ ॥

**सरलार्थः-** हे सोमस्वरूपशांत-परमात्मन् ! निश्चितरूपेण त्वं ध्यानमाध्यमेन अत्यन्तस्वादयुक्ता, हर्षयुक्ता, या धारणा तया धारणया प्राप्तं भवसि । अर्थात् परमात्मनः स्वरूपं स्वादयुक्तं, हर्षयुक्तं, ध्यानमाध्यमेन धारणया च प्राप्तं भवति ।

**मन्त्रः-** **वृषा पवस्व धारया मरुत्वते च मत्सरः । विश्वादधान ओजसा ॥३॥**

**पदपाठः-** वृषा – पवस्व – धारया । मरुत्वते – च – मत्सरः ॥ विश्वा – दधानः – ओजसा ॥३॥

**सरलार्थः-** आनन्दस्य हर्षस्य च वृष्टिकर्तुः परमात्मनः स्वरूपं शान्तं, तेजस्वी च वर्तते । ये उपासकाः सन्ति । तेषां मनसि आगच्छति । उपासकानाम् मनसि आगत्य स्वकीयानन्दस्य प्राप्तिं कारयति परमात्मनः स्वरूपम्।

**मन्त्रः-** **यस्ते मन्दो वरेण्यस्तेना पवस्वान्धसा । देवावीरघशंसहा ॥८॥**

**पदपाठः-** यः – ते – मदः – वरेण्यः । तेन – पवस्व – अन्धसा ॥ देवावी – देव – अवीः – अधर्शंसहा – अघर्शंस – हा ॥८॥

**सरलार्थः-** हे सोम शान्तस्वरूपपरमात्मन् ! तव हर्षोल्लासानन्ददायकवरणीयस्वरूपमस्ति । धारणयोग्यं तव स्वरूपं यत् विद्यते तत् स्वरूपं वरणयोग्यं, दिव्यगुणरक्षकं, देवधर्मवर्धकमस्ति । पापीविचाराणां नाशकं तव स्वरूपमस्ति। तादृशं तव स्वरूपं वयं ध्यायामः ।

**मन्त्रः-** **तिस्रो वाच उदीरते गावो मिमन्ति धेनवः । हरिरेति कनिक्रदत् ॥५॥**

**पदपाठः-** तिस्रः – वाचः – उत् – ईरते । गावः – मिमन्ति – धेनवः ॥ हरिः – एति – कनिक्रदत्॥५॥

**सरलार्थः-** ये तव उपासकाः सन्ति, ते उपासकाः ''ॐ'' अर्थात् अ, उ, म ''ओम्'' वाणीत्रयं वदन्ति । सा वाणी गौः यथा अमृतमयं दुग्धं यच्छति, तथैव सा वाणी उपासकेभ्यः अमृततुल्या ध्वनिरूपा च प्राप्ता भवति । सः ध्वनिः शान्तपरमात्मनः स्वरूपमस्ति । उपासकेभ्यः अमृतमयानन्ददाता सा वाणी विद्यते ।

१ २ २१ २३ १२ ३ १२ ३ २ ३ १ २ २ १ २
**मन्त्रः-** **इन्द्रायेन्दो मरुत्वते पवस्व मधुमत्तमः । अर्कस्य योनिमासदत् ॥६॥**

१ २० ३ १ २ १२० १२० ३ १ २ १२० ३ १ २ ३
**पदपाठः-** इन्द्राय – इन्दो – मरुत्वते । पवस्व – मधुमत्तमः ॥ अर्क्कस्य – योनिम् आसाम् – आ –
१२०
सदम् ॥६॥

**सरलार्थः-** अतिमधुरम् आर्द्रम्, परमात्मनः स्वरूपम् अस्ति । हे परमात्मन् । त्वम् आत्मधारणरूपप्राणस्य आनन्दधारायाम् प्राप्तो भवसि । गृहे स्थिता सर्वे जनाः पूजाऽर्चनया तव स्तुतिं कुर्वन्ति । परमात्मनः स्वरूपम् अनन्तम् एवं जीवात्मनः स्वरूपम् एकमेवाऽस्ति । किन्तु परमात्मा सर्वेषां जीवानाम् अन्तःकरणे स्थित्वा देहधारीणाम् कृते प्राप्तोऽस्ति । अतः तव स्तवनं वयं कुर्मः । पूर्वम् अस्माकं स्तवनं स्वीकुरु ।

१ २ ३ १ २र ३ १ ३ २ ३ २र ३ १ २
**मन्त्रः-** **असाव्यंशुर्मदायाप्सु दक्षा गिरिष्ठाः । श्येनो न योनिमासदत् ॥७॥**

१ २० ३ २ १ २० ३ २ १ २० ३ २ ३ २ ३ २ १ २०
**पदपाठः-** असावि – अंशुः – मदाय । अप्सु – दक्षः – गिरिष्ठाः – गिरि–स्थाः । श्येनः – न – योनिम् – आ – असदत् ॥७॥

**सरलार्थः-** अध्यात्मयाजिनः ये जीवाः सन्ति, तेषां कृते सोमः (परमात्मा) कल्याणकर्ताऽस्ति । सामगानेन साक्षात् हृदये परमात्मा प्रकटितो भवति । यथा प्रशंसनीयगतियुक्तः अश्वः स्वगृहं भ्रमणं कृत्वा आगच्छति, तथैव परमात्मा आध्यात्मयाजि–जीवानां हृदये आगच्छति । हे परमात्मन् । त्वंपशंसनीयगतियुक्तः अश्वसदृशो भूत्वा भक्तानां हृदयकमले समागत्य शान्तिप्रदानं कुरु ।

१ २ ३ १ २ ३ १ २ ३१ २ ३१ २ ३ २ ३ १ २
**मन्त्रः-** **पवस्व दक्षसाधनो देवेभ्यः पीतये हरे । मरुद्भ्यो वायवे मन्दः ॥८॥**

१२० ३ १ २ २ १२० ३ १ २ ३ १ २ ३ १ २ ३ १ २ १२०
**पदपाठः-** पवस्व – दक्षसाधनः – दक्षः – साधनः । दवेभ्यः – पीतये – हरे ॥ मरुद्भ्यः वायवे – मदः ॥८॥

**सरलार्थः-** दुःखनाशकः, सुखदाता, सर्वसाधनयुक्त हे परमात्मन् ! त्वम् असि । ये भवतः उपासकाः सन्ति, ते सर्वे जीवन्मुक्तसुखस्य आनन्दधारायां निमग्नाः सन्ति । तेषां जीवन्मुक्तजीवानाम् आनन्दधारायां निमग्नानां कृते हे परमात्मन् ! त्वं सुलभतया प्राप्तः असि ।

१ २ ३ १ २ ३ २ ३ २ ३ १ २ १ २ २ १ २
**मन्त्रः-** **परि स्वानो गिरिष्ठाः पवित्रे सोमो अक्षरत् । मदेषु सर्वधा असि ॥९॥**

१२० ३ २ ३ २ ३ २ ३ १ २ १२० ३ १२० ३ २ ३
**पदपाठः-** परि – स्वानः – गिरिष्ठाः – गिरि–स्थाः । पवित्रे – सोमः – अक्षरत् । मदेषु – सर्वधा – सर्वः
२ ३
– धा – असि ॥९॥

**सरलार्थः-** आध्यात्मिकजीवानां पवित्रान्तःकरणानाम् जनानाम् हृदये हे परमात्मन् ! त्वम् आन्दधारानिर्झररूपोऽसि । त्वं श्रेष्ठ गुणयुक्तोऽसि, अर्चकानाम् त्वं गुणधारकोऽसि । आधाररूपोऽसि ।

१ ३ ३ २ ३ २ ३ १ २र ३क २र ३ २ ३ १ २ ३ १ २
**मन्त्रः-** **परि प्रिया दिविः कविर्वयांसि नप्त्योर्हितः । स्वानैर्याति कविक्रतुः ॥१०॥**

१२० ३ २ ३ २ ३ २ १२० १२० ३ २ ३ २ ३ १ २ ३ २ ३
**पदपाठः-** परि – प्रिया – दिवः – कविः । वयांसि – नप्त्यो – हित्तः ॥ स्वानैः याति – कविक्रतुः कवि क्रतुः ॥१०॥

**सरलार्थः-** हे परमात्मन् । मेधाव्युपासकानां कृते त्वं क्रान्तदर्शितायाः, क्रियाशीलतायाः उत्पादकोऽसि । हे परमात्मन् द्युलोकात् आरभ्य पृथ्वीलोक-पर्यन्तं त्वं । व्यापकोऽसि । अमृतरूपमोक्षप्राप्त्यर्थं त्वं तीव्रगतियुक्तखगवत् साधकेभ्यः उपासकेभ्यः प्राप्तोऽसि ।

**मन्त्रः-** **प्र सोमासो मदच्युतः श्रवसे नो मघोनाम् । सुतो विदथे अक्रमुः ॥११॥**

**पदपाठः-** प्र - सोमासः - मदच्युतः - मद - च्युतः । श्रवसे - नः - मघोनाम् ॥ सुताः विदथे - अक्रमुः ॥११॥

**सरलार्थः-** उपासकेभ्यः, ध्यानकर्तृभ्यः आध्यात्मयज्ञकर्मकर्तृकेभ्यः आनन्द-वर्धकपरमात्मा अस्मभ्यं प्रशंसनीययशतः, प्रसिद्धितः सिद्धितः मुक्तं करोतु । मुक्तिप्रदानं कृत्वा दुर्लभमोक्षस्य प्राप्तिं कारयतु ।

**मन्त्रः-** **प्र सोमासो विपश्चितोऽपो नयन्त उर्मयः । वनानि महिषा इव ॥१२॥**

**पदपाठः-** प्र - सोमासः - विपश्चितः - विपः - चितः । अपः - नयन्ते - उर्भयः । वनानि - महिषाः - इव ॥१२॥

**सरलार्थः-** सर्वज्ञपरमात्मा स्व उपासकान् अमृतधाम्नि नयति । यथा जले पतितवस्तु नदीतरंगद्वारा तटे स्थाप्यते । यथा सूर्यस्याऽग्नि जलसूक्ष्मं बाष्पं कृत्वा उपरिभागे नयति, तथैव उपासकेभ्यः आध्यात्मिक मार्गे परमात्मा उन्नतं करोति ।

**मन्त्रः-** **पवस्वेन्द्रो वृषा सुतः कृधी नो यशशो जने । विश्वा अप द्विषो जहि ॥१३॥**

**पदपाठः-** पवस्व - इन्दो - वृषा - सुतः । कृधि - नः - यशसः जने ॥ विश्वा - अप - द्विषः - जहि ॥१२॥

**सरलार्थः-** हे रसराजपरमात्मन् ! त्वं सुखवर्षको भूत्वा साक्षात् अस्माकं हदयंगमो भव । अस्मान् यशस्विमोक्षमार्गे त्वं नय (अस्माकं हृदये ये कुविचाराः सन्ति) तेषां त्वं नाशको भव । विरोधिविचाराः नाशनीयाः ।

**मन्त्रः-** **वृषा ह्यसि भानुना द्युमन्तं त्वा हवामहे । पवमान स्वदृशम् ॥१४॥**

**पदपाठः-** वृषा - हि - असि - भानुना । द्युमन्तम् - त्वा - हवामहे ॥ पवमान - स्वदृशम् - स्वः - दृशम् ॥१४॥

**सरलार्थः-** हे आनन्दधारायां प्राप्तपरमात्मन् ! त्वं नितान्तसुखस्य वर्षकोऽसि । स्व-तेजसा तेजस्वी सुखप्रदर्शकः हे परमात्मन् । वयं त्वां निमन्त्रितं कुर्मः । आवाहनं कुर्मः । सपरिवारयुक्तः त्वम् आगच्छ तादृशीं प्रार्थनां वयं कुर्मः ।

**मन्त्रः-** **इन्दुः पविष्ट चेतनः प्रियः कवीनां मतिः । सृजदश्वं रथीरिव ॥१५॥**

**पदपाठः-** इन्दुः पविष्टः - चेतनः । प्रियः - कवीनाम् - मतिः ॥ सृजत् - अश्वम् - रथीः - इव ॥१५॥

**सरलार्थः-** सचेतनाः, स्नेहयुक्ताः, मेधाव्युपासकाः ते सर्वे हे परमात्मन् ! तव स्तुतिं कुर्वन्ति । यथा रथस्य स्वामी अश्वान् योग्यमार्गे चालयति, तथैव त्वं हे परमात्मन् ! अस्मान् सर्वान् उपासनामार्गे चालय ।

**मन्त्रः-** **असृक्षत प्र वाजिनो गव्या सोमासो अश्वया । शुक्रासो वीरयाशवः ॥१६॥**

**पदपाठः-** असृक्षत – प्र– वाजिनः । गव्या – सोमासः – अश्वया ॥ शुक्रासः वीरया – आशवः ॥१६॥

**सरलार्थः-** ऋषिभिः, होतृभिः अयं सोमः वेगवान्, बलवान् वर्णितोऽस्ति । यथा गौ, अश्वः, पुत्रस्येच्छां करोति तथैव एते ऋत्विजः स्वगृहे वीरपुत्रस्येच्छां कुर्वन्ति । अत एव सोम बलवान्, वेगवान् वर्णितोऽस्ति ।

**मन्त्रः-** **पवस्व देव आयुषगिन्द्रं गच्छतु ते मदः । वायुमा रोह धर्मणा ॥१७॥**

**पदपाठः-** पवस्व – देवः – आयुषक् – आयु – सकू । इन्द्रम् – गच्छतु – ते – मदः ॥ वायुम् – आ – रोह – धर्मणा ॥१७॥

**सरलार्थः-** हे सोम ! त्वं प्रकाशितो भूत्वा धारापात्रे पूरितो भव । तव आनन्ददायकरसः सर्वेभ्यः प्राप्तो भवतु । विशेषरूपेण इन्द्रस्य वायोः च प्राप्तो भवतु ।

**मन्त्रः-** **पवमानो अजीजनदिवश्चित्रं न तन्यतुम् । ज्योतिर्वैश्वानरं बृहत् ॥१८॥**

**पदपाठः-** पवमानः अजीजनत् / दिवः – चित्रम् – न – तन्यतुम् । ज्योति – वैश्वानरम् – वैश्व – नरम् – बृहत् ॥१८॥

**सरलार्थः-** अनेन पवमानसोमेन स्ववैश्वानरज्योतिर्द्वारा समुत्पादितं तेजः, तत् तेजसा द्युलोके इन्द्रेण स्वकीयं विचित्रं वज्रनामकम् अस्त्रं प्राप्तमस्ति ।

**मन्त्रः-** **परि स्वानास इन्दवो मदाय बर्हणा गिरा । मधो अर्षन्ति धारया ॥१९॥**

**पदपाठः-** पदि – स्वानासः इन्दवः । मदाय – बर्हणा – गिरा । मधो–अर्पन्ति धारया ॥१९॥

**सरलार्थः-** हे सोम ! सामवेदरूपा या वाणी मदयुक्ता स्तुतिरूपा मुखात् निस्सरति, तथैव त्वमपि मदयुक्तो भूत्वा, तेजस्वीभूत्वा, देवतानां कृते मदयुक्तो भूत्वा, निष्यन्दितो भवति ।

**मन्त्रः-** **परि प्रासिष्यदत्कविः सिन्धोरूर्मावधि श्रितः । कारुं बिभ्रत्पुरुस्पृहम् ॥२०॥**

**पदपाठः-** परि – प्र – असिष्यद् – कविः । सिन्धोः – उर्मो अधि – श्रितः ॥ कारुम् – बिभ्रत् – पुरुषस्पृहम् – पुरु – स्पृहम् ॥२०॥

**सरलार्थः-** बुद्धिवर्धकः, सिन्धुतरंगाश्रितः, अनेकेषां स्पृहणीयः, स्तोतृणां धारकः, तादृशः सोमरसः पात्रात् निष्यन्दितो भवति ।

### शब्दार्थः

**अधसः** – रसः, **जातम्** – उत्पन्नम्, **दिवि** – द्युलोके, **स्वादिष्ठया** – स्वादुयुक्तया, **धारया** – तीव्रगत्या, **ओजसा** – तेजसा, **मत्सरः** – मदकरः, **वेरण्यः** – वरणीययोग्यः **पवस्व** – क्षर, **अघशंसहा** – राक्षसानां हन्ता, **कनिक्रदत्** – शब्दकुर्वन् गच्छति कलशम्, **मिमन्ति** – शब्दायन्ति, **इन्द्राय** – इन्द्रार्थम्, **हे इन्दो !** – हे सोम ! **गिरिष्ठाः** – पर्वते जातः, **श्येनः** – खगः, **हे हरे !** – हे हरितवर्णनसोम !, **दक्षसाधनः** – दक्षः बलान्तस्य साधकः, **मदेषु** – मादकेषु, **कविः** – मेधावी, **विदथे** – यज्ञे, **नः** – अस्माकं, **विपश्चितः** – मेधाविनः, **द्विषः** – द्वेष्ट्टन्, शत्रून्, **भानुना** – तेजसा, **द्युमन्तं** – दीप्तिमन्तम्, **हवामहे** – यज्ञेषु आह्वयामहे, **अश्वं** – हयम्, देवानां **प्रियः** – प्रीतिकरः, **वाजिनः** – बलवन्तः, **धर्मणा** – धर्मणाधारकेण रसेन, **मदः** – रसः, **बृहत्** – महत्, **ज्योतिः** – तेजः, **गिरा** – वाचा, **त्वेषा** – दीप्ताः

## स्वाध्यायः

१. **निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) सामवेदः कस्य प्रधानवेदः ?

(क) गानम् (ख) ध्यानम् (ग) दानम् (घ) तपः

(२) सामवेदस्योपवेदः कः अस्ति ?

(क) आयुर्वेदः (ख) शिल्पवेदः (ग) गान्धर्ववेदः (घ) धनुर्वेदः

(३) प्राक् सामवेदस्य कतिविधाः शाखाः आसन्?

(क) सहस्रशाखाः (ख) शतशाखाः (ग) पंचशाखाः (घ) दशशाखाः

(४) वेदानां सामवेदोऽस्मि, भगवता कुत्र उक्तमस्ति ?

(क) भागवते (ख) गीतायाम् (ग) महाभारते (घ) रामायणे

(५) पवमानसूक्ते कस्य वर्णनमस्ति ?

(क) शिवस्य (ख) परमात्मनः सोमस्य (ग) ब्रह्मणः (घ) विष्णोः

(६) परमात्मा सोमः कीदृशोऽस्ति ?

(क) शर्करातुल्यः (ख) द्राक्षतुल्यः (ग) मधुतुल्यः (घ) अमृततुल्यः

(७) साधकेभ्यः मोक्षपथे कः नयति ?

(क) सूर्यः (ख) सोमः (ग) नक्षत्रम् (घ) ज्योतिः

(८) पवमानसूक्तस्य अध्यायः कः ?

(क) पंचमोध्यायः (ख) षष्ठोध्यायः (ग) सप्तयोध्यायः (घ) चतुर्थोऽध्यायः

(९) उपासनीयपवमानसोमस्य स्वरूपं कीदृशमस्ति ?

(क) अधमम् (ख) कनिष्ठम् (ग) श्रेष्ठम् (घ) मध्यमम्

(१०) सोम-परमात्मनः स्वरूपं कीदृशमस्ति ?

(क) कटुयुक्तम् (ख) कषाययुक्तम् (ग) तिक्तयुक्तम् (घ) स्वादयुक्तम्

२ **निम्नाङ्कित प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखन्तु ।**

(१) परमात्मा सोमः अस्मिन् जगति कीदृशोऽस्ति ?

(२) परमात्मा सोमः साधकानां किं करोति ?

(३) चतुर्वेदेषु कस्य वेदस्य महत्वम् अस्ति ?

(४) सामवेदः कस्य भगवतः स्वरूपमस्ति ?

(५) हर्षस्य वृष्टिकर्तुः भवगतः स्वरूपंकीदृशमस्ति ?

(६) गौ दुग्धतुल्या काऽस्ति ?

(७) सामगानेन किं भवति ?

(८) अश्वतुल्यः कः वर्णितोऽस्ति?

(९) परमात्मा कुत्र व्याप्तोऽस्ति ?

(१०) मुक्तिप्रदानं कृत्वा परमात्मा किं यच्छति ?

**३. निम्नलिखित मन्त्राणां भावार्थं लिखन्तु ।**

(१) उच्चा ते जातमन्धसो दिवि सद्भूम्या ददे ।
उग्र शर्म महि श्रवः ॥

(२) स्वादिष्ठया - मदिष्ठया । पवस्व सोम धारया ।
इन्द्राय पातवे सुतः ॥

(३) पदि स्वीनो गिरिष्ठोः पवित्रे सोमो अक्षरत् ।
मदेषु सर्वधा असि ॥

**४. निम्नलिखित-मन्त्राणां पूर्तिः विधेया ।**

(१) वृषा पवस्व धारया ..................... ओजसा ॥

(२) पस्ते मन्दो .......................... रधशंसहो ॥

(३) तिस्रो वाचे ........................ कनिक्रदत् ॥

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) भूम्या
(२) उग्रम्
(५) धारया
(६) इन्द्राय
(७) मरुत्वते
(३) ते
(४) सोमः
(८) ओजसा
(९) नावः
(१०) अर्कस्य

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) ददे
(२) मिमन्ति
(३) असि
(४) अक्षरत्
(५) याति
(६) जहि
(७) अर्षन्ति
(८) गच्छतु
(९) याति
(१०) नयन्ते

**७. सन्धिविच्छेदनं कुरुत ।**

| | | | |
|---|---|---|---|
| (१) | विपश्चितः | (६) | परमात्मनः |
| (२) | मदायाप्सु | (७) | उद्धृतमस्ति |
| (३) | वोनिमासदत् | (८) | पवस्वान्धसा |
| (४) | हरिरेति | (९) | सूक्तमिदं |
| (५) | वेदोपवेदः | (१०) | प्रदत्ताश्च |

**८. सन्धिसंयोजनं कुरुत ।**

| | | | |
|---|---|---|---|
| (१) | सिंधोः + उर्मा | (६) | इन्द्राय + इन्दोः |
| (२) | सृजद् + अश्वः | (७) | हरिः + एति |
| (३) | हि + असि | (८) | दिवः + चित्रम् |
| (४) | स्वः + दृशम् | (९) | वरेण्यः + तेन |
| (५) | योनिम् + आसदत् | (१०) | देव + अवी |

**छात्र-प्रवृत्तिः**

- छात्रैः सामवेदीय-पवमानसूक्तं कठस्थं करणीयम् ।

**विशिष्टज्ञानम्**

- ॐ ३क्रतो स्मर क्लिबेस्मर ।

# २२ पृथ्वीसूक्तम् ( अथर्ववेदीयम् )

**प्रस्तावना**

वेदाः केवलं संस्कृत-साहित्यस्य न, अपि तु विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति । तादृशं प्राचीनार्वाचीनाः सर्वे विद्वांसः स्वीकुर्वन्ति । वेदाः खलु मानवज्ञानस्य विश्वकोषः वर्तते । तत्र किम् इत्यनुसन्धानापेक्षया किं नास्ति इति गवेषणं सुकरं भवति । अत्र वेदान्त-प्रतिपाद्यविषयः सामान्येन कर्म-मीमांसा वर्तते । अर्थात् यज्ञकर्म-सम्पादनार्थम् एव वेदानामाविर्भावः। ज्ञानकर्मोपासनया विषय-भेदात् गद्य-पद्य-गान-रचना-भेदात् वेदत्रयी इति यद्यपि श्रूयते । तथापि ज्ञानकर्मोपासनायाः समिष्टरूपः अपरवेदः अस्ति । ''अथर्ववेदः'' । यतो हि ऋग्वेदादि त्रयो वेदाः आमुष्मिकं फलं ददति । तदा अयम् अथर्ववेदः ऐहिकं फलं प्रयच्छति । अतः अथर्ववेदस्य महत्त्वं सर्वोपरि विद्यते ।

प्रस्तुतोऽयं पाठः अथर्ववेदस्य द्वादशकाण्डस्य प्रथमसूक्तस्य अस्ति । पृथिवी सूक्ते त्रिषष्टिः (६३) मन्त्राः सन्ति। केचन मन्त्राः अत्र पाठेऽस्मिन् संगृहीताः सन्ति ।

---

**मन्त्रः-** **स॒त्यं बृ॒हदृ॒तमु॒ग्रं दी॒क्षा तपो॒ ब्रह्म॑ य॒ज्ञः पृ॑थि॒वीं धा॑रयन्ति ।**

**सा नो॑ भू॒तस्य॒ भव्य॑स्य॒ पत्न्यु॒रुं लो॒कं पृ॑थि॒वी नः॑ कृणोतु ॥ काण्ड-१२ सूक्तः २ मन्त्र. १**

**पदपाठः-** स॒त्यम् । बृ॒हत् । ऋ॒तम् । उ॒ग्रम् । दी॒क्षा । तपः । ब्रह्म॑ । य॒ज्ञः । पृ॒थि॒वीम् । धा॒र॒य॒न्ति । सा । न॒ः । भू॒तस्य । भव्य॑स्य॒ । पत्नी॑ । उ॒रुम् । लो॒कम् । पृ॒थि॒वी । न॒ः । कृ॒णो॒तु॒ ।

**सरलार्थः-** भूत-भविष्य-वर्तमानकालानां जीवानां स्वस्मिन् आश्रयप्रदानेन मातुः सदृशीं रक्षां कारयित्री एषा पृथिवी सत्यं, प्रचण्ड, -ऋत, -दीक्षा, -तपदि, ब्रह्म, मन्त्रः एवं यज्ञानाम् अवलम्बित्तेन एषा पृथिवी स्थिरा अस्ति। अत अत्रपवित्रपृथिव्यां सर्वत्र सत्य धर्म एवं यज्ञानां संस्कृत्याः अवलम्बेन मानवानाम् अंहिसा-व्रतादि आधारेण जीवनयापनं करणीयम् । एतादृशी उदारणासदृशीपृथिवी विशालं संसारलोकमिमम् अस्मभ्यम् योग्यं स्थिरा भवेत् सुन्दरं सुयोग्यं करोतु ।

**मन्त्रः-** **अ॒सं॒बा॒धं ब॑ध्य॒तो मा॑न॒वानां यस्या॑ उ॒द्वतः प्र॒वतः॑ स॒मं ब॒हु ।**

**नाना॑वीर्या॒ ओष॑धी॒र्या बिभ॑र्ति पृथि॒वी नः॑ प्रथतां॒ राध्य॑तां नः ॥ काण्ड-१२ सूक्तः २ मन्त्र. २**

**पदपाठः-** अ॒स॒म् बा॒ध॒म् । बध्यतः । मा॒न॒वाना॑म् । यस्याः॑ । उ॒त् वतः । प्र॒ऽवतः । स॒मम् । ब॒हु । नाना॑ऽवीर्या॒ः । ओष॑धी॒ः । या । बिभ॑र्ति । पृ॒थि॒वी । न॒ः । प्र॒थ॒ता॒म् । राध्य॑ताम् । न॒ः ।

**सरलार्थः-** एषा पृथिवी मानवानां मध्ये बाधाविहाय विद्यते । सा समरूपसमतलरुपवती अस्ति । सा नानाविध पराक्रमशाली औषधियवनस्पतीन्वृक्षान् धारयति । सा पृथिवी अस्मत् कृते विस्तृतां समृद्धिं करोतु इति प्रार्थना।

**मन्त्रः-** **यस्यां॑ समु॒द्र उ॒त सिन्धु॒रापो॒ यस्या॒मन्नं॑ कृ॒ष्टयः॑ संबभू॒वुः ।**

**यस्या॑मि॒दं जिन्व॑ति प्रा॒णदेज॒त् सा नो॒ भूमिः॑ पूर्व॒पेयें॑ दधातु ॥ काण्ड-१२ सूक्तः २ मन्त्र. ३**

**पदपाठः-** यस्या॑म् । स॒मु॒द्रः । उ॒त । सिन्धुः॑ । आ॒पः । यस्या॑म् । अ॒न्नम् । कृ॒ष्टयः॑ । स॒म् ब॒भू॒वुः । यस्या॑म् । इ॒दम् । जिन्व॑ति । प्रा॒णत् । एज॑त् । सा । न॒ः । भूमिः॑ । पू॒र्व॒ऽपेये॑ । द॒धा॒तु॒ ।

**सरलार्थः-** यस्यां पृथिव्यां समुद्रः नद्यः अन्यायि जलसाधानि नानाविधानि विलसन्ति । बहु कालादेव पृथिव्याम् अन्नं बहुविधं कृष्टयः कृषिकर्म तत्पराः मनुष्याः प्रकटी भूताः । यस्यां जननी सम्पूर्णमिदं जगत् प्राणितः सक्रियः भवेत् सुखम् अनुभवति । सा भूमिरस्मान् सर्वान् मानवान् सर्वोत्तमः स्थाने स्थापयेत् ।

**मन्त्रः-** **यस्याश्चतस्रः प्रदिशः पृथिव्या यस्यामन्नं कृष्टयः संबभूवुः ।**

**या बिभर्ति बहुधा प्राणदेजद् सा नो भूमिर्गोष्वप्यन्ने दधातु ॥ काण्ड-१२ सूक्तः २ मन्त्र. ४**

**पदपाठः-** यस्याः । चतस्र । प्रऽदिशः । पृथिव्याः । यस्याम् । अन्नम् । कृष्टयः । सम् बभूवुः । या । बिभर्ति । बहुऽधा । प्राणत् । एजत् । सा । नः । भूमिः । गोषु । अपि । अन्ने । दधातु ।

**सरलार्थः-** यस्याः पृथिव्याः चतस्राः दिशः सन्ति । अर्थात् इयं पृथिवी दिशोपअग्निविष्टा जायते । यस्यां च पृथिव्याम् अन्नं कृषिकार्यम् प्राणिनो बहुकालादेव पृथिव्याम् अन्नानि जायन्ते । कृषिमाध्यमेन मनुष्याः जायन्ते । तथा अस्यां बहुधा विचरन्ति जीवाः एषा पृथिवी विविध प्रकारान् जीवान् ये श्वसन्ति गतीशीलाः दरीदृश्यन्ते । तान् सर्वान् धारयन्ति । सा पृथिवी अस्मान् सर्वान् गोः समूह एवम् अन्ने च प्रतिष्ठापयतु ।

**मन्त्रः-** **यस्यां पूर्वे पूर्वजना विचक्रिरे यस्यां देवा असुरानभ्यवर्तयन् ।**

**गवामश्वानां वयसश्च विष्ठा भगं वर्चः पृथिवी नो दधातु ॥ काण्ड-१२ सूक्तः २ मन्त्र. ५**

**पदपाठः-** यस्याम् । पूर्वे । पूर्वऽजनाः । विचक्रिरे । यस्याम् । देवाः । असुरान् । अभिऽअवर्तयन्। गवाम् । अश्वानाम् । वयसः । च । विऽस्था । भगम् । वर्चः । पृथिवी । नः । दधातु ।

**सरलार्थः-** यस्यां पृथिव्यां पूर्वजनाः विचरणम् अकृतवन्तः । पृथिव्यां देवाः असुरान् अहिंसन् । या इयं पृथिवी गवामश्वानां पक्षिणाम् अन्येषां जीवानां निवास स्थानमस्ति । तादृशी एषा भूमि विशिष्टा सा सर्वविधं सौभाग्यं ब्रह्मवर्चः तेजः अपि ददातु ।

**मन्त्रः-** **विश्वंभरा वसुधानी प्रतिष्ठा हिरण्यवक्षा जगतो निवेशनी ।**

**वैश्वानरं बिभ्रती भूमिरग्निमिन्द्रऋषभा द्रविणे नो दधातु ॥ काण्ड-१२ सूक्तः २ मन्त्र. ६**

**पदपाठः-** विश्वम् ऽभरा । वसु ऽधानी । प्रतिऽस्था । हिरण्यऽवक्षाः । जगतः । निवेशनी । वैश्वानरम् । बिभ्रती। भूमिः । अग्निम् । इन्द्रऽऋषभा । द्रविणे । नः । दधातु ।

**सरलार्थः-** संसारेस्मिन् सर्वेषां जीवानाम् अन्न उत्पादनभरणपोषण-प्रदायिनी धनवती प्रतिष्ठारूपा स्वर्णालङ्कार युक्ता संसारस्य आश्रयदात्री । शक्रसंरक्षिता इयं पृथिवी पार्थिवाग्निं वैश्वानराग्निं सा धारयति एषा पृथिवी अस्मान् सर्वान् द्रविणं धनप्रदानं करोतु ।

**मन्त्रः-** **यां रक्षन्त्यस्वप्ना विश्वदानीं देवा भूमिं पृथिवीमप्रमादम् ।**

**सा नो मधु प्रियं दुहामथो उक्षतु वर्चसा ॥ काण्ड-१२ सूक्तः २ मन्त्र. ७**

**पदपाठः-** याम् । रक्षन्ति । अस्वप्नाः । विश्वदानीम् । देवाः । भूमिम् । पृथिवीम् । अप्रऽमादम् । सा । नः। मधु । प्रियम् । दुहाम् । अथो इति । उक्षतु । वर्चसा ।

**सरलार्थः-** यस्याः विशालविस्तृता भूम्याः सुरक्षा वा रक्षणं प्रमादरहित्ताः जागरण शीलाः देवाः सर्वदा कुर्वन्ति । सा विशालतमा पृथिवी अस्मभ्यं सर्व सुखप्रदा रुचिरं मधु ददती अस्मभ्यं तेजसा सिञ्चतु ।

**मन्त्रः-** **यार्णवेऽधि सलिलमग्र आसीद् यां मायाभिरन्वचरन् मनीषिणः ।**

**यस्या हृदयं परमे व्योमन्त्सत्येनावृतममृतं पृथिव्याः ।**

**सा नो भूमिस्त्विषिं बलं राष्ट्रे दधातूत्तमे ।। काण्ड-१२ सूक्तः २ मन्त्र. ८**

**पदपाठः-** या । अर्णवे । अधि । सलिलम् । अग्रे . आसीत् । याम् । मायाभिः । अनुऽचरन् । मनीषिणः। यस्याः । हृदयम् । परमे । विऽओमन् । सत्येन । आऽवृत्तम् । अमृतम् । पृथिव्याः । सा । नः। भूमिः । त्विषिम् । बलम् । राष्ट्रे । दधातु । उत् ऽतमे ।

**सरलार्थः-** एषा पृथिवी पूर्वं तु समुद्रे जलरूपेण स्थिता आसीत् । तथा च यस्याः पृथिव्याः अनुसरणं मनीषिणो विद्वांसः देवाः कवयो स्वकर्मभिः प्रज्ञया वा कुर्वन्ति । यस्याः पृथिव्याः सत्यावृत्तम् अमृतं हृदयं सर्वोत्तमे व्योम्नि अस्ति । अर्थात् उत्तमलोक एवास्ति । सा पृथिवी अस्मभ्यं देव निर्मिते श्रेष्ठराष्ट्रे बलं तेजः दधातु ।

**मन्त्रः-** **यस्यामापः परिचराः समानीरहोरात्रे अप्रमादं क्षरन्ति ।**

**सा नो भूमिर्भूरिधारा पयो दुहामथो उक्षतु वर्चसा ॥ काण्ड-१२ सूक्तः २ मन्त्र. ९**

**पदपाठः-** यस्याम् । आपः । परिऽचराः । समानीः । अहोरात्रे इति । अप्रऽमादम् । क्षरन्ति । सा । नः । भूमिः । भूरिऽधारा । पयः । दुहाम् । अथो इति । उक्षतु । वर्चसा ।

**सरलार्थः-** यस्यां विस्तृतायां पृथिव्यां प्रतिदिनम् अवतररूपेण इमा सार्वभौमः आपः समानरूपेण सर्वत्रैव जलमार्गेषु, नदीषु, तडागेषु, सर्वत्रैव समानभावेन अप्रमादं प्रवहन्ति । सा बहुजलधारावती भूमिः जलं, पेयं, दुग्धं, तेजसा ओजसा अस्मान् सिञ्चतु ।

**मन्त्रः-** **यामश्विनावमिमातां विष्णुर्यस्यां विचक्रमे ।**

**इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः ।**

**सा नो भूमिर्वि सृजतां माता पुत्राय मे पयः ।। काण्ड-१२ सूक्तः २ मन्त्र. १०**

**पदपाठः-** याम् । अश्विनौ । अमिमाताम् । विष्णुः । यस्याम् । विऽचक्रमे । इन्द्रः । चक्रे । आत्मने । अनमित्राम्। शचीऽपतिः । सा । नः । भूमिः । वि । सृजताम् । माता । पुत्राय । मे । पयः ।

**सरलार्थः-** इमां प्रसिद्धां विस्तृताभूमिम् अश्विनौ एव अमिमाताम् भगवान् विष्णुः अपि विविधरुपेण यस्यां पृथिव्यां भ्रमणं चकार । सम्पूर्णं जगत् यत्र सः विष्णुः आश्रयेण विविधानि कार्याणि अकरोत् । इन्द्रः अपि शत्रुरहितां चकार सा भूमिः अस्मान् अस्मभ्यं माता पयः ददातु ।

**मन्त्रः-** **गिरयस्ते पर्वता हिमवन्तोऽरण्यं ते पृथिवी स्योनमस्तु ।**

**बभ्रुं कृष्णां रोहिणीं विश्वरुपां ध्रुवां भूमिं पृथिवीमिन्द्रगुप्ताम् ।**

**अजीतोऽहतो अक्षतोऽध्यष्ठां पृथिवीमहम् ।। काण्ड-१२ सूक्तः २ मन्त्र. ११**

**पदपाठः-** गिरयः । ते । पर्वताः । हिमऽवन्तः । अरण्यम् । ते । पृथिवी । स्योनम् । अस्तु । बभ्रुम् । कृष्णाम्। रोहिणीम् । विश्वऽरुपाम् । ध्रुवाम् । भूमिम् । पृथिवीम् । इन्द्रऽगुप्ताम् । अजीतः । अहतः अक्षतः। अधि । अस्थाम् । पृथिवीम् । अहम् ।

**सरलार्थः-** हे विस्तृत धरे ! ते गिरयः हिमवन्तो वा विशालपर्वताः अरण्यानि अस्मत् कृते अन्येषां पृथिव्यां निवसताम् जीवानां च कृते सुखकरं भवेत्। अहमपि अजीतः केनचित् जनेनाहतो क्षतश्च बभ्रु कृष्ण रोहिणी रुपाम् विविधरूपवती इन्द्रेण रक्षितम् सा पृथिवी धनवैभव अचलां धराम् अधितिष्ठामि ।

**मन्त्रः-** **यत् ते मध्यं पृथिवी यच्च नभ्यं यास्त ऊर्जस्तन्वः संबभूवुः ।**

**तासु नो धेह्यभि नः पवस्व माता भूमिः पुत्रो अहं पृथिव्याः ।**

**पर्जन्यः पिता स उं नः पिपर्तु ।। काण्ड-१२ सूक्तः २ मन्त्र. १२**

**पदपाठः-** यत् । ते । मध्यम् । पृथिवी । यत् । च । नभ्यम् । याः । ते । ऊर्जः । तन्वः । सम् ऽबभूवुः । तासु । नः । धेहि । अभि । नः । पवस्व । माता । भूमिः । पुत्रः । अहम् । पृथिव्याः । पर्जन्यः । पिता । सः ऊं इति । नः । पिपर्तु ।

**सरलार्थः-** हे मातः ! पृथिवी अस्मान् सर्वान् तव स्तावकान् भक्तान् स्वमध्यभागे स्थापय यत्र तव शक्तिः शास्वती दृश्यते । पृथिव्याः मध्यभागः भारतवर्षम् एवास्ति । यत्र बहवः अवताराः देवानां जाताः । आकाशः पर्जन्यः अस्माकं पितास्ति । अतः अस्मान् सर्वान् पुत्रान् पालयतु पिता अस्माकं निर्मितः लालनञ्चेयं माता पृथिवी करोति पालनं कामना पूरणञ्च पिता पर्जन्यः करोतु । अयं याचना यतो हि पृथिवी मातास्ति । अहं च तस्याः पुत्रोऽस्मि । सा पृथिवी अस्माकं पालनं करोतु मनोरथान् पूर्णान् करोतु ।

**मन्त्रः-** **यस्यां वेदिं परिगृह्णन्ति भूम्यां यस्यां यज्ञं तन्वते विश्वकर्माणः ।**

**यस्यां मीयन्ते स्वरवःपृथिव्यामूर्ध्वाःशुक्रा आहुत्याः पुरस्तात् ।**

**सा नो भूमिर्वर्धयद् वर्धमाना ।। काण्ड-१२ सूक्तः २ मन्त्र. १३**

**पदपाठः-** यस्याम् । वेदिम् । परिऽगृहणन्ति । भूम्याम् । यस्याम् । यज्ञम् । तन्वते । विश्वकर्माणः । यस्याम् । मीयन्ते । स्वरवः । पृथिव्याम् । ऊर्ध्वाः । शुक्राः । आऽहत्याः । पुरस्तात् । सा । नः । भूमिः । वर्धयत् । वर्धमाना ।

**सरलार्थः-** यस्यां विपुलायां पृथिव्यां विद्वांसो वेदिं रचयन्ति । यज्ञः श्रौत-स्मार्त-अयम् अनुतिष्ठति यत्र च पृथिव्यां आहुत्याः पूर्वं पवित्राः दीर्धाः यज्ञ उपकरणभूताः यूपाः निर्मीयते तादृशी विशिष्टा विशालभूता भूमिः अस्मान् सर्वान् भक्तान् अन्नादिप्रदानेन समृद्धान् करोतु वा वर्धयतु ।

**मन्त्रः-** **यो नो द्वेषत् पृथिवि यः पृतन्याद् योऽभिदासान्मनसा यो वधेन ।**

**तं नो भूमे रन्धय पूर्वकृत्वरि ।। काण्ड-१२ सूक्तः २ मन्त्र. १४**

**पदपाठः-** यः । नः । द्वेषत् । पृथिविः । यः । पृतन्यात् । यः । अभिऽदासात् । मनसा । यः । वधेन । तम् । नः । भूमे । रन्धय । पूर्वऽकृत्वरि ।

**सरलार्थः-** हे मातपृथिवि ! यो हि प्राणी अस्मान् द्विष्यति दल-व्यूह-रचनां करोति मनसा कर्मणा वाचा शरीरेण वा तं हिंसकजनं तस्य हिंसनकर्मविचारान् पूर्वमेव जहि । पृथिव्यंशस्य सूक्ष्मरूपेण सूक्ष्मत्वात मनसि यत्किञ्चिद् उपजायते अस्मद् शत्रुषु तद् विदित्वा तं नाशयतु ।

**मन्त्रः-** **त्वज्जातास्त्वयि चरन्ति मर्त्यास्त्वं बिभर्षि द्विपदस्त्वं चतुष्पदः ।**

**तवेमे पृथिवि पञ्च मानवा येभ्यो ज्योतिरमृतं मर्त्येभ्य-**

**उद्यन्त्सूर्यो रश्मिभिरातनोति ।। काण्ड-१२ सूक्तः २ मन्त्र. १५**

**पदपाठः-** त्वत् । जाताः । त्वयि । चरन्ति । मर्त्याः । त्वम् । बिभर्षि । द्विऽपदः । त्वम् । चतुःऽपदः । तव । इमे । पृथिवि । पञ्च । मानवाः । येभ्यः । ज्योतिः । अमृतम् । मर्त्येभ्यः । उत् ऽयन् । सूर्यः । रश्मिऽभिः । आऽतनोति ।

**सरलार्थः-** हे पृथिवि ! त्वदुत्पन्नाः मरणधर्माः मानवाः प्राणिनो वा तव शरीरे एव विचरन्ति । अन्य आश्रयभावात् अन्य शरीरेभ्य उत्पन्ना अपि तव शरीरे एव क्रीडन्ति इति भावः । त्वमेव द्विपद बिभर्षि चतुष्पदश्च बिभर्षि। लोके स्थिताः ब्राह्मणक्षत्रियवैश्यशूद्रनिषादाः गन्धर्व-पित्र-सुर-देव-रक्षांसि वा तव एव सन्ति सन्तत्यः । तेभ्यः मर्त्येभ्यः एव उदीयमानः सूर्यः अमृतकिरणैः प्रकाशं लोके सर्वत्र विस्तारयति ।

## शब्दार्थः

**बृहत्** - महान्, **ऋतम्** - शाश्वतः, **तपः** - तपस्या, **उरुम्** - श्रेष्ठं वा विशालं, **असंबाधम्** - बाधारहितम्, **पृथिवी** - धरा, **पत्नी** - पालयित्री, **लोकम्** - संसारम्, **समम्** - समानं, **समुद्रः** - सागरः, **सिन्धुः** - नदी, **आपः** - जलानि, **कृष्टयः** - मनुष्याः, **चतस्त्रः** - प्रदिशः, **पूर्वादिदिशः पूर्वजनाः** - पूर्वजाः पितरः, **वर्चः** - तेजः, **भगम्** - ऐश्वर्यं, **द्रविणम्** - धनम्, **प्रियं** - रुचिकरं, **अर्णवः** - समुद्रः, **व्योमः** - आकाशः, **तन्वः** - शरीरः, **अहतः** - अमृतम्, **प्रथताम्** - विकासयतु **अहोरात्रे** - अहर्निशम्, **रक्षन्ति** - पालयन्ति, **वसु** - धनम् द्रविणम्, **पर्जन्यः**- मेधः **शचीपतिः** - इन्द्रः ।

## स्वाध्यायः

**१. निम्नाङ्कित-प्रश्नानां योग्यविकल्पं चित्वा उत्तरं ददतु ।**

(१) अथर्ववेदस्य पृथिवीसूक्तं कस्मिन् काण्डे वर्तते ?

(क) अष्टमकाण्डे (ख) दशमकाण्डे (ग) द्वादशकाण्डे (घ) चतुर्दशकाण्डे

(२) अथर्ववेदे कति काण्डानि सन्ति ?

(क) द्वाविंशतिः (ख) विंशतिः (ग) अष्टादश (घ) द्वादश

(३) पृथिवीसूक्ते कति मन्त्राः सन्ति ?

(क) पञ्चचत्वारिंशत् (ख) त्रिषष्टिः (ग) षष्टिः (घ) एकषष्टिः

(४) पृथिवी शब्दस्य कोर्थः ?

(क) लोकम् (ख) धरा (ग) ब्रह्म (घ) तपः

(५) अस्याः पृथिव्याः कति दिशः ?

(क) तिस्त्रः (ख) द्वे (ग) चतस्त्रः (घ) एका

(६) पूर्वजनाः इति शब्दस्य कोर्थः ?

(क) देवाः (ख) दानवाः (ग) पितरः (घ) मनुष्याः

(७) वसु शब्दस्य कोऽर्थः ?

(क) अग्निम् (ख) भूमिः (ग) धनम् (घ) जगतः

(८) माता भूमिः तर्हि पृथिव्याः पुत्रः कः ?

(क) अहम् (ख) त्वम् (ग) पिता (घ) माता

(९) पर्जन्य-शब्दस्य कोऽर्थः ?

(क) पृथिवी (ख) मेघः (ग) जलम् (घ) वायुः

(१०) शचीपतिः शब्दस्य कोऽर्थः ?

(क) विष्णुः (ख) इन्द्रः (ग) अश्विनौ (घ) पुत्रः

**२. निम्नाङ्कित-प्रश्नानाम् एकैकवाक्येन उत्तराणि लिखत ।**

(१) पृथिवी किं किं धारयन्ति ?

(२) केषां मध्ये बाधारहिता इयं पृथिवी वर्तते ?

(३) पृथिवी किं स्थानं स्थापयेत् ?

(४) भारतवर्षः पृथिव्याः कस्मिन् भागे अस्ति ?

(५) सा नो भूमिः किं दधातु ?

(६) यस्याः पृथिव्यां पूर्वजनाः किं कृतवन्तः ?

(७) इयं पृथिवी किं किं दधातु ?

(८) पृथिव्याः अनुसरणं के के कुर्वन्ति ?

(९) पृथिवी कयारीत्या प्रवहन्ति ?

(१०) कः देवः विविधरूपेण पृथिव्यां भ्रमणं चकार ?

**३. निम्नलिखितमन्त्राणां पूर्तिः लिखन्तु ।**

(१) सत्यं बृहदृतमुग्रं दीक्षा तपो .................................. नः कृणोतु ।

(२) यस्यां समुद्र उत .................................. पूर्वपेये दधातु ।

(३) यस्यामापः परिचराः .................................. उक्षतु वर्चसा ।

**४. निम्नलिखित-मन्त्राणां भावार्थं विधेया ।**

(१) यस्या॒श्चत॑स्रः प्र॒दिशः॑ पृथि॒व्या यस्या॒मन्नं॑ कृ॒ष्टयः॑ संबभू॒वुः ।

या बिभ॑र्ति बहु॒धा प्रा॒णदेज॒द् सा नो॒ भूमि॒र्गोष्वप्यन्नें॑ दधातु ॥

(२) गि॒रय॑स्ते॒ पर्व॑ता हि॒मव॒न्तोऽर॑ण्यं ते पृथिवी स्यो॒नम॑स्तु ।

बभ्रुं॒ कृ॒ष्णां रोहि॑णीं वि॒श्वरु॑पां ध्रु॒वां भूमि॑ं पृथि॒वीमिन्द्र॑गुप्ताम् ।

अजी॒तोऽह॑तो॒ अक्ष॒तोऽध्य॑ष्ठां पृथि॒वीम॒हम् ।

(३) यत् ते॒ मध्य॑ं पृथिवी॒ यच्च॒ नभ्य॒ं यास्त॒ ऊर्ज॑स्त॒न्वः संबभू॒वुः ।

तासु॑ नो घेह्य॒भि न॑ः पवस्व मा॒ता भूमि॑ः पु॒त्रो अ॒हं पृ॑थि॒व्याः ।

प॒र्जन्य॑ः पि॒ता स उ॑ नः पिपर्तु ।

**५. अधोलिखितानां शब्दरूपाणां परिचयं यच्छत ।**

(१) भव्यस्य (६) त्वयि

(२) अश्वानाम् (७) वधेन

(३) मायाभिः (८) पृथिव्याम्

(४) वर्चसा (९) अहम्

(५) यस्याम् (१०) देवाः

**६. अधोलिखितानां धातुरूपाणां परिचयं ददत ।**

(१) कृणोतु (६) उक्षतु

(२) बिभर्ति (७) तिष्ठामि

(३) बभूवुः (८) पालयतु

(४) जिन्वति (९) मीयन्ते

(५) दधातु (१०) धारयन्ति

**७. सन्धिविच्छेदनं कुरुत ।**

(१) नानावीर्याः (६) भूमिरग्नमिन्द्रः

(२) प्रथताम् (७) गवामश्वानाम्

(३) राध्यताम् (८) ज्योतिरमृतम्

(४) विश्वदानीम् (९) गिरयस्ते

(५) पृथिवीमप्रमादम् (१०) यस्याश्चतस्रः

८. **सन्धिसंयोजनं कुरुत ।**

| | |
|---|---|
| (१) स्योनम् + अस्तु | (६) तम + इमे |
| (२) यस्याम् + आपः | (७) पृथिवीम् + अहम् |
| (३) प्राणत् + एजत् | (८) यस्याम् + अन्नम् |
| (४) भूमिः + अग्निम् | (९) यस्याम् + इदम् |
| (५) याम् + अश्विनौ | (१०) दुहाम् + अपो |

**छात्र-प्रवृत्तिः**

- गुजरातराज्ये अथर्ववेदस्य विकासः कथं भवेत् इति छात्रैः सततं चिन्तनं करणीयम् । तथा गुजरातस्य प्रसिद्धानाम् अथर्ववेदीयपण्डितानां परिचयः प्राप्तव्यः ।

**विशिष्टज्ञानम्**

- आयुर्यज्ञेनकल्पताम् ।

● ● ●